MAHAKAVI KALIDASA'S

# RAGHUVAMSAM

## CANTO II.

*Edited*

With Introduction, Prose Order, Translation in English and Hindi, Sanskrit Commentary of Mallinatha, Substance in Sanskrit and copious Grammatical and Critical Notes.

*By*

RAMDHAN SHARMA

SHASTRI, M A. M O L, SAHITYACHARYA

*First Edition* ]  1942.  [ Price Rs. 1/4/- /

*Published by*
*Prof* **Ramdhan Sharma**
418, Katra Nil
DELHI.

[ *All rights reserved by the Editor* ]

*Printed by*
**Pt. Dina Nath Bhargava 'Dinesh'**
*at the*
Jamna Printing Works,
DELHI

# PREFACE.

THIS edition of the second canto of Raghuvansam is prepared mainly to satisfy the needs of University students. The prose order of each verse is given immediately below it, followed by the translation both in English and Hindi. This will facilitate the students to understand the text with ease and throughly. In the translation an attempt is made to be literal as far as possible and at the same time to preserve the idiom and elegance of diction also. The Sanskrit commentary of Mallinatha, given after the translation is supplemented at certain places, e g. the compound words and the synonyms that are not given by Mallinatha are inserted and enclosed in brackets. Then, the substance of each verse in easy and simple Sanskrit is also given in order to enable the students to explain the text with facility in Sanskrit also. At the end are added copious notes in which grammetical and critical explanations are fully discussed and the derivations of important words, figures of speech, allusions and Pauranic references etc. are also given Thus an attempt is made to make the book as complete as possible and it is hoped that it will prove to be highly useful to those for whom it is intended

My sincere acknowledgements are due to all those scholars whose valuable editions of this book I have been able to consult and make use of in preparing it.

**Commercial College.**
*July, 1942.*

**RAMDHAN SHARMA.**

# INTRODUCTION.

"महाकविं कालिदासं वन्दे वाग्देवतां गुरुम् ।
यज्ज्ञाने विश्वमाभाति दर्पणे प्रतिबिम्बवत् ॥"

**Kalidasa**—*The Author of Raghuvamsa.*

RAGHUVAMSA is composed by Kalidasa, the greatest and by far the most celebrated poet in Sanskrit literature. [It is, however, regrettable that nothing whatever of value is known to us regarding the age, life and nativity of this 'favoured child of Muse'.] Like most of the ancient writers of Sanskrit literature Kalidasa has made no reference to himself in his works, nor do we find, beyond incidental references, any records of his life and character by later writers. Even the endeavoures of the modern researches in Indology have failed to yield any definite result in this direction as most of the data that form the basis of their discussion may be set aside as entirely incredible, and thus the deductions they have arrived at are but a matter of mere conjecture.

**DATE:**—The Indian tradition widely circulated among the orthodox Pandits declares Kalidasa to be one of the 'nine gems' at the court of king Vikramaditya who is believed to have started the Vikrama or the Samvat era in 56 B.C. and thus it makes Kalidasa to have flourished in the first century B C. But most of the European scholars and also some of the Indians who concur with them do

not accept this tradition as real history The feeling, however, has become so strong that even they could not easily shake off the belief that the name of Kalidasa was connected with some one or other king bearing the appellation of Vikramaditya, for they have tried to discover such a king and establish the relation of Kalidasa with him.

The chapters of ancient Indian history record the existence of at least three such kings who ruled under the appellation of Vikramaditya at three different periods, but it has yet to be proved as to which of them was, indeed, the patron of our poet The first of them was Chandra Gupta II, the son of Samudra Gupta and an eminent king of the Gupta dynasty who reigned from 375 A.D. to 420 A.D. The second was Skanda Gupta of the same dynasty who flourished in the middle of the 5th. century A.D and the third was Yashodharman of Kashmir, in the middle of the 6th. century A.D.. Dr. Fergusson started the theory that Kalidasa was a protege of this last king Yashodharman who defeated and drove away the Hunas in 544 A.D. and in commemoration of his victory founded the Samvat era, throwing it back by 600 years in order to give it an air of antiquity. This hypothesis of Dr. Fergusson gave rise to the well known Renaissance Theory of Max Muller. But both these theories have now been fully invalidated in the light of the epigraphical researches of Dr. Fleet, the well known authority on Indian epigraphy. As regards the kings of the Gupta dynasty most of the scholars are inclined to associate Kalidasa with Chandra Gupta II who is believed to have been a patron of art and learning. There seems, however, nothing improbable in the tradition as the existence

of a king Vikramaditya in the first century B C. is surmised by some scholars on the testimony of the Gatha Saptasati of Hal and the Brihatkathamanjari of Gunadhya. Besides, the theory that Kalidasa flourished in the 1st. century B.C. has been supported by some scholars on other grounds also. The striking resemblance between the poetry of Kalidasa and that of Asvaghosh gives an indication that one of them must have borrowed from the other and professor K. Chattopadhyaya of the Allahabad University in his article on the 'Date of Kalidasa' has tried to prove that Asvaghosh was the borrower. Thus he makes Kalidasa prior to Asvaghosh at least by a century and assigns to him the 1st. century B C. (the traditional date) as the date of his existence; for Asvaghosh is definitely believed to have existed in the first century A D. during the reign of Kaniska The tradition which makes Kalidasa a contemporary of king Bhoja of Dhara in the 11th century A.D., on the testimony of the 'Bhoja-Prabandha of Ballala' seems to be wholly unfounded as the authority of the 'Bhoja-Prabandha' is questionable.

**BIRTH PLACE:**—The question of Kalidasa's birth place, too, is not wholly without contention; for the glowing descriptions of a number of places found in his works have led the scholars to surmise that he must have belonged to one of them Thus some scholars have tried to prove that he was born in Kashmir, while some Bengalis claim him to be a native of Bengal But the fond indulgence with which Kalidasa has described the beauties and glory of Ujjaini and its surroundings is sure to make one believe that he must have been a resident of that

city and passed a greater part of his life there There seems no doubt that Kalidasa must have travelled widely and established his familiarity with all these places.

**LIFE:**—The facts of Kalidasa's life also are buried under the debris of ignorance. In the absence of truth legends and anecdotes are likely to gain currency and we have a number of such anecdotes about Kalidasa, too, which though interesting in themselves are of no value owing to their unscientific nature. One of such anecdotes asserts that Kalidasa was a boor in his early life but, by chance, he was married to a haughty though learned princess named Vidvattama. Shortly after the wedding the princess, in her first meeting, put him a question in order to ascertain if he was a man of letters. Kalidasa dislayed his ignorance and was, consequently, expelled by the princess from the palace. He, then, devoted himself to the worship of Goddess Kali and by her favour was endowed with learning and poetic genius. Having thus become a poet he returned home and was received with pleasure by the princess, who then again put him a question if he had attained any distinction in his speech—'अस्ति कश्चिद्वाग्विशेषः'. It is said that Kalidasa in rememberance of the three words of her question composed his three poems कुमारसंभव, मेघदूत and रघुवंश beginning with those words.

According to Bhaudaji Kalidasa was a Sarasvata Brahman and a devotee of Siva. His works, however, show that he was an eclectic in religion and well-versed in the ancient scriptures and the various schools of Indian philosophy. His poems which are marked with

gaiety and calmness are enough to indicate that this gifted poet must have lived a happy life.

**WORKS:**—There are about 40 works which are ascribed to Kalidasa but most of them without any authenticity. The main works that are generally believed to be from his pen are as follows:—ऋतुसंहार, मेघदूत, कुमारसम्भव, रघुवंश, मालविकाग्निमित्र, विक्रमोर्वशी and शकुन्तला. The first four of these are poems while the last three are dramas.

### Poetic merits and appreciation.

In the words of Prof. Lassen 'Kalidasa is the brightest star in the firmament of Indian poetry'. He was both a poet and a dramatist of the highest order and his works bespeak the versatile character of his genius and the superior order of his learning. The merits of his poetry are beyond description but in short they may be summed up as follows:—

1. His poetry is marked by pure sentiment of love, lofty ideas, happy expression, rich imagery and sweet melody.

2. It shows that Kalidasa had a keen perception of and deep sympathy with the beauties of Nature and was skilled in giving a vivid and graphic picture of what he wished to say. Thus his descriptions of the sublime and beautiful scenery of nature and its phenomena are simply astonishing and make a direct and sympathetic appeal to the heart.

3. His poems show that he had a close observation of the society and its intricate problems. In his works

he represents all shades of character and in his "delicate appreciation of the most refined feelings of and familiarity with the conflicting sentiments and emotions of the human heart" he excels all other poets.

4. His diction is pure and chaste and embellished with perspicuity, simplicity of expression and an easy and spontaneous flow of language. It is free from the extravagence and artificiality that mark the later Kavyas of Sanskrit literature.

5. His similes are most beautiful and appropriate and in the use of them Kalidasa stands unrivalled as is clear from the following :—

'उपमा कालिदासस्य भारवेरर्थगौरवम्' ।

The readers enjoy a heavenly bliss in the poems of Kalidasa. The charms of his muse have earned for him the highest praise aud admiration of both the oriental and occidental scholars. Thus Bana, the famous author of Kadambari says:—

"निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते" ॥

While Humboldt speaks of him as follows:—"Tenderness in the expression of feeling and richness of creative fancy have assigned to him his lofty place among the poets of all nations." Kalidasa is called as 'the Shakespere of India' by Sir Monier Williams.

## Raghuvamsam—A Mahakavya.

Raghuvamsa is, as the name implies, a narrative

poem which describes the history of Raghu's race or the dynasty of Sun-born kings. It it held to be the maturest poem of Kalidasa and is ranked by orthodox Pandits as one of the five great classical poems (Mahakavyas) of Sanskrit literature. According to Sanskrit poetics a Mahakavya is a composition of considerable length, varying in description and elaborate in construction. Its subject is taken from some old narrative and it is divided into Sargas or *Cantos for convenience of narration.* Dandin in his Kavyadarsa defines a Mahakavya thus:—

सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ॥
इतिहासकथोद्भूतमितरद्वा सदाश्रयम् ।
चतुर्वर्गफलायत्तं चतुरोदात्तनायकम् ॥
नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः ।
उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि ॥
अलंकृतमसंक्षिप्तं रसभावनिरन्तरम् ।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसंधिभिः ॥
सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जनम् ।
काव्यं कल्पोत्तरस्थायि जायते सदलंकृति ॥

Almost an *identical* definition of a Mahakavya is given in the Agni Purana, the Kavyalankara of Bhamaha and the Sahitya Darpana of Visvanatha. The poems of Kalidasa display all these rules but not so rigidly as the later Kavyas. Thus Raghuvamsa, too, is true to the type

in a general way for it possesses most of the topics stated above. Its theme embodies the life-account of the well-known kings of the Solar race and gives the poet full scope to exceicise his power of description of innumerable topics appropriate to a Mahakavya. It is however, distinguished from other Kavyas in as much as it possesses "in the first place an elegant and chaste diction, novel thought, pictures and turns of expressions of surprising beauty and above all a true and poetic feeling for the aspects of nature and insight into the manly and tender moods of human emotions"

## A brief summary of Canto II.

The first canto introduces us to king Dilipa. He was childless and so felt anxious to have a son born of his wife Sudaksina and went with her to the hermitage of Vasistha, his precceptor, to seek advice and help from him Vasistha told him that once while returning from his visit to Indra he had, by chance, failed to pay respect to the celestial cow Surabhi and was, therefore, cursed by her. He, then, advised him to worship his own sacrificial cow, Nandini, the daughter of Surabhi until she be pleased and grant him a boon. In obedience to the advice of his preceptor the king determined to worship the cow.

The second Canto describes how the king propitiated the cow and obtained from her the boon he desired. *From early dawn to ruddy eve he followed the* cow into the forest, guarded her there from wild beasts and served her in many other ways with ardent devotion While he had been thus dutifully carrying his vow to propitiate her, twenty-one days passed away On the

22nd. day the cow wishing to test the firmness of the king's devotion entered a cave of the Himalaya, scattered with green grass, and there created an illusory lion who pounced upon her and dragged her away by force. The king who was gazing at the grandure of the mountain could not notice the accident but his attention was at once drawn towards the direction of the cow by her loud and piteous cry. On seeing the lion sitting upon her he got highly enraged and hastened to take out an arrow from his quiver in order to kill him. But to his mortification he found his arm paralysed and his fingers stuck to the end of the arrow. The lion, seeing the king thus frustrated in his action spoke to him in human voice and said, 'O king ! vain will be all your efforts to kill me as I am a servant of God Siva who having transformed me into the form of a lion has appointed me here to guard the Devadaru Tree, standing before you, from wild elephants, as it is dearly loved by Parvati I am also ordered by the Lord to live upon the animals that might come within my reach. Thus this cow which has now ventured near me is my lawful prey and so I shall eat her up and satisfy my hunger. You should now go back to your place and appease the anger of your preceptor by presenting him with other cows. Hearing these words of the lion the king offered him his own body and requested him to leave the cow; for as a true Ksatriya he was duty-bound to save her from all perils and could not allow her to perish before his eyes. The lion, however, tried to dissuade the king from his resolve but in vain. He then agreed to the proposal and the king with his face hung down offered his body to him. While he was thus

expecting the lion to spring upon him, there fell to his astonishment, a shower of flowers over him and he saw the lion no more there. The cow then disclosed to him the mystery of the illusion which was her own creation to test his devotion. She also expressed that she was pleased with his worship and asked him to choose a boon. The king requested her to bless him with a son. Nandini promised to grant his request and ordered him to drink her milk. Dilipa, however, told her that he would do so with the permission of his preceptor. Then they returned to the hermitage and the king informed his preceptor and his wife Sudaksina of Nandini's favour and after the evening rites were performed he drank the cow's milk with Vasistha's permission. Next day the great sage dismissed the royal couple with his blessings and shortly after the queen became pregnant.

# CORRIGENDA.

| Page | Line | *For* | *Substitute* |
|---|---|---|---|
| 2 | 15 | श्रुतबोधे | वृत्तरत्नाकरे |
| 4 | 1 | ( धर्मार्थं ) | ( धर्मार्थी ) |
| ,, | 3 | पांसुना | पांसुनी |
| 10 | 17 | Purport | Substance |
| 12 | 19 | दुष्ठ | दुष्ट |
| 13 | 2 | thc | the |
| 16 | 19 | आचारार्थं | आचारार्थी |
| 18 | 3 | भाव: स्वभावा | भाव: सत्वस्वभावा |
| 20 | 17 | umbrela | umbrella |
| 23 | 3 | जलवषणेन | जलवर्षणेन |
| 31 | 18 | धर्मार्थं | धर्मार्थी |
| 39 | 20 | द्वाविशे | द्वाविंशे |
| 44 | 2 | उपाधिम्यां | उपाधिभ्यां |
| ,, | 18 | gaif | gait |
| 46 | 23 | सिंह | सिंहं |
| ,, | ,, | ब्राण | बाण |
| 47 | 11 | on account his | on account of his |
| ,, | 12 | her | his |
| 54 | 2 | षुपोप | पुपोष |
| 59 | 10 | न्यवज्ञं | न्यवज्ञां |
| 61 | 6 | तत्वपूर्वभङ्गे | तत्पूर्वभङ्गे |

| Page | Line | *For* | *Substitute* |
|---|---|---|---|
| 64 | 9 | गुरोनर्धमपि | गुरोर्धनमपि |
| 74 | 12 | किकरस्य | किंकरस्य |
| 78 | 7 | भवतः | भवत्तः |
| ,, | 12 | owu | own |
| ,, | 16 | destoyed | destroyed |
| ,, | 23 | प्रत्युह्रियते | प्रत्याह्रियते |
| ९३ | २० | [illegible] | [illegible] |
| 107 | 3 | मशेयुक्त | मंशयुक्त |

## NOTES.

| | | | |
|---|---|---|---|
| 3 | 19 | पत्नो | पत्नी |
| 5 | 25 | forest | vow |
| 12 | 24 | Souuding | Sounding |
| 19 | 9 | his | her |
| 20 | 20 | सप्तमी ए० व० | सप्तमी ब० व० |
| 28 | 14 | तत्तु० | तत्पु० |
| ,, | 18 | ययन् | पयन् |
| 31 | 6 | निस्+क | निस्+स्तृ+क |
| 32 | 22 | सुरद्विट | सुरद्विट् |
| ,, | 24 | चन्द्रमस | चन्द्रमस् |
| 38 | 1 | स्पर्श | स्पृश् |
| 42 | 1 | expressed | suggested |
| 43 | 13 | मुक्तः | मुक्ता |

श्री सरस्वत्यै नमः ॥

# महाकविश्रीकालिदासविरचिते रघुवंशमहाकाव्ये

## द्वितीयः सर्गः ।

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगंधमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥१॥

**Prose Order (अन्वयः):—**

अथ यशोधनः प्रजानाम् अधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् पीतप्रतिबद्धवत्साम् ऋषेः धेनुम् वनाय मुमोच ।

**English Translation:—**

Then, at day-break, the lord of the people, whose glory was his wealth, released the sage's cow for the forest after she was worshipped with (lit. made to accept) perfumes and flower garlands by his consort (Sudaksina) and after her calf had sucked and then been tied again. (1)

**Hindi Translation:—**

इसके अनन्तर यश के धनी और प्रजा का पालन करने वाले उस राजा दिलीप ने प्रातःकाल होने पर अपनी पत्नी सुदक्षिणा के द्वारा गन्ध और पुष्प माला आदि से संपूजित तथा दूध पिलाकर बांधे हुए बछड़े वाली ऋषि की गाय को बन जाने के लिये खोल दिया ॥१॥

Sanskrit Commentary (टीका):—

अथ (वशिष्ठाश्रमे) निशानयनानन्तरम्। यशोधनः (कीर्तिवित्तः)। प्रजानां (जनानाम्)। ('प्रजा स्यात् सन्ततौ जने' इत्यमरः)। अधिपः स्वामी राजा दिलीप इत्यर्थः। प्रभाते प्रातःकाले। जायाप्रतिग्राहितगन्धमाल्यां जायया [स्वधर्मपत्न्या] सुदक्षिणया प्रतिग्राहिते स्वीकारिते गन्धमाल्ये [आमोदपुष्पमाले] यया सा तां तथोक्ताम्। ('गन्धो गन्धक आमोदे लेशे संबन्धगर्वयोः' इति विश्वः)। पीतप्रतिबद्धवत्सां पीतः दुग्धं पीतवानित्यर्थः, पीतं पानमस्यास्तीति पीतः। 'अर्श आदिभ्योऽच्' इत्यच्प्रत्ययः प्रतिबद्धः (रज्वादिना पुनर्नियंत्रितः) वत्सः (बालः) यस्याः सा ताम्। ऋषेः मुनेः वशिष्ठस्य। धेनुं (गां) नन्दिनीमित्यर्थः। वनाय वनं गन्तुम्। 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति तुमुन्नर्थे चतुर्थी। ['अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः]। मुमोच (बन्धनान्मुक्तवान्)। अस्मिन् सर्गे उपजातिवृत्तम्—तल्लक्षणं यथा श्रुतबोधे- 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।' इति।

Substance in Sanskrit:—

इक्ष्वाकुकुलनन्दनो राजा दिलीपो वंशविवृद्ध्यर्थं पुत्रप्राप्तिकामनया स्वकुलगुरोर्वशिष्ठस्यादेशेन महर्षेर्नन्दिनीनाम्नीं होमधेनुं समाराधनेन प्रसादयितुकामो गोचारणकर्मणि प्रवृत्तः प्रातःकाले स्वपत्न्या सुदक्षिणया गन्धमाल्यादिभिः संपूजितां तां धेनुं वत्सदुग्धपानानन्तरं वनं गन्तुं बन्धनान्मुक्तवान्।

तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया ।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥२॥

**Prose Order:—**

अपांसुलानाम् धुरि कीर्तनीया मनुष्येश्वरधर्मपत्नी खुरन्यासपवित्रपांसुम् तस्याः मार्गम् स्मृतिः श्रुतेः अर्थम् इव अन्वगच्छत् ।

**English Translation:—**

The lawful wife of the king, who was worthy to be reckoned the foremost of chaste women, followed her (the cow's) path, the dust on which was sanctified by the placing of her hoofs, even as Smriti follows the sense of Sruti. (2)

**Hindi Translation:—**

पतिव्रताओं में अग्रगण्य राजा (दिलीप) की धर्मपत्नी सुदक्षिणा खुरों के पड़ने से पवित्र धूलि वाले उस गौ के मार्ग का इस प्रकार अनुसरण करने लगी जैसे (मन्वादि प्रणीत) स्मृति वेदों के अर्थ का ही अनुसरण करती है ॥२॥

**Sanskrit Commentary:—**

अपांसुलानां पतिव्रतानाम् । पांसवो दोषा आसां सन्तीति पांसुलाः स्वैरिण्यः (स्वच्छन्दचारिण्य इत्यर्थः) । 'स्वैरिणी पांसुला:' इत्यमरः । 'सिध्मादिभ्यश्च' इति लच् प्रत्ययः । न पांसुला इत्यपांसुलाः पतिव्रता इत्यर्थः । तासाम् । धुरि अग्रे । कीर्तनीया परिगणनीया । मनुष्येश्वरधर्मपत्नी मनुष्याणां जनानाम् ईश्वरः स्वामी दिलीप इत्यर्थः, तस्य धर्मपत्नी राज्ञी सुदक्षिणा । धर्मस्य

(धर्मार्थं) पत्नीति धर्मपत्नी, अत्र तादर्थ्ये षष्ठी समासः। खुरन्यासपवित्रपांसुं खुराणां शफानां न्यासेन स्थापनेन पवित्राः पूताः पांसवः धूलयः यस्य तम्। 'रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः'। इत्यमरः। तस्याः धेनोः। मार्गं पन्थानम्। 'अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिः।' इत्यमर। स्मृतिः मनुयाज्ञवल्क्यादिप्रणीतं शास्त्रम्। श्रुतेः वेदस्य। अर्थमिव अभिधेयमिव। अन्वगच्छत् अन्वसरत्। ('श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी। अविरोधे सदा कार्यं स्मार्तं वैदिकवत् सता' इति जाबालिः)। पांसुलपथप्रवृत्तावप्यपांसुलानां धुरि कीर्तनीयेति कथनाद्विरोधालंकारो ध्वन्यते।

**Substance in Sanskrit:—**

यथा मन्वादिप्रणीतस्मृतिः श्रुतिप्रतिपादितमेवार्थमनुसरति तथैव राज्ञो धर्मपत्नी सुदक्षिणापि गोखुरन्यासपूतरेणुं धेनोर्मार्गमनुसरतिस्म।

**निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः।**
**पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम्॥३॥**

**Prose Order:—**

दयालुः यशोभिः सुरभिः राजा ताम् दयिताम् निवर्त्य सौरभेयीम् पयोधरीभूतचतुःसमुद्राम् गोरूपधराम् उर्वीम् इव जुगोप।

**English Translation:—**

The kindly king, resplendent with his glory, having bidden his dear wife return (home), protected the cow, the offspring of Surabhi, as if

she were earth embodied with the four oceans as her udders. (3)

**Hindi Translation:—**

वह दयालु और यशस्वी राजा अपनी प्रिय पत्नी को घर लौटाकर सुरभि की कन्या उस नन्दिनी गौ की इस प्रकार रक्षा करने लगा मानों वह चार समुद्रों के रूप में (चार) स्तन वाली गाय का रूप धारण किए हुए साक्षात् पृथ्वी ही हो ॥३॥

**Sanskrit Commentary:—**

दयालुः कृपालुः करुणावान् इत्यर्थः। 'स्याद्दयालुः कारुणिकः।' इत्यमरः। यशोभिः कीर्तिभिः। सुरभिः मनोहरः। 'सुरभिः स्यान्मनोज्ञेऽपि' इति विश्वः। राजा नृपः (दिलीपः)। तां पूर्वोक्तां दयितां प्रियपत्नीं सुदक्षिणाम्। निवर्त्य (गृहं) परावर्त्य। सौरभेयीं कामधेनुसुतां नन्दिनीम्। 'स्त्रीभ्यो ढक्' इति ढक् प्रत्ययस्ततः स्त्रियां ङीप्। पयोधरीभूतचतुःसमुद्रां पयोधरीभूताः स्तनीभूताः चत्वारः एतत्संख्याकाः समुद्राः सागराः यस्याःसा ताम् 'अनेकमन्यपदार्थे' इत्यनेकपदार्थग्रहणात्त्रिपदोबहुव्रीहिः। धरन्तीति धराः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इत्यच्प्रत्ययः। पयसां धरा इति पयोधराः स्तनाः। 'स्त्रीस्तनाब्दौ पयोधरौ' इत्यमरः। अपयोधराः संपद्यमानाः पयोधरीभूताः। 'अभूततद्भावे च्विः', 'कुगतिप्रादयः' इति समासः। गोरूपधरां धेनुरूपधारिणीम्। उर्वीमिव पृथ्वीमिव। जुगोप ररक्ष। धेनुपक्षे पयसा दुग्धेन अधरीभूताः तिरस्कृताः चत्वारः समुद्राः

यस्याः सा तथोक्तां दुग्धतिरस्कृतसागरां पृथ्वीमिव ।

**Substance in Sanskrit:—**

परमकारुणिको राजा मार्गे किंचिद्दूरं गत्वा स्वप्रियपत्नीं गृहं परावर्तितुमादिदेश ततश्चैकाकी धेनोः संरक्षणे प्रवृत्तः । तेन रक्षिता च सा धेनुश्चतुःसागररूपस्तनवती गोरूपधारिणी साक्षात् पृथ्वीव बभौ ।

**व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ।**
**न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ॥४॥**

**Prose Order:—**

व्रताय धेनोः अनुचरेण तेन शेषः अपि अनुयायिवर्गः न्यषेधि, तस्य च शरीररक्षा अन्यतः न हि मनोः प्रसूतिः स्ववीर्यगुप्ता ।

**English Translation:**

The king, who was following the cow in his vow of service, prohibited even the rest of his attendants (to follow him). Thus he had no other means to protect his body, for the descendants of Manu depend upon their own valour to defend them. (4)

**Hindi Translation:—**

सेवाव्रत पालन करने के लिये गौ के पीछे सेवक रूप में चलने वाले उस राजा ने अपने बचे हुए सेवकों को भी लौटा दिया । उसके शरीर की रक्षा करने के लिये किसी अन्य पुरुष की आवश्यकता न थी क्योंकि मनु की सन्तान अपने पराक्रम से ही अपनी रक्षा करने में समर्थ होती है ॥४॥

**Sanskrit Commentary:—**

व्रताय (गोसेवाव्रतपालनाय)। धेनोः नन्दिन्याः। अनुचरेण सेवकेन। न तु जीवनायेतिभावः। तेन राज्ञा दिलीपेन। शेषोऽपि (सुदक्षिणापेक्षया) अवशिष्टोऽपि। अनुयायिवर्गः सेवकसमूहः। (अनुयातुं शीलं येषान्तेऽनुयायिनः, 'ताच्छील्ये णिनिः', तेषां वर्गः)। न्यषेधि निवर्तितः। तस्य राज्ञो दिलीपस्य च। शरीररक्षा देह-रक्षणम्। अन्यतः पुरुषान्तरात्। न 'अपेक्ष्यते' इति शेषः। हि यतः। मनोः (एतन्नामकस्य क्षत्रियकुलप्रवर्तकस्य दिलीपपूर्वजस्य राज्ञः) प्रसूतिः संततिः। स्ववीर्यगुप्ता स्वस्यात्मनः वीर्येणैव पराक्रमेणैव गुप्ता रक्षिता।

**Substance in Sanskrit:—**

मनोः संततिः स्वपराक्रमेणैवात्मरक्षणे क्षमा न तस्याः परापेक्षाऽतो राज्ञा दिलीपेन सर्वोऽप्यनुयायिवर्गो निवर्तितः। एकाकी च तस्मिन् वने गोरक्षणे प्रवृत्तः।

**आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च।**
**अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत्॥५॥**

**Prose Order:—**

स सम्राट् आस्वादवद्भिः तृणानाम् कवलैः, कण्डूयनैः दंशनिवारणैः अव्याहतैः स्वैरगतैः च तस्याः समाराधनतत्परः अभूत्।

**English Translation:—**

That great monarch, offering her savoury morsels of grass, scratching her body, warding

off wild gadflies and without impeding her free movements, devoted himself to propitiate her. (5)

**Hindi Translation:—**

कभी हरी हरी (कोमल) घास के स्वादिष्ट ग्रास देकर, कभी शरीर खुजाकर, कभी (वन के) डांस और मक्खियां उड़ाकर और बिना रोकरोट उसे अपनी इच्छानुसार विचरने देकर वह चक्रवर्ती राजा उस गौ की सेवा सुश्रूषा में संलग्न होगया ॥५॥

**Sanskrit Commentary:—**

स पूर्वोक्तः सम्राट् चक्रवर्ती (मण्डलेश्वरः)। 'येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः। शास्ति यश्चाज्ञया राज्ञः स सम्राट्' इत्यमरः। आस्वादवद्भिः रसयुक्तैः स्वादुभिरित्यर्थः। तृणानां शष्पाणाम्। 'शष्पं बालतृणं घासः' इत्यमरः। कवलैः ग्रासैः। 'ग्रासस्तु कवलार्थकः इत्यमरः। कण्डूयनैः गात्रखर्जनैः। ['कण्डूय्' इति नामधातोर्ल्युट् प्रत्ययः]। दंशानां वनमक्षिकाणाम्। 'दंशस्तु वनमक्षिका' इत्यमरः। निवारणैः दूरीकरणैः। अव्याहतैः अप्रतिहतैः (अनवरुद्धैरित्यर्थः)। स्वैरगतैः स्वच्छन्दगमनैः। स्व ईरः प्रेरणम् अस्मिन् स्वैरम्। स्वैराणि गतानि इति स्वैरगतानि तैः। तस्याः धेनोः समाराधनतत्परः शुश्रूषासक्तः। समाराधने तत्परः प्रसक्तः। 'तत्परे प्रसितासक्तौ' इत्यमरः। अभूत् जातः।

**Substance in Sanskrit:—**

स चक्रवर्ती नृपः कदाचित् बालतृणानां स्वादिष्टग्रासैः

कदाचित् गात्रखर्जनैः कदाचित् वनमक्षिकादूरीकरणैस्तस्याः स्वच्छन्दगमनैश्च विविधप्रकारैस्तस्या धेनोः शुश्रूषायां सन्नद्धोऽभूत् ।

स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥६॥

**Prose Order:—**

भूपतिः स्थिताम् स्थितः प्रयाताम् उच्चलितः निषेदुषीम् आसन-बन्धधीरः जलम् आददानाम् जलाभिलाषी (इत्थम्) छाया इव ताम् अन्वगच्छत् ।

**English Translation:—**

The king stood when she stood; on went he, when she went; he sat firmly to his seat when she lay down and would drink water when she drank it. Thus, like her shadow, he followed her. (6)

**Hindi Translation:—**

गौ के खड़ा होने पर वह राजा स्वयं भी खड़ा होजाता, उसके चलने पर चलने लगता, बैठ जाने पर आप भी धैर्य के साथ अपनी जगह पर बैठ जाता और उसके जल पीने पर स्वय भी जल पीनें लगता। इस प्रकार छाया के समान वह उसका अनुसरण करने लगा ॥६॥

**Sanskrit Commentary:—**

भूपतिः राजा। तां धेनुम्। स्थितां सतीं गमनरहितामूर्ध्वे-स्थितामित्यर्थः। स्थितः सन् स्वयमपि गमनाद् विरम्योर्ध्वस्थितः सन्। (स्थितिः ऊर्ध्वावस्थानम्)। प्रयातां प्रस्थितां गच्छन्ती-

मिति यावत्। उच्चलितः स्वयमपि प्रस्थितः गच्छन्नित्यर्थः। निषेदुषीम् उपविष्टाम्। 'भाषायां सदवसुश्रुवः' इति क्वसुप्रत्ययः। 'उगितश्च' इति ङीप्। आसनबन्धधीरः स्वयमपि धैर्येणोपविष्टः सन्। आसनबन्धे (उपवेशने) धीरः इति सप्तमीतत्पुरुषः। जलं वारि। 'आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्' इत्यमरः। आददानां पिबन्तीमित्यर्थः। जलाभिलाषी स्वयमपि जलं पिबन्नित्यर्थः। इत्थं विविधैः प्रकारैः छायेव प्रतिबिम्बमिव। अन्वगच्छत् अन्वसरत्। [अत्र यैः कैश्चिदुच्यते यच्छायाशब्दस्य स्त्रीवाचित्वाद्भूपतेश्च पुल्लिङ्गत्वात् उपमानोपमेययोर्लिङ्गभेदस्य सत्वात् भग्नप्रक्रमत्वं दोषः, तन्न, यतो 'यत्र लिङ्गवचनभेदेऽपि न साधारणधर्मस्यान्यथाभावस्तत्र न दोषः' इति साहित्यदर्पणकारवचनानुसारेण नात्र साधारणधर्मस्यान्यथाभावः। छायाभूपत्योरुपमानोपमेययोर्द्वयोरपि तुल्यसाधारणधर्मस्य सत्वात्। न चात्र विदुषामुद्वेगो जायते तद्यथा दण्डिराह 'न लिङ्गवचने भिन्ने न हीनाधिकतापि वा। उपमादूषणायालं यत्रोद्वेगो न धीमताम् इति']।

**Purport in Sanskrit:—**

स राजा तस्या धेन्वाः प्रसन्नतायै विविधप्रकारैस्तस्याः शुश्रूषायां संलग्नोऽभूत्। छायेव च तामन्वचरत्। यदा सा स्थिताऽसीत् तदा सोऽपि स्थितोऽभवत् यदा सा प्रस्थिता तदा सोऽपि प्रस्थितः यदा च सोपविष्टा तदा सोऽप्युपविष्टः। एवञ्च यदा सा जलमपिबत् तदा सोऽपि जलमपिबत्।

स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः ।
आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः ॥७॥

**Prose Order:—**

स न्यस्तचिह्नाम् अपि तेजोविशेषानुमिताम् राजलक्ष्मीम् दधानः अनाविष्कृतदानराजिः अन्तर्मदावस्थः द्विपेन्द्रः इव आसीत् ।

**English Translation —**

Possessing royal glory, the external marks whereof were cast aside and yet the presence of which was inferred from his peculiar lustre, he was looking like a lord of elephants, whose passion burns within as the flow of his rut is yet unmanifested. (7)

**Hindi Translation:—**

बाहरी (छत्र, चामर आदि) चिह्नों के छोड़ देने पर भी शरीर के विशेष तेज से ही प्रकट होने वाली राजशोभा को धारण किये हुए वह राजा उस मदोन्मत्त हाथी के समान मालूम होता था जिसका मद अभी बाहर से प्रकट न होने पर भी भीतर छिपा हुआ हो ॥७॥

**Sanskrit Commentary:—**

स पूर्वोक्तः राजा । न्यस्तचिह्नामपि न्यस्तानि चिह्नानि छत्रचामरादीनि यस्यास्तां तथाभूतामपि । परिहृतबाह्यलक्षणामपि । 'चिह्नं लक्ष्म च लक्षणम्' इत्यमरः । तेजोविशेषानुमितां तेजोविशेषेण प्रभावातिशयेन । 'तेजः प्रभावे दीप्तौ च बले

शुक्रेऽप्यतस्त्रिषु' इत्यमरः। अनुमितां परिलक्षिताम्। देहदीप्त्यतिशयेनलक्षितामित्यर्थः। राजलक्ष्मीं राज्यश्रियम्। 'सम्पत्तिः श्रीश्च लक्ष्मीश्च' इत्यमरः। दधानः धारयन्। अनाविष्कृतदानराजिः न आविष्कृता इति अनाविष्कृता बहिरप्रकटिता दानराजिः मदरेखा यस्य सः। बहिरप्रकटितमदलेखः। अतः अन्तर्मदावस्थः अन्तर्गता मदावस्था यस्य सोऽन्तर्मदावस्थः। तथाभूतो द्विपेन्द्रः इव गजराज इव। आसीत् अभूत्। द्वाभ्यां पिबतीति द्विपः। द्विपानामिन्द्र इति द्विपेन्द्रः (षष्ठी तत्पुरुषः)। [वल्लभेन भद्रमन्द्-मृगसंकीर्णा इति चत्वारो हस्तिभेदा उक्तास्तेषु भद्रएवान्तर्मदः]।

Substance in Sanskrit

तेन राज्ञा सर्वाणि छत्रचामरादीनि बाह्यचिह्नानि परित्यक्तानि तथापि स स्वशरीरस्य दीप्तिविशेषेण प्रभावातिशयेन च राजैवायमभूत् नान्यः कश्चिदिति सम्यक् परिलक्ष्यतेऽस्म। एवंभूतश्च स अन्तर्मदावस्थ उन्मत्तगजेन्द्र इवालक्ष्यत।

**लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम्।**
**रक्षापदेशान्मुनिहोमधेनोर्वन्यान् विनेष्यन्निव दुष्टसत्वान्॥८॥**

Prose Order:—

लताप्रतानोद्ग्रथितैः केशैः (उपलक्षितः) अधिज्यधन्वा सः राजा मुनिहोमधेनोः रक्षापदेशात् वन्यान् दुष्टसत्वान् विनेष्यन् इव दावम् विचचार।

English Translation:—

The king, with his hair tied up into a knot with tendrils of creeper, and with his bow strung,

ranged the forest, as if under the pretext of guarding the sacrificial cow of the sage, he was taming the wild beasts of the forest. (8)

**Hindi Translation:—**

बेलों के तन्तुओं से अपने बालों की जटा बांधकर और प्रत्यञ्चा चढ़ाये हुए धनुष को हाथ में लेकर वह राजा वन में इस प्रकार घूमने लगा मानों ऋषि की उस पवित्र गौ की रक्षा करने के बहाने वह वन के दुष्ट जीवों को शिक्षा दे रहा हो ॥८॥

**Sanskrit Commentary:—**

लताप्रतानोद्ग्रथितैः लतानां वल्लीनां प्रतानैः कुटिलतन्तुभिः, उद्ग्रथिताः उन्नमय्य संग्रथितास्तैः केशैः बालैः। (उपलक्षितः) इति शेषः। 'इत्थं भूतलक्षणे' इति तृतीया। 'वल्ली तु व्रततिर्लता।' इत्यमरः। 'चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः' इत्यप्यमरः। अधिज्यधन्वा ज्यामधिगतम् इति अधिज्यम् आरोपितमौर्वीकम्। 'मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः। धनुः चापं यस्य सः। आरोपितमौर्वीचापः। 'धनुषश्च' इत्यनङादेशः। स राजा। मुनिहोमधेनोः मुनेर्वशिष्ठस्य होमधेनोः यज्ञकर्मसाधयित्र्या गोः। होमस्य (होमार्थं) धेनुः इत्यत्र तादर्थ्ये षष्ठीसमासः। रक्षापदेशात् रक्षणव्याजात्। हेतौ पञ्चमी। 'व्याजोऽपदेशो लक्ष्यं च' इत्मरः। वन्यान् वने भवान्। दुष्टसत्वान् दुष्टजन्तून् व्याघ्रादीन् इत्यर्थः। 'द्रव्यासुव्यवसायेषु सत्वमस्त्री तु जन्तुषु' इत्मरः। विनेष्यन् इव शिक्षयन् इव। दावम् वनम्। 'वने च वनवह्नौ च दवो दाव इहेष्यते' इति

यादवः । विचचार बभ्राम । 'देशकालाध्वगन्तव्या कर्मसंज्ञाह्यकर्मणाम्' इति दावस्य कर्मत्वम् ।

**विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य ।**
**उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः ॥९॥**

**Prose Order:—**

विसृष्टपार्श्वानुचरस्य पाशभृता समस्य तस्य पार्श्वद्रुमाः उन्मदानाम् वयसाम् विरावैः आलोकशब्दम् उदीरयामासुः इव ।

**English Translation:—**

The trees on both the sides of the king, who had dismissed all his attendants and who was like Varuna (lit. the noose-holding god), seemed to utter, as it were, the cry of 'Victory to the king', by means of the twitter of gladdened birds. (9)

**Hindi Translation:—**

निकटवर्ती सेवकों को विदा कर देने वाले और (पाशधारी) वरुण के सदृश उस राजा के दोनों ओर के वृक्ष (ऊपर बैठे हुए) उन्मत्त पक्षियों के कलरव के द्वारा उसकी जय बोलते हुए प्रतीत हो रहे थे। ॥९॥

**Sanskrit Commentary:—**

विसृष्टपार्श्वानुचरस्य विसृष्टाः [परिहृताः] पार्श्वानुचराः पार्श्ववर्तिनो जनाः [सेवकाः] येन तस्य। पाशभृता वरुणेन समस्य तुल्यस्य। 'प्रचेता वरुणः पाशी' इत्यमरः। अनुभावोऽनेन सूचितः। तस्य राज्ञः। पार्श्वद्रुमाः पार्श्वयोः द्रुमाः (वृक्षाः)

पार्श्ववर्तिवृक्षा इत्यर्थः। [सप्तमीतत्पुरुषः]। उन्मदानाम् उत्कट-मदानाम् [प्रमुदितानामित्यर्थः]। वयसां खगानाम्। 'खग-बाल्यादिनोर्वयः' इत्यमरः। विरावैः शब्दैः। आलोकशब्दम् आलोकस्य [दर्शनस्य] शब्दं वाचकम् 'आलोकय' इतिशब्दम्। [अथवा 'जयजीव' इत्याद्यालोकशब्दम्]। जयशब्दमित्यर्थः। 'आलोको जयशब्दः स्यात्' इति विश्वः। 'आलोकस्तु पुमान् द्योते दर्शने वन्दिभाषणे' इति मेदिनी च। उदीरयामासुरिव [उच्चारयामासुरिव]। इत्युत्प्रेक्षा।

**Substance in Sanskrit:—**

प्रभावातिशयेन वरुणतुल्यस्य परिहृतनिकटवर्तिभृत्यवर्गस्य च तस्य राज्ञो वर्त्मनि उभयपार्श्वस्थितेषु सुखेनोपविष्टाः प्रमुदिताश्च पक्षिणो मधुरं कूजन्तिस्म। तेषां कलरवमाकर्ण्य 'वृक्षा राज्ञो दिलीपस्य जयशब्दमुच्चारयन्ति' इति प्रत्यभासत।

**मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानम्।**
**अवाकिरन् बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः ॥१०॥**

**Prose Order:—**

मरुत्प्रयुक्ताः च बाललताः आरात् अभिवर्तमानम् मरुत्सखाभम् अर्च्यम् तम् प्रसूनैः पौरकन्याः आचारलाजैः इव अवाकिरन्।

**English Translation:—**

The tender creepers stirred by the wind showered flowers upon him, when he, possessing the lustre like that of fire (lit. the friend of wind) and worthy of adoration, passed close (by them),

just as the maidens of the city scattered customary fried grains (of paddy). (10)

**Hindi Translation:—**

वायु के मित्र (अग्नि) के समान कान्ति वाले और पूजनीय उस राजा के समीप आने पर हवा से हिलती हुई छोटी छोटी लताओं ने उस पर इस प्रकार पुष्पों की वर्षा की जैसे नगर की कन्यायें आचारानुकूल (मांगलिक) खीलों की वर्षा करती थीं ॥१०॥

**Sanskrit Commentary:—**

मरुत्प्रयुक्ताः [मरुता] वायुना प्रयुक्ताः [प्रेरिताः]। बाललताः [मृदुवल्लयः]। आरात् समीपे। 'आराद्दूरसमीपयोः' इत्यमरः। अभिवर्तमानम् [विद्यमानम्]। मरुत्सखाभं मरुतो वायोः सखा मरुत्सखः अग्निः स इवाभातीति मरुत्सखाभस्तम् तथोक्तम्। 'आतश्चोपसर्गे' इति कप्रत्ययः। [अथवा मरुत्सखस्याग्नेः आभा इव आभा यस्य तम् वह्निसदृशदीप्तिम्। अथवा 'मरुतां देवानां सखा इन्द्रस्तत्तुल्या आभा तेजो यस्य तम् इन्द्रतुल्यकान्तिम्' इति वल्लभः]। अर्च्यं पूज्यम्। तं दिलीपम्। प्रसूनैः पुष्पैः। 'प्रसूनं पुष्पफलयोः' इत्मरः। पौरकन्या नागरिककुमार्यः। आचारलाजैः आचारस्य [आचारार्थं] लाजाः भर्जितव्रीहयः तैरिव। 'तादर्थ्ये षष्ठीसमासः। शिष्टोपचारार्थं माङ्गलिकलाजैरिव इत्यर्थः। अवाकिरन् तस्योपरि निक्षिप्तवत्य इत्यर्थः।

**Substance in Sanskrit:—**

यथा शिष्टोपचारपरिपालनार्थं नागरिककुमार्यो माङ्गलिक-

लाजान् प्राक्षिपन् तथैव वायुप्रकम्पिता वन्या मृदुलता अपि वह्नितुल्यदीप्तेः पूजार्हस्य समीपे च विद्यमानस्य तस्य राज्ञ उपरि पुष्पवृष्टिमकुर्वन् ।

**धनुर्भृतोऽप्यस्य दयार्द्रभावमाख्यातमन्तःकरणैर्विशंकैः ।**
**विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः॥११॥**

**Prose Order:—**

धनुर्भृतः अपि अस्य विशङ्कैः अन्तःकरणैः दयार्द्रभावम् (इति) आख्यातम् वपुः विलोकयन्त्यः हरिण्यः अक्ष्णाम् प्रकामविस्तारफलम् आपुः ।

**English Translation:—**

The female deer obtained the fruit of the wide expanse of their eyes as they looked at his body which inspite of his holding a bow was known (to them) by their hearts remaining fearless to be full of compassionate feelings. (11)

**Hindi Translation:—**

राजा के धनुप धारण किये रहने पर भी हिरनियों ने (अपने) भय रहित हृदय से उसके शरीर को दया से द्रवीभूत कोमल स्वभाव वाला जाना और उसे देखकर अपनी आंखों के बड़े होने का फल प्राप्त किया। ॥११॥

**Sanskrit Commentary:—**

धनुर्भृतोऽपि [कोदण्डधारिणोऽपि]। अस्य राज्ञः। एतेन भयसंभावना दर्शिता। तथापि विशङ्कैः [भयरहितैः] निर्भीकैरित्यर्थः। अन्तःकरणैः [चेतोभिः]। कर्तृभिः। दयार्द्रभावं

दयया कृपारसेन आर्द्रो [मृदुः] भावोऽभिप्रायो यस्य तम्। दयार्द्रभावं कृपालुस्वभावम्। तम् आख्यातम् (कथितम्)। दयार्द्रभावमेतदाख्यातमित्यर्थः। 'भावः स्वभावाभिप्रायचेष्टात्मजन्मसु' इत्यमरः। तथाविधं वपुः शरीरम्। 'गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः।' इत्यमरः। विलोकयन्त्यः पश्यन्त्यः। हरिण्यः मृग्यः। 'हरिणी स्यान्मृगी' इत्यमरः। अक्ष्णां लोचनानाम्। 'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी' इत्यमरः। प्रकामविस्तारफलं प्रकामश्चासौ विस्तार इति प्रकामविस्तारस्तस्य प्रकामविस्तारस्य अत्यन्तविशालतायाः। फलं लाभम्। आपुः प्राप्नुवन्। 'विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुञ्च' इति न्यायेन स्वान्तःकरणवृत्तिप्रामाण्यादेव विश्रब्धं ददृशुरित्यर्थः।

**Substance in Sanskrit:—**

यद्यपि सज्जीकृतकार्मुकत्वात्स राजा सर्वेषां जन्तूनां भयजनकोऽभूत् तथापि तमवलोक्य न कोऽपि जीवः स्वल्पमपि संत्रस्तः संजातः यतो मृग्योऽपि निर्भीकचित्तास्तस्य मनोज्ञं शरीरं चिरं विश्रब्धं दृष्ट्वाऽऽत्मनो नेत्राणां विशालतायाः साफल्यं मेनिरे न तास्ततः पलायिताः। एतेन ज्ञातं यत्स राजा नितान्तं कोमलचित्तः प्रशांतस्वभावश्चासीत्।

स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम्।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः॥१२॥

**Prose Order :—**

सः मारुतपूर्णरन्ध्रैः कूजद्भिः कीचकैः आपादितवंशकृत्यम् कुञ्जेषु वनदेवताभिः उच्चैः उद्गीयमानम् स्वम् यशः शुश्राव।

**English Translation:—**

He heard his glory sung loudly in the bowers by sylvan deities, where the bamboos, sounding as their holes were filled with wind, served, as it were, the purpose of flutes. (12)

**Hindi Translation:—**

बासों के छेदों में वायु के भरजाने से ध्वनि निकलने पर वे (मानों) वीणा का काम दे रहे थे और उन्हीं के साथ वन देवताओं के द्वारा कुञ्जों में ऊंचे स्वर से गाये जाने वाले अपने यश को वह राजा सुनता जाता था ॥१२॥

**Sanskrit Commentary:—**

स दिलीपः। मारुतपूर्णरन्ध्रैः मारुतेन वायुना पूर्णानि रन्ध्राणि छिद्राणि येषान्ते तैः। वायुपूरितछिद्रैरित्यर्थः। अतएव कूजद्भिः स्वनद्भिः। कीचकैः वेणुविशेषैः। 'वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः' इत्यमरः। आपादितवंशकृत्यम् आपादितं सम्पादितं वंशस्य सुषिरस्य कृत्यं कार्यं यस्मिन् कर्मणि तत्तथा। वंशः सुषिरवाद्यविशेषः। 'वंशादिकं तु सुषिरम्' इत्यमरः। कुञ्जेषु लतागृहेषु 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' इत्यमरः। वनदेवताभिः वनाधिष्ठातृदेवैः। उच्चैः उच्चस्वरेण। उद्गीयमानं स्वं यशः निजकीर्तिम्। शुश्राव श्रुतवान्।

**Substance in Sanskrit:—**

तस्मिन् वने कीचकनामानो ये वेणुविशेषा आसन् तेषां छिद्रेषु वायुना सम्पूरितेषु वीणासदृशध्वनिर्निससरत्। तानेव कीचकान् वीणास्थाने कृत्वा लताकुञ्जेषु सुखासीनैर्मङ्गलगाय-कैर्वनाधिष्ठातृदेवैस्तारस्वरेण नरपतेर्यशः समुदगीयत। तच्छ्रुत्वा स राजा परं सुखं लेभे।

**पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकम्पितपुष्पगन्धी।**
**तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे ॥१३॥**

**Prose Order:—**

गिरिनिर्झराणाम् तुषारैः पृक्तः अनोकहाकम्पितपुष्पगन्धी पवनः आतपक्लान्तम् अनातपत्रम् आचारपूतम् तम् सिषेवे।

**English Translation:—**

The breeze, charged with the spray of mountain streams and fragrant with the scent of flowers which were slightly shaken on the trees, attended upon him who was purified by his righteous conduct, who was without umbrela and who was (therefore) afflicted with the hot sun (13)

**Hindi Translation:—**

पर्वतों के झरनों की ठण्डी ठण्डी छींटों से भीगी हुई (अतएव शीतल) और वृक्षों पर कुछ कुछ हिलते हुए फूलों की गन्ध से भरी हुई (अतएव मन्द और सुगन्ध) समीर ने अपने सदाचार के कारण पवित्र और छत्र रहित (अतएव) धूप से

व्याकुल उस राजा की सेवा की ॥१३॥

Sanskrit Commentary:—

(गिरिनिर्झराणां) गिरिषु पर्वतेषु निर्झराणां वारिप्रवाहाणाम्। 'वारिप्रवाहो निर्झरो झरः' इत्यमरः। तुषारैः सीकरैः 'तुषारौ हिमसीकरौ' इति शाश्वतः। पृक्तः संपृक्तः (युक्त इति यावत्)। (अनोकहाकम्पितपुष्पगन्धी) अनसः शकटस्य अकं वेगं हन्तीति अनोकहः। (उपपदतत्पुरुषः)। अनोकहानां वृक्षाणामाकम्पितानि ईषत्कम्पितानि पुष्पाणि सुमनसः ('स्त्रियः सुमनसः पुष्पम्' इत्यमरः) तेषां यो गन्धः आमोदः सोऽस्यास्तीति आकम्पितपुष्पगन्धी। ईषत्कम्पितपुष्पगन्धवान्। एव शीतो मन्दः सुरभिश्च पवनः वायुः। अनातपत्रं व्रतार्थं परिहृतच्छत्रम्। अतएव आतपक्लान्तं परिश्रान्तम्। (आचारपूतम्) आचारेण सदाचारेण पूतम् (पवित्रम्) आचारपूतम् शुद्धम्। तं राजानम्। सिषेवे सेवितवान्। आचारपूतत्वात् स राजा जगत्पावनस्यापि सेव्य आसीदिति भावः। अत्र काव्यलिङ्गमलंकारः।

Substance in Sanskrit:—

व्रते स्थितत्वात् परिहृतच्छत्रः सदाचारपूतश्च नृपः वने घर्मेण परिश्रान्तः समजायत। अतस्तस्मिन् समये पर्वतवारिप्रवाहहिमसीकरैः शीतलः पुष्पाणां सुगन्धञ्चावहन् सुरभिर्मन्दश्च वायुस्तमसेवत।

**शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः।**
**ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने ॥१४॥**

**Prose Order:—**

गोप्तरि तस्मिन् वनम् गाहमाने वृष्टया विना अपि दवाग्निः शशाम, फलपुष्पवृद्धिः विशेषा आसीत् सत्त्वेषु अधिकः ऊनम् न बबाधे ।

**English Translation:—**

Soon as he, the protector (of his snbjects) entered the forest, the forest fire was quenched even without a shower; fruits and flowers grew in abundance and among the animals the stronger no longer molested the weaker. (14)

**Hindi Translation:—**

प्रजा की रक्षा करने वाले उस राजा के वन में प्रवेश करने पर वर्षा के बिना ही वन की अग्नि बुझ गई। फलों और फूलों की बड़ी वृद्धि होगई और पशुओं में भी अधिक बली (व्याघ्रादि) ने (अपने से) निर्बलों (हिरन आदि) को नहीं सताया ॥१४॥

**Sanskrit Commentary:—**

गोप्तरि रक्षके। तस्मिन् राज्ञि। वनम् अरण्यम्। गाहमाने प्रविशति सति। वृष्टया वर्षेण विनाऽपि। 'वृष्टिर्वर्षम्' इत्यमरः। दवाग्निः वनाग्निः। 'दवदावौ वनानलः' इति हैमः। शशाम अशाम्यत्। फलपुष्पवृद्धिः फलानां पुष्पाणां च वृद्धिः [फलपुष्पसमृद्धिः]। विशेषा विशेष्यते इति विशेषा अतिशयिता आसीत् अभूत्। कर्मार्थे घञ् प्रत्ययः। सत्त्वेषु जन्तुषु मध्ये। 'यतश्च निर्धारणम्।' इति सप्तमी अधिकः प्रबलो व्याघ्रादिः। ऊनं दुर्बलं हरिणादिकम्। न बबाधे न पीडयामास।

**Substance in Sanskrit:—**

प्रजारक्षके तस्मिन्नृपे वनं प्रविशति सत्येव तस्मिन् वने जलवर्षणेन विनापि दावाग्निः प्राशाम्यत्। फलानां पुष्पाणाञ्च महती समृद्धिरजायत। पशुष्वपि बलवन्तो व्याघ्रादय आत्मनो निर्बलतरान् हरिणादीन् जन्तून् न पीडयामासुः। एतादृशः खलु तस्य प्रभाव आसीत्।

सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम्।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः ॥१५॥

**Prose Order:—**

पल्लवरागताम्रा पतङ्गस्य प्रभा मुनेः च धेनुः दिगन्तराणि सञ्चारपूतानि कृत्वा दिनान्ते निलयाय गन्तुम् प्रचक्रमे।

**English Translation:—**

After purifying the regions between the quarters by their rambles, the light of the sun and the cow of the sage, (both) red like the colour of young leaves, started at the close of the day—the one to the setting mountain and the other to her house. (15)

**Hindi Translation:—**

अपने भ्रमण द्वारा दिशाओं के मध्य भागों को पवित्र करके, दिन समाप्त होने पर, नये पत्तों के रंग के समान लाल वर्ण वाली सूर्य की कान्ति और मुनि की गाय दोनों ही अपने अपने स्थान की ओर प्रस्थान करने लगीं ॥१५॥

**Sanskrit Commentary:—**

(पल्लवरागताम्रा) पल्लवस्य किसलयस्य रागो वर्णः पल्लवरागः स इव ताम्रा रक्तवर्णा पल्लवरागताम्रा। ['पल्लवोऽस्त्री किसलयम्' इत्यमरः] "रागोऽनुरक्तौ मात्सर्ये क्लेशादौ लोहितादिषु" इति शाश्वतः। प्रभा कान्तिः। मुनेः (ऋषेः) धेनुश्च। दिगन्तराणि दिशाम् (अन्तराणि) अवकाशान्। 'अन्तरमवकाशावधि-परिधानान्तर्धि भेदतादर्थ्ये' इत्यमरः। सञ्चारपूतानि सञ्चारेण भ्रमणेन पूतानि शुद्धानि कृत्वा विधाय। दिनान्ते सायङ्काले। निलयाय (गृहाय)। प्रभापक्षे अस्तमयाय। धेनुपक्षे आलयाय च गन्तुं यातुम। प्रचक्रमे प्रववृते।

**Substance in Sanskrit:—**

सायङ्काले भगवानंशुमालिः समस्तदिवसं स्वरश्मिभिः संसारं पवित्रीकृत्यास्ताचलं गतो मुनेर्वशिष्ठस्य धेनुर्नन्दिनी च वने स्वसञ्चरणैर्दिशामवकाशान् पूतान् विधाय स्वगृहं गन्तुं प्रववृते।

**तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः।**
**बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना ॥१६॥**

**Prose Order:—**

मध्यमलोकपालः देवतापित्रतिथिक्रियार्थाम् ताम् अन्वक् ययौ सताम् मतेन तेन (उपपन्ना) सा च (सतां मतेन) विधिना उपपन्ना साक्षात् श्रद्धा इव बभौ।

**English Translation:—**

He, the lord of the middle world followed her

who was the means of performing the (religious) rites of gods, manes and guests; and with him who was honoured by the good, she looked like faith incarnate accompained by the performance of (religious) act approved by the good. (16)

**Hindi Translation:—**

पृथ्वी का पालन करने वाले राजा दिलीप देवताओं, पितरों और अतिथियों के सत्कार का साधन जुटाने वाली उस नन्दिनी गौ के पीछे पीछे चल रहे थे। उस समय सज्जनों के द्वारा सम्मानित उस राजा के साथ नन्दिनी इस प्रकार सुशोभित हो रही थी जैसे शास्त्रसम्मत विधि से युक्त श्रद्धा शोभा पाती है ॥१६॥

*Sanskrit Commentary —*

मध्यमलोकपालो भूपालः। [मध्यमश्चासौ लोक इति मध्यमलोकः (भूलोकः) तस्य पालः रक्षकः]। [देवतापित्रतिथिक्रियार्थां देवताश्च पितरश्च अतिथयश्च इति देवतापित्रतिथयस्तेषां] देवतापित्रतिथीनां क्रिया यागश्राद्धदानानि ता एव अर्थः प्रयोजनं यस्याः (सा) ताम्। धेनुमन्वगनुपदम् 'अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम्' इत्यमरः। ययौ जगाम। सतां (सज्जनानाम्) मतेन (मान्येन) सद्भिर्मान्येन। "गतिबुद्धि" इत्यादिना वर्त्तमाने क्तः। 'क्तस्य च वर्तमाने' इति षष्ठी। तेन राज्ञा (नृपेण) उपपन्ना युक्ता सा धेनुः। सतां मतेन विधिनानुष्ठानेनोपपन्ना युक्ता साक्षात् प्रत्यक्षा श्रद्धाऽस्तिक्यबुद्धिरिव बभौ शुशुभे।

Substance in Sanskrit:—

स भूपालो महर्षियज्ञश्राद्धदानादिसत्कर्मणां दुग्धादिप्रदानेन साधयित्र्यास्तस्या नन्दिन्याः पदानुसरणमकरोत्। सद्भिः सम्मानितेन तेन नरपतिना सह सा धेनुस्तदा तथैव शोभामवाप यथा साधुजनानुमोदितेन शास्त्रानुकूलविधिना च समायुक्ता श्रद्धा शोभामवाप्नोति।

**स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि।**
**ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् ॥१७॥**

Prose Order:—

सः पल्वलोत्तीर्णवराहयूथानि आवासवृक्षोन्मुखबर्हिणानि मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् ययौ।

English Translation:—

He went on beholding the forests which were getting dark and in which the herds of wild boars were coming out of the pools, the peacocks were flying eagerly towards their wonted roosts and the deer were squatting on grassy plots. (17)

Hindi Translation:—

महाराजा दिलीप (सन्ध्या के कारण) श्याम होते हुए वन की शोभा देखते हुए जा रहे थे जहाँ बनैले शूकरों के झुण्ड के झुण्ड छोटे छोटे जलाशयों में से निकल रहे थे, मोर अपने बसेरे के वृक्षों की ओर उत्सुकता से उड़ते जा रहे थे और हिरन कोमल घास से आच्छादित भूमि पर बैठे हुए थे ॥१७॥

## Sanskrit Commentary:—

स राजा। [पल्वलोत्तीर्णवराहयूथानि] पल्वलेभ्योऽल्पजलाशयेभ्य उत्तीर्णानि निर्गतानि वराहाणां [वनशूकराणाम्] यूथानि कुलानि येषु तानि। 'वेशन्तः पल्वलं चाल्पसरः' इत्यमरः। 'वराहः सूकरो घृष्टिः' इत्यप्यमरः। [आवासवृक्षोन्मुखबर्हिणानि] बर्हाण्येषां सन्तीति बर्हिणा मयूराः। 'मयूरो बर्हिणो बर्ही' इत्यमरः। 'फलबर्हाभ्यामिनच्प्रत्ययो वक्तव्यः'। आवासस्य निवासस्य द्रुमा वृक्षा इति आवासवृक्षास्तेषाम्। उन्मुखाः [उत्सुकाः] बर्हिणा येषु तानि। श्यामायमानानि वराहबर्हिणादिमलिम्ना अश्यामानि श्यामानि भवन्तीति श्यामायमानानि [कृष्णायमानानि]। 'लोहितादिडाज्भ्यः क्यष्' इति क्यष् प्रत्ययः। 'वा क्यषः' इत्यात्मनेपदे शानच्। [मृगाध्यासितशाद्वलानि] मृगैर्हरिणैरध्यासिता अधिष्ठिताः शाद्वलाः [हरिततृणभूमयः] येषु तानि शादाः शष्पाण्येषु प्रदेशेषु सन्तीति शाद्वलाः शष्पश्यामदेशाः। 'शाद्वलः शादहरिते' इत्यमरः।' शादः कर्दमशष्पयोः' इति विश्वः। 'नडशादाड्ड्वलच्।' इति ड्वलच्प्रत्ययः। वनानि पश्यन्नवलोकयन् ययौ।

## Substance in Sanskrit:—

सन्ध्यासमये च स राजा प्रदोषतिमिरेण श्यामीभूताया वनस्थल्याः शोभां पश्यन्नाश्रमं प्रत्यावर्तत यत्र क्वचिद् जलाशयेभ्यः शतशः शूकरा निरगच्छन् मयूराः स्वावासद्रुमाभिमुखमुत्सका औड्डीयन्त, हरिणाश्च यत्र तत्र शष्पश्यामलप्रदेशेषु सुखेनोपविष्टा व्यश्राम्यन्।

आपीनभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः ।
उभावलंचक्रतुरञ्चिताभ्यां तपोवनावृत्तिपथं गताभ्याम् ॥१८॥

**Prose Order:** –

गृष्टिः नरेन्द्रः च उभौ (यथाक्रमम्) आपीनभारोद्वहनप्रयत्नात् वपुषः गुरुत्वात् च तपोवनावृत्तिपथम् अलञ्चक्रतुः ।

**English Translation:—**

The cow (that had calved but once) by her efforts to bear the burden of her udders, and the king by reason of the weight of his body, both adorned, with their graceful gaits, the way back to the penance grove. (18)

**Hindi Translation:—**

स्तनों का भार धारण करने के प्रयास से एक बार ही व्याही हुई नन्दिनी और शरीर के भारीपन से राजा दोनों ने ही अपनी सुन्दर चालों से तपोवन से लौटने के मार्ग को सुशोभित किया ॥१८॥

**Sanskrit Commentary:—**

गृष्टिः सकृत्प्रसूता गौः 'गृष्टिः सकृत्प्रसूता गौः' इति हलायुधः । नरेन्द्रश्च (दिलीपश्च) । उभौ (द्वावपि) यथाक्रमम् । [आपीन-भारोद्वहनप्रयत्नात्] आपीनमूधः । 'ऊधस्तु क्लीबमापीनम्' इत्यमरः । आपीनस्य भारोद्वहने प्रयत्नात्प्रयासात् । वपुषो (देहस्य) गुरुत्वादाधिक्याच्च । अञ्चिताभ्यां चारुभ्याम् । गताभ्यां गमनाभ्याम् । (तपोवनावृत्तिथं) तपोवनादावृत्तेः (प्रत्यागम-

नस्य) पन्थास्तं तपोवनावृत्तिपथम् (तपोवनप्रत्यागमनमार्गम्)। 'ऋक्पूरब्धूःपथामानक्षे' इति सूत्रेण समासान्तोऽप्रत्ययः। अलंचक्रतुर्भूषितवन्तौ।

Substance in Sanskrit:—

नन्दिनी स्वस्तनानां भारेण राजा च स्वशरीरस्य गुरुत्वादुभावपि मन्दं मन्दं जग्मतुः। तयोर्मनोज्ञया मन्दगत्या तपोवनमार्गस्य महती शोभाऽभूत्।

वसिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात्।
पपौ निमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्याम् ॥१९

Prose Order:—

वनिता निमेषालसपक्ष्मपंक्तिः (सती) वनान्तात् आवर्तमानम् वसिष्ठधेनोः अनुयायिनम् तम् उपोषिताभ्याम् (इव) लोचनाभ्याम् पपौ।

English Translation:—

And as he, the follower of Vasistha's cow returned from the forest-skirts, his wife, the rows of whose eyelashes were slow (even) in winking, drank him in (looked at him eagerly) with her eyes which had fasted (long) as it were. (19)

Hindi Translation:—

वशिष्ठ की गाय के पीछे पीछे चलने वाला वह राजा जैसे ही वन से लौटा वैसे ही निमेष करने में भी अलसाती हुई पलकों वाली उसकी प्रिय पत्नी (सुदक्षिणा) ने मानों (बहुत

दिनों से दर्शन न होने के कारण) उपासे नेत्रों से उसे पी लिया (बड़ी उत्सुकता से उसकी ओर देखा) ॥१६॥

Sanskrit Commentary:—
It is poetic fancy.

वशिष्ठधेनोः (नन्दिन्याः) अनुयायिनमनुचरम्। वनान्तादावर्तमानं प्रत्यागतं तं दिलीपम्। वनिता सुदक्षिणा। ['वनिता जनितात्यन्तानुरागायाञ्च योषिति' इत्यमरः।] [निमेषालसपक्ष्मपंक्तिः] निमेषेष्वलसा मन्दा पक्ष्मणां पंक्तिर्यस्याः सा। निर्निमेषा सतीत्यर्थः। लोचनाभ्यां (नेत्राभ्याम्) करणाभ्याम्। उपोषिताभ्यामिव। उपवासो भोजननिवृत्तिः। तद्वद्भ्यामिव। वसतेः कर्तरि क्तः। पपौ (पीतवती)। यथोपोषितोऽतितृष्णया जलमधिकं पिबति तद्वदतितृष्णयाधिकं व्यलोकयदित्यर्थः।

Substance in Sanskrit:—

नन्दिन्या सह वनात् प्रत्यागतं राजानं तस्य प्रियपत्नी सुदक्षिणाऽतितृष्णया चिरं व्यलोकयत्। दीर्घकालं यावत् तस्यादर्शनेन सात्यन्तमधीरासीत्। अत इदानीं राज्ञः कमनीयं रूपं विलोक्य तस्या लोचनयुगलं कथमपि तृप्तिं न लेभे यथा कश्चित्तृषाकुलो जनः कुत्रचित् शीतलं जलं लब्ध्वाधिकं पिबति पुनः पुनः पीत्वापि च शान्तिं नावाप्नोति।

पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या ॥२०॥

**Prose Order:—**

वर्त्मनि पार्थिवेन पुरस्कृता पार्थिवधर्मपत्न्या च प्रत्युद्गता सा धेनुः तदन्तरे दिनक्षपामध्यगता सन्ध्या इव विरराज ।

**English Translation:—**

Placed in front by the king on the way and welcomed back by his lawful consort, that cow, appeared between them, like the twilight coming between day and night. (20)

**Hindi Translation:—**

मार्ग में राजा से पुरस्कृत (आगे की हुई) और (लौटने पर) रानी के द्वारा (आगे बढ़ कर) स्वागत की हुई वह गाय उन दोनों के मध्य में इस प्रकार सुशोभित थी जैसे दिन और रात के बीच में सन्ध्या सुशोभित होती है ॥२०॥

**Sanskrit Commentary:—**

वर्त्मनि (मार्गे)। 'अनयनं वर्त्म मार्गाध्वपन्थान पदवी सृतिः' इत्यमरः। पार्थिवेन पृथिव्या ईश्वरेण। 'तस्येश्वरः' इत्यञ्प्रत्ययः। पुरस्कृताग्रत कृता (पार्थिवधर्मपत्न्या) धर्मस्य पत्नी धर्मपत्नी। धर्मार्थं पत्नीत्यर्थः। अश्वघासादिवत्तादर्थ्ये षष्ठी समासः। पार्थिवस्य धर्मपत्न्या प्रत्युद्गता (अभ्युद्गता) सा धेनुस्तदन्तरे तयोर्दम्पत्योर्मध्ये। (दिनक्षपामध्यगता) दिनक्षपयोः दिनरात्र्योर्मध्यगता संध्येव विरराज [शुशुभे]।

**Substance in Sanskrit:—**

राजा नन्दिनीं पुरस्कृत्याग्रतः [illegible]

किञ्चिद्दूरं गत्वा राज्ञी सुदक्षिणा तस्याः स्वागतं कृतवती। ततो नन्दिनी तयोर्दम्पत्योर्मध्ये गच्छन्ती तथा शोभामवाप यथा दिन-रजन्योर्मध्ये सन्ध्या शोभते।

प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता।
प्रणम्य चानर्च विशालमस्याः शृंगान्तरं द्वारमिवार्थसिद्धेः ॥२१॥

**Prose Order:—**

साक्षतपात्रहस्ता सुदक्षिणा पयस्विनीम् ताम् प्रदक्षिणीकृत्य प्रणम्य च अस्याः विशालम् शृङ्गान्तरम् अर्थसिद्धेः द्वारम् इव आनर्च।

**English Translation:—**

Then Sudaksina with a vessel of rice-grains in her hands, went round the cow that yielded good milk and bowing to her worshipped the wide space between her two horns (i.e. forehead) which was the door way, as it were, leading to the accomplishment of (her) object. (21)

**Hindi Translation:—**

सुदक्षिणा ने अक्षतयुक्त पात्र को हाथ में लेकर उत्तम दूध देने वाली उस गाय की प्रदक्षिणा की और उसे प्रणाम करके उसके विशाल मस्तक की इस प्रकार पूजा की मानो वह उसके मनोरथ की सिद्धि का द्वार हो ॥२१॥

**Sanskrit Commentary:—**

[अक्षतपात्रहस्ता] अक्षतानां पात्रेण सह वर्तते इति साक्षतपात्रौ हस्तौ (करौ) यस्याः सा सुदक्षिणा। पयस्विनी प्रशस्तक्षीराम्।

तां धेनुम्। प्रदक्षिणीकृत्य [परिक्रम्य]। प्रणम्य च। तस्या धेन्वाः। विशालं (दीर्घम्) शृङ्गान्तरं शृङ्गमध्यम् (मस्तकमिति यावत्)। अर्थसिद्धेः कार्यसिद्धेर्द्वारं प्रवेशमार्गमिव। आनर्चार्चयामास। अर्थतेर्भौवादिकाल्लिट्।

**Substance in Sanskrit:—**

आश्रम संप्राप्तायां नन्दिन्यां सुदक्षिणा पूजोपयोगिसामग्रीं पात्रे निधाय स्वहस्ते च तां गृहीत्वा पूर्वं तस्याः प्रदक्षिणामकरोत्। ततश्च ता प्रणम्य तस्या विशालमस्तकं स्वमनोरथसिद्धेर्द्वारमिवापूजयत्।

**वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननंदतुस्तौ।**
**भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरःफलानि ॥२२॥**

**Prose Order:—**

वत्सोत्सुका अपि सा स्तिमिता सपर्याम् प्रत्यग्रहीत् इति तौ ननन्दतुः। हि भक्त्या उपपन्नेषु तद्विधानाम् प्रसादचिह्नानि पुरःफलानि (भवन्ति)।

**English Translation:—**

They both were delighted to see that although eager for her calf, she yet stayed and accepted their worship; for verily the signs of favour of (venerable) beings of her type, manifested towards those who are filled with devotion (towards such as she) indicate the near accomplishment of their desired object. (22)

**Hindi Translation:—**

राजा और रानी यह देखकर प्रसन्न हुए कि नन्दिनी ने

बछड़े के लिये उत्कण्ठित होने पर भी निश्चल होकर (शांतिपूर्वक) उनकी पूजा ग्रहण की। क्योंकि नन्दिनी के समान महात्मा लोग भक्तियुक्त पुरुषों पर जो प्रसन्नता के चिह्न दिखलाते हैं वे शीघ्र ही फल देने वाले होते हैं ॥२२॥

**Sanskrit Commentary:**

सा धेनुः। वत्सोत्सुकापि वत्स उत्कण्ठिताऽपि। स्तिमिता निश्चला सती। सपर्यां पूजाम्। प्रत्यग्रहीत् (स्वीचकार)। इति हेतोस्तौ दम्पती। ननन्दतुः (मुमुदाते)। पूजास्वीकारस्यानन्द-हेतुत्वमाह—भक्त्येति। पूज्येष्वनुरागो भक्तिः। तयोपपन्नेषु युक्तेषु विषये। तद्विधानां तस्या धेन्वा विधेव विधा प्रकारो येषां तेषाम्। महतामित्यर्थः। प्रसादस्य (प्रसन्नतायाः)। चिह्नानि लिङ्गानि पूजास्वीकारादीनि। 'चिह्नं लक्ष्म च लक्षणम्' इत्यमरः। पुरःफलानि पुरोगतानि प्रत्यासन्नानि फलानि येषां तानि हि। अविलम्बितफलसूचकलिङ्गदर्शनादानन्दो युज्यते इत्यर्थः।

**Substance in Sanskrit:—**

दिनान्ते स्ववत्सं द्रष्टुमत्यन्तमुत्कण्ठिताऽपि सा नन्दिनी कञ्चित्कालं निश्चला सती सुदक्षिणायाः पूजां स्वीकरोतिस्म। एतदवलोक्य तौ दम्पती परमानन्दमवापतुः। यतो नन्दिनी-सदृशा महात्मानो यदा स्वभक्तजनेषु प्रसन्ना भवन्ति तदा 'भक्तानां मनोरथा अविलम्बेनैव सिद्धा भविष्यन्ति' इति ज्ञायते।

**गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च विधिं दिलीपः।**
**दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥२३॥**

**Prose Order:—**

भुजोच्छिन्नरिपुः दिलीपः सदारस्य गुरोः पादौ निपीड्य सांध्यम् विधिम् च समाप्य दोहावसाने निषरणाम् दोग्ध्रीम् पुनः एव भेजे ।

**English Translation:—**

After pressing the feet of his preceptor and his wife (Arundhati), and having finished his evening rites, the king, who had destroyed his enemies by (the prowess) of his arms, again waited upon the cow who had lain (on the ground) after the milking was over. (23)

**Hindi Translation:—**

गुरु ( वशिष्ठ ) और गुरुपत्नी ( अरुन्धती ) के चरणों की सेवा करके तथा सायङ्कालीन सन्ध्योपासनादि कर्म समाप्त करके अपनी भुजाओं के वल से शत्रुओं का नाश करने वाला वह राजा ( दूध ) दुहे जाने के पश्चात् (आराम से) बैठी हुई उस गाय की फिर सेवा करने लगा ॥ २३ ॥

**Sanskrit Commentary:—**

भुजोच्छिन्नरिपुः [ भुजाभ्यां बाहुभ्याम् उच्छिन्नाः विनाशिताः रिपवः शत्रवः येन सः ] दिलीपः । सदारस्य दारैररुन्धत्या सह वर्तमानस्य गुरोः ( वशिष्ठस्य ) । उभयोरपीत्यर्थः । 'भार्या जायाथ पुंभूम्नि दाराः' इत्यमरः । पादौ ( चरणौ ) निपीड्य ( सम्मर्द्य ) अभिवन्द्य । सान्ध्यं सध्यायां विहितम् । विधिमनुष्ठानम् । च समाप्य समाप्तं कृत्वा । दोहावसाने ( दोहस्य

दोहनस्य अवसाने अन्ते ) दोहनान्ते । निषण्णाम् ( सुखेन ) आसीनाम् । दोग्ध्रीं दोहनशीलाम् 'तृन्' इति तृन्प्रत्ययः । धेनुमेव ( नन्दिनीमेव ) । पुनः ( भूयोऽपि ) । भेजे सेवितवान् । दोग्ध्रीमिति निरुपपदप्रयोगात्कामधेनुत्वं गम्यते ।

**Substance in Sanskrit —**

नन्दिन्याः पूजानन्तरञ्च विजितशत्रुः स राजा गुरोर्वशिष्ठस्य तत्पत्न्या अरुन्धत्याश्च पादशुश्रूषामकरोत् । ततश्च सन्ध्योपासनादिकं सायङ्कालीनमनुष्ठानं विधाय दोहनान्ते सुखेनोपविष्टायाः पुनरपि तस्या धेन्वाः सेवायां प्रसक्तोऽभूत् ।

**तामन्तिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः ।**
**क्रमेण सुप्तामनुसंविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् ॥ २४ ॥**

**Prose Order:—**

गोप्ता गृहिणीसहायः ( सन् ) अन्तिकन्यस्तबलिप्रदीपाम् ताम् अन्वास्य क्रमेण सुप्ताम् अनु संविवेश सुप्तोत्थिताम् अनु उदतिष्ठत् ।

**English Translation:—**

The king with his wife as his companion, sitting close after her (the cow), near whom were placed religious offerings and evening lamps, went to sleep after she had gradually fallen asleep, and rose up in the morning, after she had risen from sleep. (24)

**Hindi Translation:—**

प्रजारक्षक वह राजा ( अपनी ) स्त्री सहित उस गाय के

समीप बलि (पूजा की सामग्री) और दीपक रखकर उसके पीछे बैठ गया और क्रम से उसके सो जाने पर स्वयं भी सोगया तथा प्रातःकाल उसके सोकर उठने पर आप भी जाग उठा ॥२४॥

**Sanskrit Commentary —**

गोप्ता रक्षकः। गृहिणीसहायः ( गृहिणी सहाया यस्य स. ) पत्नीद्वितीयः सन्। उभावपीत्यर्थः। अन्तकन्यस्तबलिप्रदीपाम् अन्तिके ( समीपे ) न्यस्ताः ( स्थापिताः ) बलयः प्रदीपाश्च यस्यास्तां तथोक्तां तां पूर्वोक्तां निषण्णां धेनुम्। अन्वास्यानूपविश्य। क्रमेण 'प्रकृत्यादिभ्य उपसंख्यानम्' इति तृतीया। सुप्तामन्वन्तरं संविवेश सुष्वाप। प्रातः सुप्तोत्थिताम् ( आदौ सुप्ता पश्चाद् उत्थिता इति सुप्तोत्थिता ताम्। स्नातानुलिप्तवत् समासः )। अनु ( पश्चात् )। उदतिष्ठदुत्थितवान्। अत्रानुशब्देन धेनुराजव्यापारयोः पौर्वापर्यमुच्यते क्रमशब्देन धेनुव्यापाराणामेवेत्यपौनरुक्त्यम्। "कर्मप्रवचनीये द्वितीया" इति द्वितीया।

**Substance in Sanskrit:—**

ततः सपत्नीकः स राजा सुखासीनायास्तस्या धेनोः समीपे पूजासामग्रीं प्रज्वलितदीपञ्च सन्निधाय तदन्तिके समुपाविशत्। किञ्चित्कालानन्तरञ्च सुप्तायां तस्यां स्वयमपि सुष्वाप। प्रभाते च तस्या उत्थानानन्तरं स्वयमप्युदस्थात्।

**इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः।**
**सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य ॥२५॥**

**Prose Order:—**

इत्थ प्रजार्थम् महिष्या समम् व्रतम् धारयतः महनीयकीर्तेः दीनोद्धरणोचितस्य तस्य सप्त त्रिगुणानि दिनानि व्यतीयुः ।

**English Translation:—**

Thus thrice-seven days (twentyone days) passed away, while he, of adorable fame and accustomed to relieve the distressed, was observing the vow with his queen for a progeny. (25)

**Hindi Translation:—**

इस प्रकार सन्तान की प्राप्ति के लिए रानी सहित गो-सेवा व्रत धारण करते हुए उस परमयशस्वी और दीनों की रक्षा करने में समर्थ राजा को इक्कीस दिन बीत गये ॥२५॥

**Sanskrit Commentary:—**

इत्थमनेन प्रकारेण । प्रजार्थं सन्तानाय । 'प्रजा स्यात् सन्ततौ-जने' इत्यमरः । महिष्या सममभिषिक्तपत्न्या सह 'कृताभिषेका महिषी' इत्यमरः । व्रतं (गोसेवारूपमनुष्ठानम्) धारयतः (पालयतः) महनीयकीर्तेः महनीया पूज्या कीर्तिर्यस्य तस्य । दीनोद्धरणोचितस्य दीनानामुद्धरणं दैन्यविमोचनं तत्रोचितस्य परिचितस्य । तस्य नृपस्य । त्रिगुणानि त्रयो गुणा आवृत्तयो येषां तानि त्रिगुणानि त्रिरावृत्तानि सप्तदिनान्येकविंशति दिनानि व्यतीयुः (व्यतीतानि) ।

**Substance in Sanskrit:—**

एवं सन्तानलाभाय महिष्या समं गो-सेवारूपं व्रतं पालयतः

पुण्यकीर्तेर्दीनवत्सलस्य च तस्य नरपतेरेकविंशति दिनानि व्यतीतानि ।

**अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ।**
**गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ॥२६॥**

**Prose Order:—**

अन्येद्युः मुनिहोमधेनुः आत्मानुचरस्य भावम् जिज्ञासमाना गंगाप्रपातान्तविरूढशष्पम् गौरीगुरोः गह्वरम् आविवेश ।

**English Translation:—**

The next day, the sacrificial cow of the sage, wishing to test the devotion of her attendant, entered a cave of the Himalaya (lit. Gauri's father), where near a fall of the Ganges, tender grass had *grown. (26)*

**Hindi Translation:—**

दूसरे दिन अपने सेवक दिलीप के अभिप्राय को जानने की इच्छा से मुनि की वह गाय गङ्गा के झरने के समीप हिमालय की एक गुफा में घुस गई जहाँ हरी हरी नई दूब उग रही थी ॥२६॥

**Sanskrit Commentary:—**

अन्येद्युरन्यस्मिन् दिने द्वाविंशे दिने । 'सद्यःपरुत्परारि' इत्यादिना निपातनादव्ययम् । [वार्तिककारमते तु 'पूर्वादिभ्योऽष्टभ्योऽहन्येद्युसुच्' इतिवार्तिकेन अन्यशब्दात् अहनि एद्युसुच् प्रत्ययः] । 'अद्यात्राह्नाय पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात् । तथाऽ-

धरान्यान्यतरेतरात्पूर्वेद्युरादयः' इत्यमरः। मुनिहोमधेनुः (नन्दिनी)। आत्मानुचरस्य (स्वसेवकस्य दिलीपस्य)। भावमभिप्रायं दृढभक्तित्वम्। 'भावोऽभिप्राय आशयः' इति यादवः। जिज्ञासमाना ज्ञातुमिच्छन्ती। 'ज्ञाश्रुस्मृदृशां सनः' इत्यात्मनेपदे शानच्। गङ्गाप्रपातान्तविरूढशष्पम् प्रपतत्यस्मिन्निति प्रपातः पतनप्रदेशः। गङ्गायाः प्रपातस्तस्यान्ते समीपे विरूढानि जातानि शष्पाणि बालतृणानि यस्मिस्तत्। 'शष्पं बालतृणं घासः' इत्यमरः। गौरीगुरोः पार्वतीपितुर्हिमालयस्य 'गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे' इति विश्वः। गह्वरं गुहामाविशेश (प्राविशत्)।

Substance in Sanskrit:—

द्वाविंशे दिने 'शुद्धचेतसाऽयं मां समाराधयति नवेति' स्वसेवकस्य राज्ञो दिलीपस्य मनोभावं जिज्ञासमाना सा धेनुर्गङ्गाप्रपातस्य समीपवर्तिनीं प्ररूढशष्पां हिमालयस्य काञ्चिद्गुहां प्राविशत्।

**सा दुष्प्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन।**
**अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ॥२७॥**

Prose Order:—

सा हिंस्रैः मनसा अपि दुष्प्रधर्षा इति अद्रिशोभाप्रहितेक्षणेन नृपेण अलक्षिताभ्युत्पतनः सिंहः ताम् प्रसह्य चकर्ष किल।

English Translation:—

While the king, thinking that she was difficult

to be assaulted by any ravenous beast, had fixed (lit. cast) his eyes on the beauty of the mountain, a lion, whose spring, it is said, was not noticed (by him) seized her forcibly. (27)

**Hindi Translation:—**

हिंसक जीव नन्दिनी पर मन से भी आक्रमण नहीं कर सकते यह सोच कर महाराज दिलीप जब पर्वत की शोभा पर अपनी दृष्टि लगाये हुए थे तभी एक सिंह, जिसका आक्रमण राजा न देख सके, उस गाय को बलपूर्वक खींच ले गया ॥२७॥

**Sanskrit Commentary:—**

सा धेनुः। हिंस्रैर्व्याघ्रादिभिः। मनसाऽपि दुष्प्रधर्षा (दुःखेन धर्षितुं योग्या)। दुर्धर्षेति हेतोरद्रिशोभायां (पर्वतशोभायाम्) प्रहितेक्षणेन (दत्तदृष्टिना) नृपेण (राज्ञा)। अलक्षिताभ्युत्पतनः— अलक्षितमभ्युत्पतनमाभिमुख्येनोत्पतनं यस्य स सिंहस्तां धेनुं प्रसह्य हठात्। 'प्रसह्यस्तु हठार्थकम्'। इत्यमरः। चकर्ष (आकृष्टवान्)।

**Substance in Sanskrit:—**

कामधेनोः सुतात्वान्महाप्रभावां नन्दिनीं व्याघ्रादयो हिंसकजन्तवो मनसाऽप्याक्रमितुं न क्षमाः किमुत कायेत इति सम्यगवधार्य निश्चिन्तमनाः स राजा यदा गिरिराजहिमालयस्य शोभावलोकने दत्तदृष्टिरभूत् तस्मिन्नेवान्तरे कश्चित् सिंहः सहसाक्रम्य तां धेनुं बलादाकृष्टवान्। राजा च तस्याक्रमणं द्रष्टुं नाशक्नोत्।

तदीयमाक्रन्दितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घम्।
रश्मिष्विवादाय नगेन्द्रसक्तां निवर्तयामास नृपस्य दृष्टिम् ॥२८॥

**Prose Order:—**

गुहानिबद्धप्रतिशब्ददीर्घम् तदीयम् आक्रन्दितम् आर्तसाधोः नृपस्य नगेन्द्रसक्ताम् दृष्टिम् रश्मिषु आदाय इव निवर्तयामास ।

**English Translation:—**

Then her distressed cry rendered louder owing to its reverberation in the cave, drew back, as it was rivetted on the mountain, the sight of the king, who was kind to the distressed, by holding it in reins as if. (28)

**Hindi Translation:—**

तब गुफा के भीतर गूंज उठने से बढ़े हुए गौ के आर्तक्रन्दन ने पर्वतराज हिमालय की शोभा में आसक्त राजा की दृष्टि को अपनी ओर इस प्रकार लौटा लिया मानो उसे डोरी से बांध कर खींच लिया हो ॥२८॥

**Sanskrit Commentary:—**

गुहानिबद्धप्रतिशब्ददीर्घम्। गुहानिबद्धेन प्रतिशब्देन प्रतिध्वनिना ) दीर्घम् ( वृद्धिं गतम् ) । तस्या इदं तदीयम् । आक्रन्दितमार्तघोषणम् । आर्तसाधोः—आर्तेष्वापन्नेषु साधोर्हितकारिणो नृपस्य ( राज्ञो दिलीपस्य ) । नगेन्द्रसक्ताम् ( हिमाचलसंलग्नाम् ) दृष्टिम् । रश्मिषु प्रग्रहेषु 'किरणप्रग्रहौ रश्मी' इत्यमरः । आदायेव गृहीत्वेव । निवर्तयामास ।

**Substance in Sanskrit:—**

नन्दिनी सिंहेनाक्रान्ता सती महान्तमार्तनादमकरोत् । स च

गुहान्तःप्रतिध्वनितत्वात्परां वृद्धिं गतः । तमाकर्ण्य पर्वतराज-हिमालयस्य शोभायाः समवलोकने संलग्ना राज्ञो दृष्टी रश्मिभिराकृष्यमाणेव ततो निवर्तयामास ।

**स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श ।**
**अधित्यकायामिव धातुमय्यां लोध्रद्रुमः सानुमतः प्रफुल्लम् ॥२९॥**

**Prose Order:—**

धनुर्धरः सः पाटलायाम् गवि तस्थिवांसम् केसरिणम् सानुमतः धातुमय्याम् अधित्यकायाम् प्रफुल्लम् लोध्रद्रुमम् इव ददर्श ।

**English Translation:—**

The archer saw the lion sitting upon the ruddy cow like a full-blossomed Lodhra tree on a mountain upland rich in red minerals. (29)

**Hindi Translation:—**

उस धनुर्धारी राजा ने लाल रंग की गाय के ऊपर बैठे हुए ( बड़े २ बालों वाले ) सिंह को गेरू से परिपूर्ण पहाड़ की ऊर्ध्व भूमि के ऊपर फूले हुए लोध्र नामक वृक्ष के समान देखा ॥२९॥

**Sanskrit Commentary:—**

धनुर्धरः स नृपः । पाटलायां रक्तवर्णायाम् ('श्वेतरक्तस्तुपाटलः' इत्यमरः ) । गवि धेनौ । तस्थिवांसं स्थितम् । 'क्वसुश्च' इति क्वसुप्रत्ययः । केसरिणं सिंहम् । ('सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः' इत्यमरः ) । (सानूनि प्रस्थानि सन्ति अस्य इति सानुमान् पर्वतः तस्य । ( 'स्नुः प्रस्थः सानुरस्त्रियाम्' इत्यमरः ) सानुमतोऽद्रेः धातुमय्यां धातोर्गैरिकस्य विकारो धातुमयी तस्याम् ।

अधित्यकायामूर्ध्वभूमौ 'उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका' इत्यमरः। 'उपाधिभ्यां त्यकन्नासन्नारूढयोः' इति त्यकन्प्रत्ययः। प्रफुल्लो विकसितस्तम्। 'फुल्ल विकसने' इति धातोः पचाद्यच्। प्रफुल्तम् इति तकारपाठे—'ञिफला विशरणे' इति धातोः कर्तरि क्तः। 'उत्परस्यात' इत्युकारादेशः। लोध्रद्रुममिव लोध्राख्यं द्रुममिव ददर्श (अपश्यत्)।

**Substance in Sanskrit:—**

दृष्टिनिवर्तनानन्तरं धनुर्धारी स राजा रक्तवर्णाया नन्दिन्या उपरि स्थितमेकं सटाधारिणं सिंहमद्राक्षीत्। स च सिंहो धेन्वा उपरि स्थितो गैरिकमय्यां पर्वतोर्ध्वभूमौ प्रफुल्लो लोध्रवृक्ष इवाशोभत।

**ततो मृगेन्द्रस्य मृगेन्द्रगामी, वधाय वध्यस्य शरं शरण्यः।**
**जाताभिषंगो नृपतिर्निषंगादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः ॥३०॥**

**Prose Order:—**

ततः मृगेन्द्रगामी शरण्यः प्रसभोद्धृतारिः जाताभिषङ्गः नृपतिः वध्यस्य मृगेन्द्रस्य वधाय निषङ्गात् शरणम् उद्धर्तुम् ऐच्छत्।

**English Translation:—**

Then the king, who had the gaif of a lion, who was a refuge to the distressed and who had vanquished his enemies by force, feeling humiliated, desired to take out an arrow from his quiver to kill the lion who deserved to be killed. (30)

**Hindi Translation:—**

तब सिंह की तरह चलने वाले शरणागतवत्सल और बल

पूर्वक शत्रुओं का नाश करने वाले उस राजा ने (सिंह से इस प्रकार) तिरस्कार पाकर वध करने योग्य उस शेर को मारने के लिये (अपने) तरकश से बाण निकालने की इच्छा की ॥३०॥

Sanskrit Commentary: -

ततः सिंहदर्शनानन्तरम्। मृगेन्द्रगामी सिंहगामी। (मृगेन्द्रवत् गन्तुं शीलं यस्येति मृगेन्द्रगामी 'ताच्छील्ये णिनिः' इति णिनि-प्रत्ययः)। शरण्यं शरणरक्षणं 'शरणं गृहरक्षित्रोः' इत्यमरः। 'शरणं रक्षणे गृहे' इतियादवः। शरणे साधुः शरण्यः 'तत्रसाधुः' इति यत्प्रत्ययः। प्रसभोद्धृतारिः प्रसभेन बलात्कारेण उद्धृताः (विनाशिताः) अरयः (रिपवः) येन स नृपतिः राजा। जाताभिषङ्गः जातपराभवः सन्। 'अभिषङ्गः पराभवः' इत्यमरः। वध्यस्य वधार्हस्य (मारणीयस्य) 'दण्डादिभ्यो यः' इति यप्रत्ययः। मृगेन्द्रस्य (सिंहस्य) वधाय (मारणाय)। निषङ्गात्तूणीरात्। 'तूणी-पासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः।' इत्यमरः। शरम् (बाणम्)। उद्धर्तुम् (निस्सारयितुम्)। ऐच्छत् (इयेष)।

Substance in Sanskrit:—

'पूज्यां नन्दिनीमित्थमाक्रम्य दुष्टोऽसौ सिंहो ममावमानना-मकरोत्। अतोऽयमवश्यं मया मारणीयः' इत्यवधार्य शत्रुञ्जयः शरणागतवत्सलश्च स राजा तस्य वधार्थं तूणीराद्बाणमुद्धर्तुमियेष।

वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकङ्कपत्रे।
सक्ताङ्गुलिः सायकपुङ्ख एव चित्रार्पितारम्भ इवावतस्थे॥३१॥

**Prose Order:—**

प्रहर्तुः तस्य वामेतरः करः नखप्रभाभूषितकङ्कपत्रे सायकपुङ्खे एव सक्तांगुलिः चित्रार्पितारम्भ इव अवतस्थे ।

**English Translation:—**

The right hand of the striker (Dilipa) with its fingers cleaved to the end of the arrow, the heron-feathers attached to which were decorated by the gleam of its nails, remained (still) as if its activity was portrayed in a picture. (31)

**Hindi Translation:—**

प्रहार करने वाले राजा का दाहिना हाथ, नखूनों की कान्ति से सुशोभित कङ्कपत्र वाले बाण की पूंछ में उंगलियों के चिपक जाने से ऐसा प्रतीत होता था मानो उसका ( बाण निकालने का ) व्यापार चित्र में लिख दिया गया हो ॥३१॥

**Sanskrit Commentary: —**

प्रहर्तुस्तस्य नृपस्य । वामेतरो दक्षिणः करः । नखप्रभाभूषितकङ्कपत्रे नखप्रभाभिर्विभूषितानि विच्छुरितानि कङ्कस्य पक्षिविशेषस्य पत्राणि यस्य तस्मिन् । 'कङ्कः पक्षिविशेषे स्याद्गुप्ताकारे युधिष्ठिरे' इति विश्वः । 'कङ्कस्तु कर्कटः' इति यादवः । सक्ताङ्गुलिः ( लग्नाङ्गुलिः ) सन् । चित्रार्पितारम्भश्चित्रलिखितशरोद्धरणोद्योग इव । अवतस्थे ( स्थितः ) ।

**Substance in Sanskrit:—**

सिंह प्रहर्तुमिच्छया महाराजो दिलीपो निषङ्गाद्बाणमुद्धर्तुं

यदा स्वदक्षिणकरं बाणपुङ्खे न्यवेशयत्तदा तस्य नखप्रभाभिर्विच्छुरितानां शरपुङ्खलग्नानां कङ्कपत्राणां महती शोभाभूत्। तस्य हस्ताङ्गुलयश्च तत्रैव दृढ संसक्ता अभूवन्। एवंभूतश्च स करशरोद्धरणव्यापारे चित्रलिखित इव निष्फलः सञ्जातः।

**बाहुप्रतिष्टम्भविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः।**
**राजा स्वतेजोभिरदह्यतान्तर्भोगीव मन्त्रौषधिरुद्धवीर्यः ॥३२॥**

**Prose Order:—**

बाहुप्रतिष्टम्भ विवृद्धमन्युः राजा अभ्यर्णम् आगस्कृतम् अस्पृशद्भिः स्वतेजोभिः मन्त्रौषधिरुद्धवीर्यः सर्प इव अन्त. अदह्यत।

**English Translation:—**

The king, highly enraged on account his arm being restrained, burnt within him with her own fiery energy which could not touch the offender though so very near, like a serpent who is rendered powerless by means of some spell and herb, (32)

**Hindi Translation:—**

भुजाओं के ( इस प्रकार ) स्तम्भित हो जाने से राजा अत्यन्त क्रुद्ध हुआ और अपराधी ( सिंह ) को सामने पाकर भी उसे स्पर्श न करने वाले अपने तेज से वह भीतर ही भीतर इस प्रकार जलने लगा जैसे मन्त्र और औषधियों के प्रभाव से अवरुद्ध शक्ति वाला सर्प क्रोध से जल उठता है ॥ ३२ ॥

**Sanskrit Commentary:—**

( बाहुप्रतिष्टम्भविवृद्धमन्युः ) बाह्वोः ( भुजयोः ) प्रतिष्टम्भेन

प्रतिबन्धेन 'प्रतिबन्धः प्रतिष्टम्भः' इत्यमरः । विवृद्धमन्युः ( विवृद्धो मन्युर्यस्य सः ) प्रवृद्धरोषो राजा । ( मन्त्रौषधिरुद्धवीर्यः ) मन्त्रौषधिभ्यां रुद्धवीर्यः प्रतिबद्धशक्तिर्भोगी सर्प इव । 'भोगी राजभुजंगयोः । इति शाश्वतः । अभ्यर्णमन्तिकम् । 'उपकंठान्तिकाभ्यर्णाभ्यग्रामप्यभितोऽव्ययम्' इत्यमरः । आगस्कृतमपराधकारिणम् । अस्पृशद्भिः ( अप्रहरद्भिः ) स्वतेजोभिः । अन्तः ( हृदि ) । अदह्यत । 'अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपि' इति यादवः ।

Substance in Sanskrit:—

इत्थं भुजयोरवरोधेन प्रवृद्धरोषः स नृपो यदा समीपे स्थितमप्यपराधकारिणं सिंहं प्रहर्तुं न शशाक तदा मन्त्रौषधिप्रयोगेण रुद्धशक्तितया सम्मुखं स्थितमप्याघातकारिणं जनं प्रहर्तुमशक्तः सर्प इव स्वक्रोधाग्निना हृन्मध्य अदह्यत ।

**तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम् ।**
**विस्माययन्विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः॥३३॥**

Prose Order:—

निगृहीतधेनुः सिंहः आर्यगृह्यम् मनुवंशकेतुम् सिंहोरुसत्त्वम् आत्मवृत्तौ विस्मितम् तम् मनुष्यवाचा विस्माययन् इव जगाद ।

English Translation:—

The lion, who had seized the cow (now) spoke to him in human voice thus astonishing him who was already astonished at his own state, who was the friend of the noble, who was the foremost

banner) of Manu's race and who possessed the prowess of a lion. (33)

**Hindi Translation:—**

तब सिंह ने सत्पुरुषों के द्वारा सम्मानित, मनुवंश की पताका रूप तथा सिंह के सदृश पराक्रमी और अपनी दशा पर पहिले से ही आश्चर्य में पड़े हुये उस राजा को और भी आश्चर्य में डालते हुए, मनुष्य की बोली में उससे कहा ॥३३॥

**Sanskrit Commentary:—**[1]

( निगृहीतधेनुः ) निगृहीता पीडिता धेनुर्येन स सिंहः । ( आर्यगृह्यम् ) आर्याणां सतां गृह्यं पक्ष्यम् । 'पदास्वैरिबाह्या-पक्ष्येषु च' इति क्यप् । ( मनुवंशकेतुम् ) मनुवंशस्य केतुं चिह्नं केतुवद्व्यावर्तकम् । ( सिंहोरुसत्वः ) सिंह इवोरुसत्वो महा-बलस्तम् । ( आत्मवृत्तौ ) आत्मनो वृत्तौ बाहुस्तम्भरूपे व्यापारे-ऽभूतपूर्वत्वाद्विस्मितम् । कर्तरि क्तः । तं दिलीपम् । मनुष्यवाचा करणेन । पुनर्विस्मापयन् विस्मयमाश्चर्यं प्रापयन्निजगाद (अवोचत्) । 'स्मिङ् ईषद्धसने' इति धातोर्णिचि वृद्धावायादेशे शतृप्रत्यये च सति विस्माययन्निति रूपं सिद्धम् । 'विस्मापयन्' इति पाठे पुगा-गममात्रं वक्तव्यम् । तच्च 'नित्यं स्मयतेः' इति हेतुभयवि-वक्षायामेवेति 'भीस्म्योर्हेतुभये' इत्यात्मने पदे विस्मापयमान इति स्यात् । तस्मान्मनुष्यवाचा विस्माययन्निति रूपं सिद्धम् । करण-विवक्षायां न कश्चिद्दोषः ।

**Substance in Sanskrit:—**

मनुकुलशिरोमणिं सतामपि सम्मतं स्वभुजयोः प्रतिबन्धेन

विस्मितं राजानं दृष्ट्वा स सिंहो मनुष्य इव स्पष्टाक्षरां गिर-
मुदीरयन्तमत्यन्तं विस्मयं प्रापयामास ।

**अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।**
**न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य ॥३४॥**

**Prose Order:—**

( हे ) महीपाल तव श्रमेण अलम्, इतः प्रयुक्तम् अपि अस्त्रम् वृथा स्यात् । हि पादपोन्मूलनशक्ति मारुतस्य रंहः शिलोच्चये न मूर्च्छति ।

**English Translation:—**

Enough of your exertions, O king ! Vain will be your weapon though hurled at me, for the force of the wind which has the power to uproot trees, has no effect upon a mountain. (34)

**Hindi Translation:—**

हे राजन् ! तुम्हारा परिश्रम करना वृथा है क्योंकि मुझपर फेंका हुआ अस्त्र विफल ही होगा । वायु का वेग वृक्षों को उखाड़ कर फेंकने में समर्थ होने पर भी पर्वतों पर कुछ भी प्रभाव नहीं डाल सकता ॥ ३४ ॥

**Sanskrit Commentary:—**

हे महीपाल ! तव श्रमेणालम् । साध्याभावाच्छ्रमो न कर्तव्यः । अत्र गम्यमानसाधनक्रियापेक्षया श्रमस्य करणत्वात्तृतीया । उक्तञ्च न्यासोद्योते—'न केवलं श्रूयमाणैव क्रिया निमित्तं करण-भावस्य अपि तर्हि गम्यमानापि' इति । 'अलं भूषणपर्याप्ति-

शक्तिवारणवाचकम्' इत्यमरः। इतोऽस्मिन् मयि। सार्वविभक्तिकस्तसिः। प्रयुक्तमप्यस्त्रं वृथा स्यात्। तथाहि। पादपोन्मूलने शक्तिर्यस्य तत्तथोक्तं मारुतस्य रंहो वेगः शिलोच्चये पर्वते न मूर्च्छति न प्रसरति।

**Substance in Sanskrit:** –

हे राजन्! न खलु त्वया मां प्रहर्तुं वृथापरिश्रमो विधेयः। यतो मयि प्रक्षिप्तमप्यस्त्रं विफलं भविष्यति। वृक्षोत्पाटने समर्थोऽपि वायोर्वेगः पर्वतानुन्मूलयितुं न क्षमः। एवं भवानपि मां प्रहर्तुं सर्वथाऽसमर्थोऽसि।

**कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम्।**
**अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम् ॥३५॥**

**Prose Order:**—

कैलासगौरम् वृषम् आरुरुक्षोः अष्टमूर्तेः पादार्पणानुग्रहपूतपृष्ठम् निकुम्भमित्रम् कुम्भोदरम् नाम किङ्करम् माम् अवेहि।

**English Translation:**—

Know me to be an attendant of the eight-formed god (Siva), a friend of Nikumbha and Kumbhodara by name, whose back is sanctified by the favour of placing his (Siva's) foot upon it whenever he wishes to mount his bull that is white like the Kailasa (mountain). (35)

**Hindi Translation:**—

मुझे निकुम्भ का मित्र और अष्टमूर्ति (भगवान शिव) का

कुम्भोदर नाम वाला सेवक समझो जिसकी पीठ कैलाश (पर्वत) के समान श्वेत-वर्ण के बैल की पीठ पर चढ़ने की इच्छा करने वाले (शिवजी) के पैर रखने की कृपा से पवित्र होगई है ॥३५॥

**Sanskrit Commentary:—**

कैलास इव गौरः शुभ्रस्तम् [कैलासगौरम्]। 'चामीकरं च शुभ्रंच गौरमाहुर्मनीषिणः' इति शाश्वतः। वृषं वृषभम्। आरुरुक्षोः आरोढुमिच्छोः। स्वस्योपरि पदं निक्षिप्य वृषभमारोहतीत्यर्थः। अष्टौ मूर्तयो यस्य स तस्याष्टमूर्तेः शिवस्य। पादार्पणं पादन्यासस्तदेवानुग्रहः प्रसादस्तेन पूतं पृष्ठं यस्य तं तथोक्तम् (पादार्पणानुग्रहपूतपृष्ठम्)। निकुम्भमित्रं कुम्भोदरं नाम किंकरं (सेवकम्)। माम् अवेहि विद्धि। 'पृथ्वी सलिलं तेजो वायुराकाशमेव च। सूर्याचन्द्रमसौ सोमयाजी चेत्यष्टमूर्तयः इति यादवः। ['निकुम्भो नाम पार्वतीसिंहः' इति वल्लभः]।

**Substance in Sanskrit:—**

भो राजन्! पश्यतु भवान् यदहं निकुम्भस्य मित्रं भगवतो महादेवस्य च परमकृपाभाजनं कुम्भोदरनामा भृत्योऽस्मि यस्य पृष्ठं भगवच्चरणस्पर्शेन पवित्रीभूतं यतः कैलासवच्छुभ्रवर्णं स्ववृषभमारोढुमिच्छुः स भगवान् महादेवः पूर्वं मम पृष्ठ एव स्वचरणं निधाय पश्चाद् वृषभमारोहति।

**अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन।**
**यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः॥३६॥**

**Prose Order:—**

पुरः असुम् देवदारुम् पश्यसि असौ वृषभध्वजेन पुत्रीकृतः यः

स्कन्दस्य मातुः हेमकुम्भस्तननिःसृतानाम् पयसाम् रसज्ञः ।

**English Translation:—**

Do you see the Devadaru tree before you ? It has been adopted as a son by Siva (the bull-bannered God) and it has tasted the water poured by the mother of Skanda from the golden jars resembling her breasts. (36)

**Hindi Translation:—**

तुम सामने यह जो देवदारु का वृक्ष देखते हो इसे भगवान् महादेव ने अपना पुत्र जैसा मान रक्खा है और इसने स्वामि कार्तिकेय की माता ( पार्वती के ) स्तन सदृश सुवर्ण कलशों के जल का आस्वादन किया है ॥ ३६ ॥

**Sanskrit Commentary:—**

पुरः अग्रतः । अमुं देवदारुं पश्यसि । इति काकुः । असौ देवदारुः । वृषभध्वजेन वृषभो ध्वजे यस्य स तेन शिवेन । पुत्रीकृतः पुत्रत्वेन स्वीकृतः । ( अपुत्रः पुत्रः सम्पद्यमानः कृत इति पुत्रीकृतः ) । 'अभूततद्भावे च्विः' । यो देवदारुः । स्कन्दस्य ( कार्तिकेयस्य ) मातुर्गौर्याः । ( हेमकुम्भस्तननिःसृतानाम् ) हेम्नः कुम्भ एव स्तनस्तस्मान्निःसृतानाम् । पयसामम्बूनाम् रसज्ञः स्वादज्ञः । स्कन्दपक्षे हेमकुम्भ इव स्तन इति विग्रहः । पयसां क्षीराणाम् । 'पयः क्षीरं पयोम्बु च' इत्यमरः । स्कन्द-समानप्रेमास्पदमित्यर्थः ।

**Substance in Sanskrit:—**

अयं देवदारुवृक्षो योऽयं त्वया पुरतोऽवलोक्यते भगवता

महादेवेन पुत्रत्वेन स्वीकृतः पार्वती चैनं हेमघटाम्बुभिस्तथा पर्यषिञ्चत् यथा सा स्वपुत्रं कार्तिकेयं स्वस्तनक्षीरेण पुपोष।

**कंडूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य।**
**अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥३७॥**

**Prose Order:—**

कदाचित् कटम् कण्डूयमानेन वन्यद्विपेन अस्य त्वक् उन्मथिता। अथ अद्रेः तनया असुरास्त्रैः आलीढम् सेनान्यम् इव एनम् शुशोच।

**English Translation:—**

Once a wild elephant, rubbing his temples against it, stripped off its bark, whereupon Parvati (the daughter of the mountain) lamented it as if it was Skanda wounded by the weapons of the demons. (37)

**Hindi Translation:—**

एक बार किसी बनैले हाथी ने अपने कपोलों को खुजलाते हुए इस (वृक्ष) की छाल रगड़ डाली। यह देखकर पार्वती उसी प्रकार शोक से विह्वल हो उठीं जैसा कि वे असुरों के अस्त्रों से घायल हुए कार्तिकेय को देखकर हुई थीं ॥३७॥

**Sanskrit Commentary:—**

कदाचित् (एकदा)। कटं कपोलम्। कण्डूयमानेन घर्षयता। 'कण्डवादिभ्यो यक्' इति यक्। ततः शानच्। वन्यद्विपेन (वनगजेन)। अस्य देवदारोः त्वक्। उन्मथिता (उत्पाटिता)। अथ। अद्रेस्तनया गौरी। असुरास्त्रैः (दानवायुधैः)। आलीढं

क्षतम्। ( सेनान्यम् इव ) सेनां नयतीति सेनानीः स्कन्दः। 'पार्वतीनन्दनः स्कन्दः सेनानीः' इत्यमरः। 'नन्दद्विप' इत्यादिना क्विप्। तमिव। एनं देवदारुम्। शुशोच ( शोचितवती )।

**Substance in Sanskrit:—**

एकदा समुत्पन्नकण्डूतिना केनचिद्वनगजेन स्वकण्डूर्विनेतुमस्मिन् देवदारुवृक्षे स्वकपोलं घर्षयताऽस्य त्वगुत्पाटिता। तदा पार्वती एतद्दृष्ट्वा तथा शोकमवाप यथा सा देवदानवरणे दानवायुधैर्विक्षतदेहं कार्तिकेयं दृष्ट्वा शुशोच।

**तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ।**
**व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्ति॥३८॥**

**Prose Order:—**

तदा प्रभृति एव वनद्विपानाम् त्रासार्थम् शूलभृता अङ्कागतसत्त्ववृत्ति सिंहत्वम् विधाय अस्मिन् अद्रिकुक्षौ अहम् व्यापारितः।

**English Translation:—**

From that very day, the trident-bearer God (Siva) having transformed me into a lion whose livelihood is provided by the beasts that come within his reach, appointed me in this cave, in order to scare away wild elephants. (38).

**Hindi Translation:—**

उस समय से त्रिशूलधारी भगवान् शिव ने मुझे सिंह का रूप देकर और पास आये हुए जीवों के द्वारा जीविका निर्वाह

करने का आदेश देकर बन के हाथियों को डराने के लिये हिमालय पर्वत की इस गुफा में नियुक्त कर दिया है ॥ ३८ ॥

**Sanskrit Commentary:—**

तदा तत्कालः प्रभृतिरादिर्यस्मिन् कर्मणि तत्तथा तदाप्रभृत्येव। वनद्विपानाम्। त्रासार्थं भयार्थम्। शूलभृता शिवेन। (अङ्कागतसत्ववृत्ति) अङ्कं समीपमागताः प्राप्ताः सत्वाः प्राणिनो वृत्तिर्यस्मिंस्तत्। 'अङ्कः समीप उत्सङ्गे चिह्ने स्थानापराधयोः' इति केशवः। सिंहत्वं विधाय। अस्मिन्नद्रिकुक्षौ गुहायाम्। अहं व्यापारितो नियुक्तः।

**Substance in Sanskrit:—**

तत्कालादारभ्य शूलपाणिर्भगवान् महादेवो वन्यगजान् भीपयितुं सिंहरूपेण मां परिवर्त्य अस्यां पर्वतकन्दरायां नियुक्तवान्। आदिष्टश्चाहं तेन भगवता 'अत्र समागतान् जीवान् भक्षयित्वा स्वजीविकां निर्वाहयतु' इति।

**तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण।**
**उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ॥३९॥**

**Prose Order:—**

परमेश्वरेण प्रदिष्टकाला उपस्थिता एषा शोणितपारणा सुरद्विषः चान्द्रमसी सुधा इव क्षुधितस्य तस्य मे तृप्त्यै अलम्।

**English Translation:—**

So this cow, which has (now) come (to me) as a meal of blood after my fast, ordained (as if)

for this time by the Supreme Lord, is enough to satisfy me who am hungry, just as the nectar of the moon is enough for (the satisfaction of) Rahu the enemy of the gods. (39)

**Hindi Translation:—**

परमात्मा के द्वारा नियत समय पर ( स्वतः ) प्राप्त हुई ( इस गाय के ) रक्त की पारणा मुझ भूखे की क्षुधा शान्ति के लिये उसी प्रकार पर्याप्त होगी जैसे चन्द्रमा का अमृत राहु के लिए ( पर्याप्त होता है ) ॥३६॥

**Sanskrit Commentary:—**

परमेश्वरेण । प्रदिष्टो निर्दिष्टः कालो भोजनवेला यस्याः सा ( प्रदिष्टकाला ) । उपस्थिता प्राप्ता । एषा गोरूपा । शोणित-पारणा रुधिरस्य व्रतान्तभोजनम् । सुरद्विषो राहोः । चन्द्रमस इयं चान्द्रमसी । सुधेव । क्षुधितस्य बुभुक्षितस्य तस्य अङ्कागत-सत्ववृत्तेर्मे मम सिंहस्य तृप्त्यै । अलं पर्याप्ता । 'नमःस्वस्ति-स्वाहास्वधालंवषड्योगाच्च' इत्यनेन चतुर्थी ।

**Substance in Sanskrit:—**

अतो बुभुक्षितस्य मे भोजनवेलायां नियतिवशाद् स्वयमेवात्र समागता इयं धेनुर्मे क्षुधाशान्त्यर्थं पर्याप्ता भविष्यति । अहमे-तस्या रुधिरेण पारणां विधाय तथैव तृप्तिं लप्स्ये यथा ग्रहणकाले राहुश्चन्द्रमसोऽमृतं पीत्वा लभते ।

**स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान् दर्शितशिष्यभक्तिः ।**
**शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ॥४०॥**

**Prose Order:—**

स त्वम् लज्जाम् विहाय निवर्तस्व, भवान् गुरोः दर्शितशिष्यभक्तिः। यत् रक्ष्यम् शस्त्रेण अशक्यरक्षम् तत् शस्त्रभृताम् यशः न क्षिणोति।

**English Translation:—**

Do you, therefore, go back without feeling shame; you have shown your devotion as a pupil to your preceptor; for the charge which cannot be protected by weapons does not ruin the fame of the arm-wielders. (40)

**Hindi Translation:—**

इसलिये अब आप लज्जा त्याग कर (घर) लौट जाइये। गुरु के प्रति आप अपनी शिष्योचित भक्ति दिखा चुके। रक्षा करने योग्य होने पर भी शस्त्र के द्वारा जिस वस्तु की रक्षा नहीं की जा सकती वह (नष्ट हो जाने पर भी) शस्त्रधारियों के यश को बट्टा नहीं लगाती ॥४०॥

**Sanskrit Commentary:—**

स एवमुपायशून्यस्त्वम्। लज्जां विहाय निवर्तस्व। भवांस्त्वम्। गुरोर्दर्शिता प्रकाशिता शिष्यस्य कर्तव्या भक्तिर्येन स तथोक्तोऽस्ति। ननु गुरुधनं विनाश्य कथं तत्समीपं गच्छेयमत-आह—शस्त्रेणेति। यद्रक्ष्यं धनम्। शस्त्रेणायुधेन। 'शस्त्र-मायुधलोहयोः' इत्यमरः। अशक्या रक्षा यस्य तदशक्यरक्षम्। रक्षितुमशक्यमित्यर्थः तद्रक्ष्यं नष्टमपि शस्त्रभृताम् (आयुधधारिणाम्)। यशः कीर्तिम्। न क्षिणोति न हिनस्ति। अशक्यार्थेष्वप्रतिविधान न दोषायेतिभावः।

Substance in Sanskrit:—

ननु मत्तो धेनोः संरक्षणे सर्वथोपायशून्यस्त्वं निःसङ्कोचमिदानीं गृहं परागच्छ। शस्त्रधार्यपि धेनुं रक्षितुं नाहं समर्थोऽभूवमिति लज्जाञ्च मा कार्षीः। यतो नात्रभवता किमप्यपराद्धमपि तु महादेवस्य प्रभावोऽयम्। गुरौ च त्वया समुचिता शिष्यभक्तिः प्रदर्शिता। न चैवं भवद्यशः क्षयं यास्यति यतः शस्त्रेण रक्षणीयस्य वस्तुनोऽरक्षणादेव हि शस्त्रधारिणां यशोहानिर्जायते न च नितान्तं रक्षितुमशक्यस्य वस्तुनो विनाशादपि।

**इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य।**
**प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञं शिथिलीचकार॥४१॥**

Prose Order:—

पुरुषाधिराजः मृगाधिराजस्य इति प्रगल्भम् वचः निशम्य गिरिशप्रभावात् प्रत्याहतास्त्रः आत्मनि अवज्ञाम् शिथिलीचकार।

**English Translation:—**

Hearing these bold words of the lion (the lord of beasts) and knowing that he was resisted in the use of his missiles by the power of Lord Siva, the lord of men (Dilipa) lessened the feeling of contempt towards himself. (41)

**Hindi Translation:—**

सिंह की ऐसी प्रगल्भ वाणी सुनकर और यह समझकर कि महादेव के प्रभाव से मेरा अस्त्र विफल होगया है राजा ने अपने प्रति तिरस्कार की भावना को कम कर दिया॥ ४१ ॥

Sanskrit Commentary:—

( पुरुषाणामधिराज इति ) पुरुषाधिराजो नृपः । इति पूर्वोक्तम् । प्रगल्भम् ( प्रतिभान्वितम् )। मृगाधिराजस्य सिंहस्य वचो निशम्य श्रुत्वा । गिरिशस्येश्वरस्य । प्रभावात्प्रत्याहतास्त्रः कुण्ठितास्त्रः सन् । आत्मनि विषयेऽवज्ञामपमानम् । शिथिलीचकार । तत्या- जेत्यर्थः । अवज्ञातोऽहमिति निर्वेदं न प्रापेत्यर्थः । समानेषु हि क्षत्रियाणामभिमानो न सर्वेश्वरं प्रतीति भावः ।

Substance in Sanskrit:—

मृगेन्द्रस्येमानि वचांसि श्रुत्वा 'महेश्वरप्रभावाद्धि ममास्त्राणि विफलीभूतानि' इति चावगम्य स नरेन्द्र आत्मानं प्रति समुपन्नां ग्लानिमपमानञ्च सर्वथा पर्यत्यजत् ।

प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभङ्गे वितथप्रयत्नः ।
जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः ॥४२॥

Prose Order:—

तत्पूर्वभंगे इषुप्रयोगे वितथप्रयत्नः वज्रं मुमुक्षन् त्र्यम्बकवीक्षणेन जडीकृतः वज्रपाणिः इव एनम् प्रत्यब्रवीत् ।

English Translation:—

The king replied to him, finding his attempt futile in the use of arrows which knew failure for the first time, like Indra who was paralysed by the glance of Siva when he was about to hurl his thunderbolt. (42)

**Hindi Translation:—**

वज्र छोड़ने की इच्छा करने पर महादेव जी के दृष्टिपात से जड़ीभूत हुए इन्द्र के समान बाणों के प्रयोग करने में पहिली बार ही अपने प्रयास में विफल हुए राजा सिंह से बोले ॥४२॥

**Sanskrit Commentary:—**

स एव पूर्वः प्रथमो भङ्गः प्रतिबन्धो यस्य तस्मिंस्तत्वपूर्वभङ्गे। इषुप्रयोगे ( बाणप्रहारे ) वितथप्रयत्नो विफलप्रयासः। अतएव वज्रं कुलिशम्। मुमुक्षन्मोक्तुमिच्छन्। अम्बकं लोचनम्। 'दृग्दृष्टिनेत्रलोचनचक्षुर्नयनाम्बकेक्षणाक्षीणि' इति हलायुधः। त्रीणि अम्बकानि यस्य स त्र्यम्बको हरः तस्य वीक्षणेन (अवलोकनेन)। जडीकृतो निष्पन्दीकृतः। वज्रं पाणौ यस्य स वज्रपाणिरिन्द्रः। 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति वक्तव्यम्' इति पाणेः सप्तम्यन्तस्योत्तरनिपातः। स इव स्थितो नृपः एनं सिंहम्। प्रत्यब्रवीच्च। ( बाहुं सवज्रं क्रुद्धस्यास्तम्भयत्प्रभुः ) इति महाभारते।

**Substance in Sanskrit:—**

यथा त्रिपुरवधे शिवस्योपरि कदाचिद् वज्रं प्रहर्तुमुद्यतस्य महेन्द्रस्य हस्तो भगवतो महादेवस्य दृष्टिविक्षेपेण स्तम्भितोऽभूत् तथैवेदानीं बाणप्रहारे प्रथममेव विफलप्रयासो दिलीपस्तं सिंहं प्रत्यवादीत्।

संरुद्धचेष्टस्य मृगेन्द्र कामं हास्यं वचस्तद्यदहं विवक्षुः।
अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान् भावमतोऽभिधास्ये ॥४३॥

**Propose Order:—**

(हे) मृगेन्द्र संरुद्धचेष्टस्य तत् वचः कामम् हास्यम् अस्ति। यत् अहम् विवक्षुः, हि भवान् प्राणभृताम् अन्तर्गतम् सर्वम् भावम् वेद अतः अभिधास्ये।

**English Translation:—**

O lord of beasts as my efforts are frustrated the words that I desire to speak are, surely, worthy of ridicule yet I will speak, as you know the innermost feelings of all the living beings. (43)

**Hindi Translation:—**

हे मृगेन्द्र! अपने प्रयास में विफल हो जाने पर (अब) जो बात मैं कहना चाहता हूँ वह अवश्य ही उपहासास्पद है। फिर भी मैं अपनी बात कहूँगा ही क्योंकि आप जीवधारियों के हृदय के सब भीतरी भावों को जानते हो॥४३॥

**Sanskrit Commentary:**

हे मृगेन्द्र! संरुद्धचेष्टस्य प्रतिबद्धव्यापारस्य मम तद्वचो वाक्यं कामं (निश्चयेन) हास्यं परिहसनीयम्। यद्वचः 'स त्वं मदीयेन' (२।४१) इत्यादिकमहं विवक्षुर्वक्तुमिच्छुरस्मि। तर्हि तूष्णीं-स्थीयतामित्याशङ्कयेश्वरकिंकरत्वात् सर्वज्ञं त्वां प्रति न हास्यमित्याह-अन्तरिति। हि यतो भवान् प्राणभृतामन्तर्गतं हृद्गतं वाग्वृत्त्या बहिरप्रकाशितमेव सर्वं भावं वेद वेत्ति। 'विदो लटो वा' इति णलादेशः। अतोऽहमभिधास्ये वक्ष्यामि। वच इति प्रकृतं कर्म संबध्यते। अन्ये त्वीदृग्वचनमाकर्ण्य सभावितार्थ-

मेतदित्युपहसन्ति। अतस्तु मौनमेव भूषणम्। त्वं तु वाङ्मनसयोरेकविध एवायमिव जानासि। अतोऽभिधास्ये। यद्वचोऽहं विवक्षुरित्यर्थः।

Substance in Sanskrit:—

भो मृगपते! यत्किञ्चिदानीमहं वक्तुमिच्छामि तत्सर्वं खलु हास्यास्पदं भविष्यति यतोऽहं भवद्वधरूपे स्वव्यापारे प्रतिहतोऽस्मि। तथापि तदहमवश्यं भवन्तं वक्ष्यामि यतो भवान् प्राणिनां सर्वान् मनोभावान् जानाति।

**मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः।**
**गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम् ॥४४॥**

Prose Order:—

स्थावरजङ्गमानाम् सर्गस्थितिप्रत्यवहारहेतुः स मे मान्यः। आहिताग्नेः गुरोः अपि पुरस्तात् नश्यत् इदम् धनम् अनुपेक्षणीयम्।

English Translation:—

He, who is the cause of the creation, preservation and destruction of all animate and inaminate things is venerable to me, yet I cannot allow this property of my preceptor, who maintains the sacred fire, to perish before me. (44)

Hindi Translation:—

चराचर सृष्टि की उत्पत्ति, पालन और संहार करने वाले वे (महादेव) मेरे पूज्य हैं तथापि अग्नि की उपासना करने वाले गुरु के इस धन को मैं अपने सामने नष्ट होते हुए नहीं देख सकता ॥४४॥

**Sanskrit Commentary:—**

प्रत्यवहारः प्रलयः। स्थावराणां तरुशैलादीनां जङ्गमानां मनुष्यादीनाम् ( स्थावरजङ्गमानां चराचराणामित्यर्थः )। स्थावर इत्यत्र 'स्थेशभासपिसकसो वरच्' इति वरच्। सर्गस्थितिप्रत्यवहारेषु (उत्पत्तिपालनप्रलयेषु) हेतुः स ईश्वरो मे मम मान्यः पूज्यः। अलङ्घ्यशासन इत्यर्थः। शासनं च 'सिंहत्वमङ्कागतसत्त्ववृत्ति' इत्युक्तरूपम्। तर्हि विसृज्य गम्यताम्। नेत्याह—गुरोरपीति। पुरस्तादग्रे। नश्यदिदमाहिताग्नेर्गुरोर्धनमपि गोरूपमनुपेक्षणीयम् आहिताग्नेरिति विशेषेणानुपेक्षाकारणं हविःसाधनत्वं सूचयति।

**Substance in Sanskrit:—**

चराचरसृष्टेरुत्पत्तिपालनप्रलयकर्ता स भगवान् महादेवः सर्वथा मम पूज्यः। अतो न मया तस्यानुशासनमुल्लङ्घनीयम्। तथापि आहिताग्नेर्गुरोर्वशिष्ठस्य गोरूपमिदं धनमपि सर्वथा मया रक्षणीयम्। तत्कथमहं स्वनेत्रयोः समक्षमस्य विनाशं सहेय।

**स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद।**
**दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥४५॥**

**Prose Order:—**

सः त्वम् मदीयेन देहेन वृत्तिम् निर्वर्तयितुम् प्रसीद। दिनावसानोत्सुकबालवत्सा इयम् महर्षेः धेनुः विसृज्यताम्।

**English Translation:—**

Be pleased, therefore, to make your sustenance with my body and release this cow of the great sage, whose little calf will be getting anxious for her at the end of the day. (45)

**Hindi Translation:—**

अतः आप मेरे शरीर से अपनी क्षुधा शान्त कर मुझे अनुगृहीत करें और महर्षि (वशिष्ठ) की इस गाय को छोड़ दें, क्योंकि दिन के बीतने पर अब इसका छोटा सा बछड़ा (माता के लिये) उत्कण्ठित होरहा होगा ॥४५॥

**Sanskrit Commentary.—**

सोऽङ्कागतसत्ववृत्तिस्त्वम् । मदीयेन देहेन । शरीरस्य वृत्तिं जीवनं निर्वर्तयितुं संपादयितुम् । प्रसीद (प्रसन्नो भव)। दिनावसाने (दिनान्ते) उत्सुको 'माता समागमिष्यतीत्युत्कण्ठितः' बालो वत्सो यस्याः सा (दिनावसानोत्सुकबालवत्सा)। महर्षेरियं धेनुः। विसृज्यताम् ( मुच्यताम् )।

**Substance in Sanskrit:—**

भवतः क्षुधाशान्त्यर्थं चाहं स्वदेहमेवार्पयामि। अतो गुरोरिमां धेनुं परित्यज्य मम शरीरञ्च भक्षयित्वा मयि प्रसन्नो भव। सम्प्रति दिनान्ते मे माता गृहं समागमिष्यतीति मातुः पन्थानं-प्रतीक्षमाणोऽस्या वत्सः सर्वथास्यै समुत्सुको भविष्यति।

**अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन्।**
**भूयः स भूतेश्वरपार्श्ववर्ती किञ्चिद्विहस्यार्थपतिं बभाषे ॥४६॥**

**Prose Order:—**

अथ भूतेश्वरपार्श्ववर्ती सः गिरिगह्वराणाम् अन्धकारम् दंष्ट्रामयूखैः शकलानि कुर्वन् किञ्चित् विहस्य अर्थपतिम् भूयः बभाषे।

**English Translation:—**

Then that attendant of the lord of beings

breaking to pieces the darkness of the mountain-caves by the rays of his teeth, smiled a little and then spoke to the king again. (46)

**Hindi Translation:—**

इसके अनन्तर भूतनाथ (भगवान्शिव) के पास रहनेवाला वह सिंह अपनी डाढ़ों की कान्ति से पर्वत की गुफाओं के अन्धकार को छिन्न-भिन्न करता हुआ कुछ हंस कर राजा से फिर बोला ॥४६॥

**Sanskrit Commentary:—**

अथ भूतेश्वरस्य (महादेवस्य) पार्श्ववर्ती अनुचरः स सिंहः। गिरेर्गह्वराणां गुहानाम् (गिरिगह्वराणाम्)। 'देवखातबिले गुहा। गह्वरम्' इत्यमरः। अन्धकारम्। दंष्ट्रामयूखैः (दन्तरश्मिभिः)। शकलानि खण्डानि कुर्वन्। निरस्यन्नित्यर्थः। किंचिद्विहस्य। अर्थपतिं नृपम्। भूयो बभाषे (पुनरुवाच)। हासकारणम् 'अल्पस्य हेतोर्बहु हातुमिच्छन्' (२।४७) इति वक्ष्यमाणं द्रष्टव्यम्।

**Substance in Sanskrit:—**

ततो महादेवस्याऽनुचरः स सिंहो राज्ञः स्वशरीरदानप्रस्ताव-माकर्ण्य किञ्चिद्विहस्य पुनः राजानं बभाषे। विहसने च तस्य दंष्ट्राभ्यः समुत्पन्ना महती द्युतिर्गिरिकन्दरायां व्याप्तं सर्वमप्यन्धकारं व्यनाशयत्।

DELHI UNIV. LIBRARY SYSTEM

**एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च।**
**अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम्॥४७**

**Prose Order:—**

एकातपत्रम् जगत: प्रभुत्वम् नवम् वयः इदम् कान्तम् वपुः च अल्पस्य हेतोः बहु हातुम् इच्छन् त्वम् मे विचारमूढः प्रतिभासि ।

**English Translation:—**

The undisputed (lit. marked by one royal umbrella) sovereignty of the world, your young age and this handsome body—desiring to sacrifice so much for the sake of a trifle you seem to me to be silly in your judgement. (47)

**Hindi Translation:—**

हे राजन् ! इस छोटी सी ( गोरूप ) वस्तु के लिये तुम ( सारे ) संसार का एकच्छत्र राज्य, अपनी तरुणावस्था और यह सुन्दर शरीर इतनी सारी वस्तुओं का नाश करने की इच्छा करते हुए मुझे विचारहीन मालूम होते हो । ४७॥

**Sanskrit Commentary:—**

एकातपत्रमेकच्छत्रम् । जगतः प्रभुत्वं स्वामित्वम् । नवं वयो यौवनम् । इदं कान्तं रम्यं वपुश्च (शरीरञ्च) । इत्येव बहु । अल्पस्य हेतोरल्पेन कारणेन । अल्पफलायेत्यर्थः । 'षष्ठी हेतुप्रयोगे' इति षष्ठी । हातुं त्यक्तुम् । इच्छंस्त्वम् । विचारे कार्याकार्यविमर्शे मूढो मूर्खो मे मम प्रतिभासि ।

**Substance in Sanskrit:—**

ननु भवान् सर्वस्यापि जगतः सार्वभौमोऽधिपतिः । पूर्णञ्च ते तारुण्यं शरीरञ्चात्यन्तमनोहरम् । [illegible]

केवलमेतस्य तुच्छगोधनस्य कृते त्यक्तुमिच्छंस्त्वं मे सर्वथा विचार-शून्यः परिलक्ष्यसे।

**भूतानुकम्पा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदन्ते।**
**जीवन् पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ॥४८**

**Prose Order:—**

तव भूतानुकम्पा चेत् इयम् एका गौः त्वदन्ते स्वस्तिमती भवेत् हे प्रजानाथ! जीवन् पुनः पिता इव प्रजाः उपप्लवेभ्यः शश्वत् पासि।

**English Translation:—**

If this be your compassion for living creatures, then this cow alone will be saved by your death; but if you live, O lord of men! then like a father you will always protect your subjects from calamities. (48)

**Hindi Translation:—**

(हे राजन्!) यदि आप में जीवों पर दया है तो आपके मरने के पश्चात् केवल यही एक गाय कुशल से रहेगी। किन्तु यदि आप जीवित रहेंगे तो पिता की भाँति उपद्रवों से निरन्तर अपनी प्रजा की रक्षा करते रहेंगे॥४८॥

**Sanskrit Commentary:—**

तव भूतेष्वनुकम्पा कृपा चेत्। 'कृपा दयानुकम्पा स्यात्' इत्यमरः कृपैव वर्तते चेदित्यर्थः। तर्हि त्वदन्ते तव नाशे सति। इयमेका गौः। स्वस्ति क्षेममस्या अस्तीति स्वस्तिमती भवेत्। जीवेदि-त्यर्थः। 'स्वस्त्याशीः क्षेमपुण्यादौ' इत्यमरः। हे प्रजानाथ!

जीवन् पुनः पितेव प्रजा उपप्लवेभ्यो विघ्नेभ्यः। शश्वत्सदा 'पुनःसदार्थयोः शश्वत्' इत्यमरः। पासि रक्षसि। स्वप्राण्यव्ययेनैकधेनुरक्षणाद्वरं जीवितेनैव शश्वदखिलजगत्त्राणमित्यर्थः।

Substance in Sanskrit:—

हे राजन्! यदि जीवेषु कृपावशात् स्वप्राणांस्त्यक्त्वा भवान् गुरोरिमां धेनुं रक्षितुं प्रवृत्तस्तर्हि नेदमुचितम्। यतः स्वजीवनं विहाय भवान् केवलमस्या एव धेनो रक्षां कर्तुमर्हसि स्वयञ्च जीवन् पितेव सर्वा एव प्रजाश्चिरं विघ्नेभ्यो रक्षितुं समर्थो भविष्यति।

**अथैकधेनोरपराधचण्डाद्गुरोः कृशानुप्रतिमाद्बिभेषि।**
**शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः**

**Prose Order:—**

अथ एक धेनोः अपराधचण्डात् कृशानुप्रतिमात् गुरोः बिभेषि अस्य मन्युः घटोध्नीः कोटिशः गाः स्पर्शयता भवता विनेतुम् शक्यः।

**English Translation:—**

But if you fear your preceptor, who having but one cow will get indignant at your offence, and (thus) look like the blazing fire, then it is possible for you to appease his wrath by presenting him with crores of cows having pot-like udders. (49)

**Hindi Translation:—**

और यदि तुम अग्नि के समान दीप्तिमान् अपने गुरु वशिष्ठ

से इस लिए डरते हो कि उसके पास केवल एक ही गाय के होने से वे तुम्हारे अपराध पर अत्यन्त क्रुद्ध हो जायँगे तो तुम घड़े के समान थनों वाली करोड़ों गाय भेंट कर उनका क्रोध शान्त कर सकते हो ॥४६॥

Sanskrit Commentary:—

अथेति पक्षान्तरे (अथवा)। एकैव धेनुर्यस्य तस्मात्। अय कोपकारणोपन्यास इति ज्ञेयम्। अतएवापराधे गवोपलक्षणे सति चण्डादतिकोपनात्। 'चण्डस्त्वत्यन्तकोपनः' इत्यमरः। अतएव कृशानुः (अग्निः) प्रतिमोपमा यस्य तस्मादग्निकल्पाद् गुरोर्बिभेपि। इति काकुः। 'भीत्रार्थानां भयहेतुः' इत्यपादानात्पञ्चमी। अल्पवित्तस्य धनहानिरतिदुःसहेतिभावः। अस्य गुरोर्मन्युः क्रोधः। 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः। घटा इवोधांसि यासां ताः घटोध्नीः। 'ऊधसोऽनङ्' इत्यनङादेशः। 'बहुव्रीहेरूधसो ङीप्' इति ङीप्। कोटिशो गाः। स्पर्शयता प्रतिपादयता। 'विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्' इत्यमरः। भवता विनेतुमपनेतुं शक्यः।

Substance in Sanskrit:—

यदि भवान्मन्यते यन्मम गुरोः केवलमियमेवैका गौरतो ममापराधात्तस्यामपि विनष्टायां वह्नितुल्यप्रदीप्तिः सोऽत्यन्तक्रुद्धो भविष्यति न चाहं तस्य कोपं सोढुं समर्थस्तर्हि मा भैषीः। यतस्तस्मै कोटिशः पयस्विनीर्गाः प्रदाय त्वं तस्य कोपं निवारयितुं शक्नोसि।

 Powerful

तद्रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥५०॥

**Prose Order:—**

तत् (त्वम्) कल्याणपरम्पराणाम् भोक्तारम् ऊर्जस्वलम् आत्मदेहम् रक्ष, हि ऋद्धम् राज्यम् महीतलस्पर्शनमात्रभिन्नम् ऐन्द्रम् पदम् आहुः ।

**English Translation:—**

So you do preserve your body which is so powerful and which enjoys a series of blessings, for a prosperous kingdom, so say the wise, is the very abode of Indra that differs from it only in so much that it has its contact with the earth. (50)

**Hindi Translation:—**

इसलिये अनेक सुखों का उपभोग करने वाले और बलवान् अपने इस शरीर को तुम रक्षा करो। बुद्धिमान् लोग समृद्धि-शाली राज्य को भी इन्द्र का पद (स्वर्ग) कहते हैं जो केवल पृथ्वी के साथ अपना सम्बन्ध होने मात्र से ही उससे भिन्न है ॥५०॥

**Sanskrit Commentary:—**

तस्मात् कारणात्। कल्याणपरम्पराणाम् (सुखसन्ततीनाम्) भोक्तारम्। कर्मणि षष्ठी। ऊर्जो बलमस्यास्तीति ऊर्जस्वलम् (बलवत्)। 'ज्योत्स्नातमिस्रा-' इत्यादिना बलच्प्रत्ययान्तो निपातितः। आत्मदेहम् (स्वशरीरम्)। रक्ष। ननु गामुपेक्ष्या-त्मदेहरक्षणे स्वर्गहानिः स्यात्। नेत्याह—महीतलेति। ऋद्धं

समृद्धम्। राज्यम्। (महीतलस्पर्शनमात्रभिन्नम्) महीतल-स्पर्शनमात्रेण भूतलसंबंधमात्रेण भिन्नम्। ऐन्द्रमिन्द्रसंबंधि। पदं स्थानम्। आहुः (कथयन्ति) 'विद्वांस इति शेषः'। स्वर्गान्न भिद्यते इत्यर्थः।

Substance in Sanskrit:—

अतो बलशालिनं सर्वसुखोपभोगक्षमञ्चेमं स्वदेहं भवान् रक्षतु। ननु 'धेनोः रक्षां विहाय स्वदेहरक्षणेन च कथमहं स्वर्गसुखं लभेय' इति शङ्कां मा कार्षीः। यतो विदुषां मते सर्वथा समृद्धियुक्तं राज्यमपीन्द्रपदतुल्यमेव नेदं स्वर्गात्कथमपि न्यूनतरम्। तयोरन्तरं तु केवलमियदेव यदिन्द्रपदं तावत्स्वर्गे स्थितं राज्यञ्च भूतले स्थितमिति।

**एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन।**
**शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव॥५१**

Prose Order:—

मृगेन्द्रे एतावत् उक्त्वा विरते (सति) शिलोच्चयः अपि अस्य गुहा-गतेन प्रतिस्वनेन उच्चैः क्षितिपालम् प्रीत्या तम् एव अर्थम् अभाषत इव।

**English Translation:—**

When, after having said all this, the lord of beasts ceased, the mountain too, by means of the echo coming from the caves, seemed to repeat, as *it were, loudly and out of love (for him) the same* thing to the king. (51)

**Hindi Translation:—**

सिंह के इतना कहकर चुप हो जाने पर गुफा की ओर से

आती हुई उसके शब्दों की प्रतिध्वनि से ऐसा प्रतीत होता था मानों पर्वत भी राजा से बड़े स्नेह के साथ और ऊँचे स्वर से वही बात कह रहा हो ॥५१॥

Sanskrit Commentary:—

मृगेन्द्रे। एतावदुक्त्वा विरते सति। गुहागतेन। अस्य सिंहस्य प्रतिस्वनेन (प्रतिध्वनिना)। शिलोच्चयः शैलोऽपि। प्रीत्या स्नेहेन तमेवार्थम्। क्षितिपालम् (राजानम्)। उच्चैः। अभाषतेव। इत्युत्प्रेक्षा। भाषिरयं ब्रुविसमानार्थत्वाद् द्विकर्मकः। ब्रुविस्तु द्विकर्मकेषु पठितः। तदुक्तम् 'दुहियाचिरुधिप्रच्छिक्षिचित्रामुपयोगनिमित्तमपूर्वविधौ। ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना।' इति।

Substance in Sanskrit:—

इत्थं पूर्वोक्तानि वचांस्युक्त्वा यदा स सिंहस्तूष्णीम्बभूव तदा तत्पर्वतगुहायां तस्य शब्दानां महान् प्रतिध्वनिरभूत्। तेन चैवं प्रातीयत यत्स पर्वतोऽपि राज्ञ उपरि स्नेहं कृत्वा प्रतिश्रुद्व्याजेन सिंहस्यैव कथनं समर्थयामास।

**निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच।**
**धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ॥५२**

Prose Order:—

देवानुचरस्य वाचम् निशम्य तदध्यासितकातराक्ष्या धेन्वा निरीक्ष्यमाणः मनुष्यदेवः सुतराम् दयालुः (सन्) पुनर् अपि उवाच।

English Translation:—

Heaving heard the words of the attendant of

god Siva, the lord of men (Dilipa) spoke again, as, being looked at by the cow whose eyes were tremulous with fear on account of her being pounced upon by the lion, he was very much moved with pity. (52)

**Hindi Translation:—**

सिंह के आक्रमण से संत्रस्त नन्दिनी ने भयभीत नेत्रों से राजा की ओर देखा। ( उसके इस प्रकार देखने पर ) राजा का हृदय करुणा से भर गया और वह शिवजी के सेवक ( उस सिंह ) के वचन सुनकर फिर बोला ॥५२॥

**Sanskrit Commentary:—**

देवानुचरस्य ईश्वरकिंकरस्य सिंहस्य। वाचं निशम्य ( श्रुत्वा) मनुष्यदेवो राजा। पुनरप्युवाच। किंभूतः सन् तेन सिंहेन यदध्यासितं व्याक्रमणम्। 'नपुंसके भावे क्तः'। तेन कातरे (भयसंत्रस्ते ) अक्षिणी ( नेत्रे ) यस्याः सा तया 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' इति षच्। 'षिद्गौरादिभ्यश्च' इति ङीष्। किं वा वक्ष्यतीति भीत्यैव स्थितयेत्यर्थः। धेन्वा निरीक्ष्यमाणः ( अवलोक्यमानः ) अतएव सुतराम् ( अत्यन्तम् ) दयालुः सन्। सुतरामित्यत्र 'द्विवचनविभज्य'—इत्यादिना सुशब्दात्तरप्, 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' इत्यनेनाम्प्रत्ययः 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययसंज्ञा।

**Substance in Sanskrit:—**

सिंहेनाक्रान्ता नन्दिनी भृशं संत्रस्ता भयकातराभ्यां चक्षुर्भ्यां

राजानमद्राचीत्। राजा च तथाभूतां तां दृष्ट्वा परमकारुण्येन द्रवीभूतान्तःकरणः सन् सिंहस्य वचनं श्रुत्वा पुनरपि तमवादीत्।

**क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः।**
**राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा॥५३॥**

**Prose Order:—**

उदग्रः क्षत्रस्य शब्दः 'क्षतात् त्रायत' इति भुवनेषु रूढः किल, तद्विपरीतवृत्तेः राज्येन किम् उपक्रोशमलीमसैः प्राणैः वा किम्।

**English Translation:—**

The eminent word Ksatra is well known to the worlds by its derivation 'one who protects from danger'; of what use is then a kingdom or a life soiled with censure to him whose acts are contrary to this. (53)

**Hindi Translation:—**

श्रेष्ठ क्षत्र शब्द 'नाश से बचानेवाला' इस अर्थ में सब लोकों में प्रसिद्ध है। अतः इसके विरुद्ध आचरण करने वाले के लिये राज्य के उपभोग अथवा निन्दा से कलुषित जीवन से क्या लाभ? ५३॥

**Sanskrit Commentary:—**

क्षणु 'हिंसायाम्' इति धातोः संपदादित्वात् क्विप्। 'गमादीनाम्' इति वक्तव्यादनुनासिकलोपे तुगागमे च क्षदिति रूपं सिद्धम्। क्षतो नाशात् त्रायते इति क्षत्त्रः। 'सुपीति' योगविभागात्कः। तामेतां व्युत्पत्तिं कविरर्थतोऽनुक्रामति—'क्षतादित्यादिना—उदग्रः उन्नतः। क्षत्रस्य क्षत्रवर्णस्य शब्दो

वाचकः क्षत्रशब्द इत्यर्थः। क्षतात् त्रायते इति व्युत्पत्त्या भुवनेषु रूढः किल प्रसिद्धः खलु। नाश्वकर्णादिवत् केवल रूढः किन्तु पङ्कजादिवत् योगरूढ इत्यर्थः। ततः किमित्यत आह—तस्य क्षत्रशब्दस्य विपरीतवृत्तेर्विरुद्धव्यापारस्य क्षतस्त्राणमकुर्वतः पुंसो राज्येन किम्। उपक्रोशमलीमसैः निंदामलिनैः। 'उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे' इत्यमरः। 'ज्योत्स्नातमिस्रा' इत्यादिना मलीमसशब्दो निपातितः। 'मलीमसं तु मलिनं कच्चरं मलदूषितम्' इत्यमरः। तैः प्राणैर्वा किम्। निन्दितस्य सर्वं व्यर्थमित्यर्थः। 'एतेन एकातपत्रम्' इत्यादिना श्लोकद्वयेनोक्तं प्रत्युक्तमिति वेदितव्यम्।

**Substance in Sanskrit:—**

ननु 'क्षतात् नाशात् त्रायते' इति क्षत्रशब्दस्य व्युत्पत्तिः सर्वेष्वपि लोकेषु प्रसिद्धा किल। एतेन प्रतीयते यद्विपन्नानां जीवानां विपत्तीरुन्मूल्य तेषां रक्षणमेव क्षत्रियस्य परमो धर्मः। एवं हि यश्चैनं धर्मं परित्यज्य विरुद्धमाचरति तस्य मादृश-जनस्य राज्येन किं प्रयोजनं निन्दाकलुषितेन जीवितेन वा को लाभः स्यात्।

**कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम्।**
**इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्याम् ॥५४॥**

**Prose Order:—**

अन्य पयस्विनीनाम् विश्राणनात् महर्षेः अनुनयः च कथ नु शक्यः। इमाम् सुरभेः अनूनाम् अवेहि, त्वया तु अस्याम् रुद्रौजसा प्रहृतम्।

**English Translation:—**

*And how can the wrath of the great sage be* pacified by the present of other cows? For, know her to be in no way inferior to Surabhi; you could attack her only through the power of Rudra. (54)

**Hindi Translation:—**

और अन्य गायों के देने से महर्षि का क्रोध कैसे शान्त किया जा सकता है। तुम इसे कामधेनु से (किसी प्रकार भी) कम मत समझो! तुम भगवान् रुद्र के प्रताप से ही इस पर आक्रमण कर सके हो ॥५४॥

**Sanskrit Commentary:—**

अनुनयः क्रोधापनयः। चकारो वाकारार्थः। महर्षेरनुनयो वाऽन्यासां पयस्विनीनां दोग्ध्रीणां गवाम्। विश्राणनात् दानात्। 'त्यागो विहापितं दानमुत्सर्जविसर्जने। विश्राणनं वितरणम्' इत्यमरः। कथं नु शक्यः। न शक्य इत्यर्थः। अत्र हेतुमाह—इमां गां सुरभेः कामधेनोः 'पंचमी विभक्ते' इति पंचमी। अनूनामन्यूनाम्। अवेहि जानीहि। तर्हि कथमस्याः परिहारोऽभूदित्याह—रुद्रौजसेति। अस्यां गवि त्वया कर्त्रा प्रहृतं प्रहारस्तु 'नपुंसके भावे क्तः।' रुद्रौजसा ईश्वरसामर्थ्येन। नतु स्वयमित्यर्थः। 'सप्तम्यधिकरणे' इति सप्तमी।

**Substance in Sanskrit:—**

ननु यत्त्वयोक्तं 'गुरोर्मन्युरन्यासां गवां दानेन विनेतुं शक्यः' इति तन्न संभवति यतः कोटिशोऽपि दोग्ध्रीर्गा दत्वापि नाहं तस्य महर्षेः क्रोधमपनेतुं समर्थः। इयं हि धेनुः स्वमातृसुरभितुल्य-

दिव्यप्रभावाऽत· समस्ताभ्यो लौकिकाभ्यो गोभ्यो विलक्षणैव। भवांश्चास्यां महादेवप्रभावेणैव प्रहारं कर्तुं प्रभवो न खलु स्वीयया शक्त्या।

**सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः।**
**न पारणा स्याद्विहिता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ॥५५॥**

**Prose Order:—**

सा इयम् (गौ·) मया स्वदेहार्पणनिष्क्रयेण भवतः मोचयितुम् न्याय्या; एव तव पारणा विहिता न स्यात् गुरोः क्रियार्थः च अलुप्तः भवेत्।

**English Translation:—**

So it is but proper for me that I should release her from you by offering my own body as ransom; thus neither your meal after the fast will be desecrated nor the means of the sage's religious rites be destoyed. (55)

**Hindi Translation:—**

अतः बदले में अपना शरीर अर्पण कर तुमसे इसे छुड़ाना मेरे लिये उचित ही है। इस प्रकार न तो तुम्हारा व्रतान्त भोजन ही नष्ट होगा और न मुनि के यज्ञादि कर्मों के साधन (इस गौ) का ही नाश होगा ॥५५॥

**Sanskrit Commentary:—**

सेयं गौः। मया (दिलीपेन)। (स्वदेहार्पणनिष्क्रयेण) निष्क्रीयते प्रत्याह्रियतेऽनेन परिग्रहीतमिति निष्क्रयः प्रतिशीर्षकम्।

एरच्' इति अच्प्रत्ययः। स्वदेहार्पणमेव निष्क्रयस्तेन। भवतस्त्वत्तः। पंचम्यास्तसिल्। मोचयितुं (त्याजयितुम्) न्याय्या न्यायादनपेता युक्तेत्यर्थः। 'धर्मपथ्यर्थन्यायादनपेते' इत्यनेन यत्प्रत्ययः। एवं सति तव पारणा (व्रतान्त) भोजनम्। विहता (विनष्टा) न स्यात्। मुनेः क्रिया होमादिः स एवार्थः प्रयोजनम्। स चालुप्तो भवेत्। स्वप्राणव्ययेनापि स्वामि-गुरुधनं संरक्ष्यमिति भावः।

Substance in Sanskrit:—

अतः क्षात्रधर्मस्य पालनार्थं गुरोश्च प्रसन्नतायै भवते स्वशरीरस्य प्रतिदानादवश्यमेव मयाऽस्या धेनोस्त्वत्तो रक्षा कार्या। यतः स्वामिगुरुधनं स्वप्राणव्ययेनापि रक्षणीयम्। एवञ्च तव पारणा विहता न स्यात् नापि महर्षेर्यज्ञादिकर्मणां साधनभूतेयं गौर्विनंक्ष्यति।

**भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ।**
**स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन॥५६**

**Prose Order:—**

परवान् भवान् अपि इदम् अवैति हि देवदारौ तव महान् यत्नः। रक्ष्यम् विनाश्य स्वयम् अक्षतेन (सता) नियोक्तुः अग्रे स्थातुम् न शक्यम्।

English Translation:—

You too, who are dependent as your effort for this tree is so great, know it well that one

having lost his charge and himself being unhurt can not venture to stand before his master. (56)

**Hindi Translation:—**

आप भी पराधीन होकर बड़े यत्न से इस देवदारु की रक्षा करते हो। अतः आप जानते हो कि रक्षा करने योग्य वस्तु का विनाश करवा कर और स्वयं कुशल-पूर्वक रह कर कोई भी (अपने) स्वामी के सामने खड़ा होने का साहस नहीं कर सकता ॥५६॥

Sanskrit Commentary:—

परवान् स्वामिपरतन्त्रो भवानपि। 'परतन्त्रः पराधीनः। परवान्नाथवानपि' इत्यमरः। इदं वक्ष्यमाणमवैति। भवतानुभूयत एवेत्यर्थः। 'शेषे प्रथमः' इति प्रथमपुरुषः। किमित्यत आह—हि यस्माद्धेतोः। 'हेताववधारणे' इत्यमरः। तव देवदारौ विषये महान् यत्नः। महता यत्नेन रक्ष्यते इत्यर्थः। इदंशब्दोक्तमर्थं दर्शयति—स्थातुमिति—रक्ष्यं वस्तु विनाश्य विनाशं गमयित्वा। स्वयमक्षतेनाव्रणेन। नियुक्तेनेति शेषः। नियोक्तुः स्वामिनोऽग्रे स्थातुं शक्यं न हि।

Substance in Sanskrit:—

ननु भवादृशेषु विज्ञेषु बहुविज्ञापनेनालम्। यतो भवानपि मादृशः स्वामिपरतंत्रो महता प्रयासेन देवदारुमिमं रक्षति। अतः सम्यक् जानाति यद्रक्षणीयं वस्तु विनाश्य स्वयञ्चाव्रणो भूत्वा सेवकः स्वामिनमभिमुखं स्थातुं कथं शक्नुयात्।

किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः ।
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु ॥५७॥

**Prose Order:—**

किम् अपि अहम् तव अहिंस्यः मतः चेत् मे यशःशरीरे दयालुः भव, मद्विधानाम् एकान्तविध्वंसिषु भौतिकेषु पिण्डेषु अनास्था खलु ।

**English Translation:—**

But if, on the other hand, you think that I deserve no death, be kind to my body of fame; for people like me have not the least consideration for the inevitably perishable bodies made of gross elements. (57)

**Hindi Translation:—**

और यदि आप किसी कारण वश मुझे वध के योग्य नहीं समझते तो कृपा कर मेरे यश रूपी शरीर की रक्षा कीजिये, क्योंकि मुझ जैसे लोग पञ्च तत्वों से बने हुए ( अतएव ) अवश्य नाशवान् इस शरीर का तनिक भी मोह नहीं करते ॥५७॥

**Sanskrit Commentary:—**

किमपि किंवा । अहम् । तव अहिंस्योऽवध्यो मतश्चेत्तर्हि । मे यश एव शरीरं तस्मिन् ( यशःशरीरे कीर्तिदेहे ) । दयालुः कारुणिको भव । 'स्याद्दयालुः कारुणिकः' इत्यमरः । ननु मुख्यमुपेक्ष्यामुख्यशरीरे कोऽभिनिवेशः । अत आह—एकान्तेति । मद्विधानां मादृशानां विवेकिनाम् । एकान्तविध्वंसिषु अवश्य-विनाशिषु । भौतिकेषु पृथिव्यादिभूतविकारेषु । पिण्डेषु

शरीरेषु। अनास्था खल्वनपेक्षैव। 'आस्था त्वालम्बनास्थानयत्नापेक्षासु कथ्यते' इति विश्वः।

**Substance in Sanskrit:—**

किन्तु यदि भवान् मन्यते 'नाहं भवता केनचिदपि हेतुना वध्य' इति तर्हिभवान्मम यशःशरीरमेव सर्वथा रक्षतु। यतो मादृशाः प्राणिनः पञ्चतत्त्वैर्विनिर्मितं शरीरमिदं न तथाद्रियन्ते यथा स्वकीर्तिम्। कीर्तिर्हि लोके चिरस्थायिनी शरीरन्तु विनाशशाल्येव।

**संबंधमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनान्ते।**
**तद्भूतनाथानुग नार्हसि त्वं संबंधिनो मे प्रणयं विहन्तुम्॥५८॥**

**Prose Order:—**

संबन्धम् आभाषणपूर्वम् आहुः स वनान्ते संगतयोः नौ वृत्तः, तत् (हे) भूतनाथानुग त्वम् संबंधिनः मे प्रणयम् विहन्तुम् न अर्हसि।

**English Translation:—**

Friendship proceeds from conversation, they say; and that has been formed between us after we met together in this forest. Therefore, O attendant of the lord of beings! it does not behove you to reject this request of mine who is now a friend (of yours). (58)

**Hindi Translation:—**

कहा जाता है कि मित्रता का संबंध बातचीत से ही उत्पन्न होता है और वह हम दोनों में वन में परस्पर मिलने से स्थापित

होगया है। अतः हे शिवजी के सेवक! (मित्रता के नाते) मुझ संबंधी की प्रार्थना ठुकराना तुम्हारे लिये उचित नहीं है। ॥५८॥

**Sanskrit Commentary:—**

संबंधं सख्यम्। आभाषणमालापः पूर्वं कारणं यस्य तमाहुः। 'स्यादाभाषणमालापः' इत्यमरः। स तादृक् संबन्धो वनान्ते संगतयोः (मिलितयोः) नौ आवयोर्वृत्तो जातः, तत्ततो हेतोः। हे भूतनाथानुग हे शिवानुचर। एतेन तस्य महत्वं सूचयति। अतएव संबंधिनो मित्रस्य मे प्रणयं याञ्चाम्। 'प्रणयास्त्वमी। विश्रम्भयाञ्चाप्रेमाणः' इत्यमरः। हन्तुं नार्हसि।

**Substance in Sanskrit:—**

हे शिवानुचर! मनीषिणः कथयन्ति यन्मिथो विश्रम्भालाप एव हि मैत्र्याः कारणम्। सम्भाषणेन विना तु न तावत्सुहृत्संबंधः कथमपि संभवति। ननु वनेऽस्मिन्नेकत्र समागमात्परस्परमाभाषणाच्च तत्सुहृत्संबंध आवयोः सञ्जात एव। अत इदानीं मित्रस्य मे प्रार्थनामस्वीकर्तुं भवान् नार्हति।

**तथेति गामुक्तवते दिलीपः सद्यःप्रतिष्टम्भविमुक्तबाहुः।**
**सन्यस्तशस्त्रो हरये स्वदेहमुपानयत् पिण्डमिवामिषस्य ॥५९॥**

**Prose Order:—**

'तथा इति' गाम् उक्तवते हरये सद्यःप्रतिष्टम्भविमुक्तबाहुः न्यस्तशस्त्रः (सन्) सः दिलीपः स्वदेहम् आमिषस्य पिण्डम् इव उपानयत्।

**English Translation:—**

restraint soon as the lion said, 'be it so', threw down his weapons and offered his body like a mass of flesh to the lion. (59)

**Hindi Translation:—**

'ऐसा ही हो' सिंह के ऐसा कहते ही राजा दिलीप की बांह प्रतिबन्ध से छूट गई और तब उसने शस्त्र फेंककर मांस के पिण्ड के समान अपना शरीर सिंह को समर्पित कर दिया ॥५६॥

**Sanskrit Commentary:—**

तथेति गां (वाणीम्)। उक्तवते हरये सिंहाय। 'कपौ सिंहे सुवर्णे च वर्णे विष्णु हरिं विदुः' इति शाश्वतः। सद्यस्तत्क्षणे। (प्रतिष्टम्भविमुक्तबाहुः) प्रतिष्टम्भात् प्रतिबन्धात् विमुक्तो बाहुर्यस्य स दिलीपः। न्यस्तशस्त्रस्त्यक्तायुधः सन्। स्वदेहम् आमिषस्य (मांसस्य)। 'पललं क्रव्यमामिषम्' इत्यमरः। पिण्डं कवलमिव उपानयत् समर्पितवान्। एतेन निर्ममत्वमुक्तम्।

**Substance in Sanskrit:—**

दिलीपस्य प्रार्थनामाकर्ण्य 'अस्तु तथैव कथनं भवतु' इत्युक्त्वा स सिंहः स्वस्वीकृतिमददात्। दिलीपस्य बाहुश्च तत्क्षणमेव प्रतिबन्धादमुच्यत। ततः स शस्त्राणि परित्यज्य स्वशरीरं मांस-पिण्डमिव तस्मै सिंहाय समर्पयामास।

**तस्मिन् क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम्।**
**अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥६०॥**

**Prose Order:—**

तस्मिन् क्षणे उग्रम् सिंहनिपातम् उत्पश्यतः अवाङ्मुखस्य प्रजानाम् पालयितुः उपरि विद्याधरहस्तमुक्ता पुष्पवृष्टिः पपात ।

**English Translation:—**

At that moment, while the protector of (his) subjects, with his face hung down, was expecting the fierce leap of the lion, there fell upon him a shower of flowers let down from the hands of the Vidyadbaras. (60)

**Hindi Translation:—**

उस समय प्रजारक्षक वह राजा नीचा मुख किये ज्योंही सिंह के भयंकर उत्पात की प्रतीक्षा कर रहा था त्योंही विद्याधरों ने अपने हाथों से उस पर फूलों की वर्षा की ॥६०॥

**Sanskrit Commentary:—**

तस्मिन् क्षणे। उग्रम् (भयङ्करम्)। सिंहनिपातम् (सिंहोत्पतनम्)। उत्पश्यत उत्प्रेक्षमाणस्य तर्कयतः। अवाङ्मुखस्याधोमुखस्य। 'स्यादवाङ्प्यधोमुखः' इत्यमरः। प्रजानां पालयितुः राज्ञः। उपरि उपरिष्टात्। 'उपर्युपरिष्टात्' इति निपातः (विद्याधरहस्तमुक्ता) विद्याधराणां देवयोनिविशेषाणां हस्तैर्मुक्ता पुष्पवृष्टिः पपात ।

**Substance in Sanskrit:—**

यदा स राजा सिंहाय स्वदेहमर्पयित्वाऽधोमुखः सन् स्वस्योपरि सिंहस्योत्पतनं प्रतीक्षमाणः स्थित आसीत् तदा तस्योपरि विद्याधरास्तस्यैतेन त्यागेन परमप्रसन्ना भूत्वा पुष्पवर्षामकुर्वन् ।

उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ।
ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ॥६१

**Prose Order:—**

( हे ) वत्स उत्तिष्ठ इति अमृतायमानम् उत्थितम् वचः निशम्य उत्थितः सन् राजा अग्रतः प्रस्रविणीम् गाम् स्वाम् जननीम् इव ददर्श सिंहम् न ( ददर्श ) ।

**English Translation:—**

'Rise O child', hearing these nectar-like words spoken there, the king arose and saw before him no lion, but the cow (standing) like his very mother distilling milk. (61)

**Hindi Translation:—**

'उठो बेटा ! अमृत के समान कहे हुए इन वचनों को सुन कर राजा उठ खड़ा हुआ और उसने अपनी माता के समान (स्तनों से ) दूध बहाती हुई उस गाय को सम्मुख खड़ी हुई देखा किन्तु सिंह को न देखा ॥६१॥

**Sanskrit Commentary:—**

राजा ( अमृतायमानम् ) अमृतमिवाचरतीत्यमृतायमानं तत् 'उपमानादाचारे' इति क्यच् । ततः शानच् । उत्थितमुत्पन्नम् । 'हे वत्स उत्तिष्ठ' इति वचो निशम्य श्रुत्वा । उत्थितः । सन् । अस्तेः शतृप्रत्ययः । अग्रतोऽग्रे ( प्रस्रविणीम् ) प्रस्रवः क्षीरस्रावोऽस्ति यस्याः सा तां प्रस्रविणीं गाम् । स्वां जननीमिव ( मातरमिव ) ददर्श । सिंहं न ददर्श ।

Substance in Sanskrit:—

पुष्पवृष्ट्या सहैव 'वत्स उत्तिष्ठ' इति सहसोत्पन्नं सुधासदृशं वचनं श्रुत्वा स राजा उदस्थात्। स्वमभिमुखञ्च पयः स्रवन्तीं मातृवद्वत्सलां नन्दिनीमेव केवलमपश्यत् सिंहं च नाद्राक्षीत्।

**तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि।**
**ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः॥**

Prose Order:—

धेनुः विस्मितम् तम् उवाच '(हे) साधो! मया मायाम् उद्भाव्य (त्वम्) परीक्षितः असि। ऋषिप्रभावात् अन्तकः अपि मयि प्रहर्तुम् न प्रभुः अन्यहिंस्राः किमुत'।

English Translation:—

Then the cow said to the astounded king, 'O good man! I have merely tested you by creating an illusion; for through the power of the sage, not even the god of death can hurt me, much less other ravenous beasts. (62)

Hindi Translation:—

तब विस्मय में पड़े हुए उस राजा से नन्दिनी ने कहा, हे साधो मैंने माया रचकर तुम्हारी परीक्षा ली थी। अन्यथा महर्षि के प्रताप से यमराज भी मुझ पर प्रहार नहीं कर सकते दूसरे हिंसक जन्तुओं की तो बात ही क्या है॥६२॥

Sanskrit Commentary.—

विस्मितमाश्चर्यं गतम्। कर्तरि क्तः। तं दिलीपम्।

धेनुरुवाच। किमित्यत्राह--'हे साधो! मया मायामुद्भाव्य प्रकल्प्य। परीक्षितोऽसि। ऋषिप्रभावात्। मयि। अन्तकोऽपि यमोऽपि। प्रहर्तुं प्रभुर्न न समर्थः। अन्ये हिंस्रा घातुकाः। 'शरारुर्घातुको हिंस्रः' इत्यमरः। 'नमिकम्पि' इत्यादिना रप्रत्ययः। किमुत सुष्ठु न प्रभव इति योज्यम्। 'बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे' इत्यमरः।

**Substance in Sanskrit:—**

एतद्विस्मयावहं दृश्यमवलोक्य स राजा परमाश्चर्यं गतः। तदा नन्दिनी तमेवं विस्मयमानं दृष्ट्वाऽवोचत्। हे राजन्! अहमेवैतां मायां प्रकल्प्य तव भक्तेः परीक्षां कृतवती। महर्षेः प्रभावाद् यमराजोऽपि मां प्रहर्तुं नालं तर्हि अन्ये हिंस्रपशवः कथं समर्थाः स्युः।

**भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व।**
**न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम्॥६३॥**

**Prose Order:—**

हे पुत्र गुरौ भक्त्या मयि अनुकम्पया च ते (अहम्) प्रीतास्मि, (त्वम्) वरम् वृणीष्व, माम् केवलानाम् पयसाम् प्रसूतिम् न अवेहि (किन्तु) प्रसन्नाम् माम् कामदुघाम् अवेहि।

**English Translation:—**

I am pleased with you, O son, by your devotion to your preceptor and your compassion for me. Now choose a boon. Know me not merely a

source of milk but one who, when pleased, can yield you your desired object. (63)

**Hindi Translation:—**

हे पुत्र ! गुरु में तुम्हारी (दृढ़) भक्ति और मुझ पर इतनी कृपा है, (यह देखकर) मैं तुमसे प्रसन्न हूँ। तुम वर मांगो। मुझे केवल दूध देने वाली ही (साधारण) गाय मत समझो पर प्रसन्न होने पर मैं तुम्हारे मन की अभिलाषा भी पूरी कर सकती हूँ ॥६३॥

**Sanskrit Commentary:—**

हे पुत्र ! गुरौ भक्त्या। मयि अनुकम्पया (दयया) च। (अहम्)। ते तुभ्यं प्रीतास्मि (प्रसन्नास्मि)। 'क्रियाग्रहणमपि कर्तव्यम्' इति चतुर्थी। वरं देवेभ्यो वरणीयमर्थम्। 'देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक् प्रिये' इत्यमरः। वृणीष्व स्वीकुरु। तथाहि। माम्। केवलानां पयसाम् (दुग्धानाम्) प्रसूतिं कारणम्। नावेहि न विद्धि। किन्तु प्रसन्नां माम्। (कामदुघाम्) कामान् दोग्धीति कामदुघा ताम्। अवेहि। 'दुहः कब्घश्च' इति कप्प्रत्ययः।

**Substance in Sanskrit:—**

हे पुत्र ! गुरौ ते दृढभक्त्या मयि च महत्याऽनुकम्पयाऽहं ते सर्वथा प्रसन्नास्मि। अतः स्वाभिलषितं वरं मां याचस्व। मां केवलं दुग्धदात्रीं साधारणां गां न जानीहि अपितु प्रसन्ना भूत्वाऽहं स्वभक्तानां मनोरथानपि पूरयितुं समर्थाऽस्मि।

ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः ।
वंशस्य कर्तारमनन्तकीर्तिं सुदक्षिणायां तनयं ययाचे ॥६४॥

**Prose Order:—**

ततः मानितार्थी स्वहस्तार्जितवीरशब्दः सः हस्तौ समानीय वंशस्य कर्तारम् अनन्तकीर्तिम् तनयम् सुदक्षिणायाम् ययाचे ।

**English Translation:—**

Thereupon, he (the king) who honoured his suppliants and who had won for himself the title of 'hero' by the valour of his arms, folded his hands and solicited that a son be born to Sudak-Sina, who would be the procreator of his race and earn eternal glory. (64)

**Hindi Translation:—**

तब अपने याचकों का सम्मान करने वाले और भुजाओं के पराक्रम से उपार्जित वीर पदवी वाले राजा दिलीप ने दोनों हाथ जोड़कर सुदक्षिणा के गर्भ से ऐसे पुत्र का वरदान मांगा जो उस के वंश का प्रवर्तक और अनन्त कीर्ति का पाने वाला हो ॥६४॥

**Sanskrit Commentary:—**

ततः । मानितार्थी (मानिताः पूजिता अर्थिनो याचका येन सः) । स्वहस्तार्जितो वीर इतिशब्दो येन सः (स्वहस्तार्जितवीरशब्दः) । एतेनास्य दातृत्वं दैन्यराहित्यं चोक्तम् । स राजा । हस्तौ । समानीय संधाय अञ्जलिं बद्ध्वेत्यर्थः वंशस्य कर्तारं प्रवर्तयितारम् । अतएव रघुकुलमिति प्रसिद्धिः ।

अनन्तकीर्तिं स्थिरयशसम्। तनयम्। सुदक्षिणायां ययाचे (याचितवती)।

**Substance in Sanskrit:—**

ततो विक्रमार्जितवीरोपाधिर्याचकानां मनोरथानाञ्च पूरयिता स राजा दिलीपः सविनयमञ्जलिं बद्ध्वा नन्दिनीमयाचत 'सुदक्षिणायामीदृश एकः पुत्रो मे जायतां यो मे वंशस्य प्रवर्तकः स्यादनन्तकीर्तिं च लोके प्राप्नुयात्' इति।

**संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा।**
**दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश॥६५॥**

**Prose Order:—**

सा पयस्विनी सन्तानकामाय राज्ञे तथा इति कामम् प्रतिश्रुत्य हे पुत्र मदीयम् पयः पत्रपुटे दुग्ध्वा उपभुङ्क्ष्व इति तम् आदिदेश।

**English Translation:—**

The milch cow, having promised the boon by saying 'let it be so', to the king who was desirous of progeny, ordered him thus, 'O my child! draw my milk in a leafy cup and drink it up.' (65)

**Hindi Translation:—**

सन्तान की इच्छा करने वाले उस राजा से यह कहकर कि 'ऐसा ही हो' नन्दिनी ने उसे वरदान देने की प्रतिज्ञा की और उसे आदेश दिया कि 'हे पुत्र! पत्ते के दोने में मेरा दूध दुहकर तुम पी लो।'

**Sanskrit Commentary:—**

सा पयस्विनी गौः। [ सन्तानकामाय ) सन्तानं कामयत इति सन्तानकामः। 'कर्मण्यण्' । तस्मै राज्ञे। तथेति। काम्यत इति कामो वरः। कर्मार्थे घञ् प्रत्ययः। तं प्रतिश्रुत्य प्रतिज्ञाय। हे पुत्र! मदीयं पयः (दुग्धम्)। पत्रपुटे पत्र-निर्मिते पात्रे दुग्ध्वोपभुङ्क्ष्व। 'उपयुङ्क्ष्व' इति वा पाठः। पिब इति तमादिदेशाज्ञापितवती।

**Substance in Sanskrit:—**

पुत्रकामस्य राज्ञो वचनं श्रुत्वा नन्दिनी 'तथास्तु' इत्युक्त्वा तस्मै वरं दातुं प्रतिज्ञातवती, एवं च तमाज्ञापयत् हे पुत्र पत्रनिर्मित-पात्रे मम दुग्धं दुग्ध्वा पिब एतेन तवाभिलषितं सेत्स्यति' इति।

**वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः।**
**औधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः॥६६॥**

**Prose Order:—**

हे मातः वत्सस्य होमार्थविधेः च शेषम् तव औधस्यम् रक्षितायाः उर्व्याः षष्ठांशम् इव ऋषेः अनुज्ञाम् अधिगम्य उपभोक्तुम् इच्छामि।

**English Translation:—**

O mother! having obtained the permission of the sage, I desire to drink your milk what will remain after the calf has drunk and after the sacrificial rites (of the sage are accomplished), even as I enjoy one sixth of the produce of the earth, protected by me. (66)

**Hindi Translation:—**

हे माता ! बछड़े के पीने के बाद तथा यज्ञानुष्ठान से बचा हुआ तुम्हारा दूध गुरू की आज्ञा पाकर मैं उसी प्रकार पीना चाहता हूँ जिस प्रकार अपने द्वारा रक्षा की हुई पृथ्वी के छठे भाग का उपभोग करता हूँ ॥ ६६ ॥

**Sanskrit Commentary:—**

हे मातः ! वत्सस्य वत्सपीतस्य शेषम्। वत्सपीतावशिष्ट-मित्यर्थः। होम एव अर्थस्तस्य विधिरनुष्ठानम् तस्य (होमार्थ-विधेः) च शेषम्। होमावशिष्टमित्यर्थः। तव। ऊधसि भवमौधस्यं क्षीरम्। 'शरीरावयवाच्च' इति यत्प्रत्ययः। रक्षि-तायाः (पालितायाः)। उर्व्याः (पृथिव्याः)। षष्ठांशं षष्ठभाग-मिव। ऋषेरनुज्ञाम्। अधिगम्य (प्राप्य)। उपभोक्तु-मिच्छामि। ['धान्यानामष्टमो भागः षष्ठो द्वादश एव वा। आददीताथ षड्भाग द्रुमांसमधुसर्पिषाम्। गन्धौषधिरसानां च पुष्पमूलफलस्य च ॥' इत्यादि मनुवचनानुसारेण राजा षष्ठांशं ग्रह्णीयात्। ]

**Substance in Sanskrit:—**

नन्दिन्या आज्ञां प्राप्य राजा तामवादीत्—'हे मातः ! यथाऽहं प्रजाभ्यो धान्यस्य षष्ठमेव भागं ग्रह्णामि नाधिकं तथैव वत्सस्य दुग्धपानानन्तरं महर्षेश्च यज्ञानुष्ठानस्य समाप्तौ यत्ते दुग्ध-मवशिष्टं भवेत् तदेव गुरोर्वशिष्ठस्यादेशेन धर्मतः पातुमिच्छामि।

**इत्थं क्षितीशेन वशिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव।**
**तदर्चिता-हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ॥६७॥**

तदन्विता

**Prose Order:—**

इत्थम् क्षितीशेन विज्ञापिता वसिष्ठधेनुः प्रीततरा बभूव, तदर्चिता च हैमवतात् कुक्षेः अश्रमेण आश्रमम् प्रत्याययौ ।

**English Translation:—**

Being thus requested by the king, that cow of Vasistha was even more pleased and accompanied by him, returned without fatigue to the hermitage from the cave of the Himalaya. (67)

**Hindi Translation:—**

राजा के इस प्रकार ( नम्रतापूर्वक ) निवेदन करने पर वशिष्ठ जी की गाय और भी अधिक प्रसन्न हुई और उसके साथ बिना परिश्रम के हिमालय की गुफा से आश्रम को लौट आई ॥ ६७ ॥

**Sanskrit Commentary: –**

इत्थम् । ( अमुना प्रकारेण ) । क्षितीशेन (राज्ञा दिलीपेन) विज्ञापिता ( प्रार्थिता ) वसिष्ठस्य धेनुः । प्रीततरा पूर्वं शुश्रूषया प्रीता संप्रति अनया विज्ञापनया प्रीततरा अतिसन्तुष्टा । बभूव । तदर्चिता तेन दिलीपेनार्चिता । हैमवतात् हिमवत्संबन्धिनः । कुक्षेर्गुहायाः सकाशात् । अश्रमेण अनायासेन । आश्रमं प्रत्याययौ आगता च ।

**Substance in Sanskrit:—**

राज्ञः शुश्रूषया पूर्वमेवातिसन्तुष्टा सा धेनुरिदानीं तस्य धर्मयुक्तानि विनीतानि च वचनानि श्रुत्वा तस्मिन्नतितरां प्रसन्नाऽभूत्

तेन च सह श्रमेण विनैव हिमालयस्य गुहाया आश्रमं प्रत्यागता ।

**तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य ।**
**प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव ॥६८॥**

**Prose Order:—**

प्रसन्नेन्दुमुखः नृपाणाम् गुरुः प्रहर्षचिह्नानुमितम् तस्याः प्रसादम् पुनरुक्तया वाचा इव गुरवे निवेद्य प्रियायै शशंस ।

**English Translation:—**

The lord of kings, with his face ( beaming ) like the bright moon, first informed his preceptor, and then told his beloved wife the favour of the cow, in words which were repeated, as it were, for it had already been inferred (by them) from the signs of his great joy. (68)

**Hindi Translation:—**

तब निर्मल चन्द्रमा के समान मुख वाले राजाओं के स्वामी ( दिलीप ) ने उस ( गाय ) की प्रसन्नता गुरु से कहकर अपनी प्रिय पत्नी ( सुदक्षिणा ) से कही । राजा का यह कथन पुनरुक्ति जैसा मालूम पड़ा क्योंकि उसके ( मुख की ) प्रसन्नता के चिह्नों से उन्होंने पहिले ही नन्दिनी की प्रसन्नता का ) अनुमान कर लिया था ॥६८॥

**Sanskrit Commentary:—**

( प्रसन्नेन्दुमुखः ) प्रसन्नेन्दुरिव ( निर्मलचन्द्र इव ) मुखं यस्य सः । ( 'हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः' इत्यमरः ) ।

नृपाणां ( राज्ञां ) गुरुः दिलीपः । ( प्रहर्षचिह्नानुमितम् ) प्रहर्ष-चिन्हैर्मुखरागादिभिरनुमितमूहितम् । तस्या धेनोः । प्रसादमनुग्रहम् । प्रहर्षचिन्हैरेव ज्ञातत्वात् पुनरुक्तयेव वाचा । गुरवे । निवेद्य विज्ञाप्य । पश्चात् प्रियायै ( सुदक्षिणायै ) । शशंस ( अकथयत् ) । कथितस्यैव कथनं पुनरुक्तिः । न चेह तदस्ति । किन्तु चिह्नैः कथितप्रायत्वात्पुनरुक्तयेव स्थितयेत्युत्प्रेक्षा ।

**Substance in Sanskrit:—**

समाराधनेन सन्तुष्टाया नन्दिन्याः स्वाभिलषितं वरं प्राप्य राजराजस्य दिलीपस्य मुखं हर्षेण निर्मलचन्द्र इव बभौ । तादृशं तस्याननं दृष्ट्वैव महर्षिर्वशिष्ठस्तस्य प्रसन्नतायाः कारणमनुमेने । तथापि स राजा स्वस्योपरि नन्दिन्या अनुग्रहस्य वृत्तान्तं पुनरुक्तमिव प्रथमं तावत् स्वगुरवे वशिष्ठाय न्यवेदयत् पश्चात्तु तमेव वृत्तान्तं स्वप्रियपत्न्यै सुदक्षिणायै अकथयत् ।

**स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् ।**
**पपौ वशिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ॥६९॥**

**Prose Order:—**

अनिन्दितात्मा सद्वत्सलः वसिष्ठेन कृताभ्यनुज्ञः सः वत्सहुतावशेषम् नन्दिन्याः स्तन्यम् मूर्तम् शुभ्रं यश इव अतितृष्णः ( सन् ) पपौ ।

**English Translation:—**

Then, being permitted by Vasistha, he of unblemished soul and kind to the good drank eagerly what remained of Nandini's milk after it was sucked by her calf and used for sacrifice, as if it were his own bright fame embodied. (69)

Hindi Translation:—

तब शुद्ध आचरण वाले और सज्जनों के प्रेमी उस राजा ने वशिष्ठ की आज्ञा पाकर बछड़े के पीने और होम करने से बचे हुए नन्दिनी के दूध को मूर्तिमान् ( अपने ) निर्मल यश के समान अत्यन्त उत्कण्ठा के साथ पिया ॥६६॥

Sanskrit Commentary:—

अनिन्दितात्मा अगर्हितस्वभावः। सत्सु वत्सलः प्रेमवान् सद्वत्सलः। 'वत्सांसाभ्यां कामबले' इति लच्प्रत्ययः। वसिष्ठेन कृताभ्यनुज्ञः कृतानुमतिः स राजा। वत्सस्य हुतस्य चावशेषं ( वत्सहुतावशेषं ) पीतहुतावशिष्टम्। नन्दिन्याः स्तन्यं क्षीरम्। शुभ्रं मूर्तं परिच्छिन्नं यश इव। अतितृष्णः सन् पपौ।

Substance in Sanskrit—

ततः पूतात्मा दयालुश्च स राजा होमादिकर्मसु समाप्तेषु वत्से च यथेच्छं पीतवति अवशिष्टं नन्दिन्याः क्षीरं गुरोर्वसिष्ठस्यानुमतिं प्राप्य मूर्तिमत्स्वं यश इवात्युत्कण्ठयाऽपिबत्।

**प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य।**
**तौ दम्पती स्वां प्रति राजधानीं प्रस्थापयामास वशी वसिष्ठः ॥७०**

Prose Order:—

वशी वसिष्ठः प्रातः यथोक्तव्रतपारणान्ते प्रास्थानिकम् स्वस्त्ययनम् प्रयुज्य तौ दम्पती स्वाम् राजधानीम् प्रति प्रस्थापयामास।

English Translation:—

Then in the next morning, after the meal at

the conclusion of the aforesaid vow was over, the self-restrained Vasistha, having pronounced his auspicious blessings suitable to the occasion of departure, dismissed the royal couple for their capital. (70)

**Hindi Translation:—**

दूसरे दिन प्रातःकाल पूर्वोक्त ( गोसेवारूप ) व्रत के समाप्त होने पर राजा के पारणा करने के पश्चात् जितेन्द्रिय वशिष्ठ ने प्रस्थान सम्बन्धी शुभाशीर्वाद देकर उन दोनों राज दम्पती को राजधानी की ओर जाने का आदेश दिया ॥७०॥

**Sanskrit Commentary:—**

वशी जितेन्द्रियः । वसिष्ठः । प्रात । यथोक्तस्य पूर्वोक्तस्य । व्रतस्य गोसेवारूपस्य । अङ्गभूता या पारणा तस्या अन्ते ( यथोक्तव्रतपारणान्ते ) । प्रास्थानिकं प्रस्थानकाले भवम् । तत्कालोचितमित्यर्थः । 'कालाट्ठञ्' इति ठञ् प्रत्ययः । यथाकथञ्चिद् गुणवृत्त्याऽपि काले वर्तमानत्वात्प्रत्यय इष्यते' इति वृत्तिकारः । ( स्वस्त्ययनम् ईयते प्राप्यतेऽनेनेति अयनं स्वस्त्ययनं शुभाशीर्वादम् । प्रयुज्य । तौ दम्पती । स्वां राजधानीं प्रति प्रस्थापयामास ( प्रेषयाञ्चकार ) ।

**Substance in Sanskrit:—**

अन्येद्युः प्रातरेव पूर्वोक्तस्य गोसेवारूपव्रतस्य समाप्तौ तदङ्गभूतां पारणां कृतवति राजनि जितेन्द्रिया वशिष्ठः प्रस्थानकालोचितं माङ्गलिकं कृत्वा शुभाशीर्वादञ्च दत्वा तौ राजमहिष्यौ राजधानीमयोध्यां प्रति प्रेषयामास ।

प्रदक्षिणीकृत्य हुतं हुताशमनन्तरं भर्तुररुन्धतीं च ।
धेनुं सवत्सां च नृपः प्रतस्थे सन्मङ्गलोदग्रतरप्रभावः ॥७१॥

**Prose Order:—**

नृपः हुतम् हुताशम् भर्तुः अनन्तरम् अरुन्धतीम् च सवत्साम् धेनुम् च प्रदक्षिणीकृत्य सन्मङ्गलोदग्रतरप्रभावः सन् प्रतस्थे ।

**English Translation:—**

Then, after going round the sacrificial fire to which an oblation was offered, then round his preceptor and his wife Arundhati, and then round the cow with her calf, the king set out with his majesty rendered more resplendent by the *auspicious rites (performed at his departure).* (71)

***Hindi Translation:—***

माङ्गलिक कर्मों के करने से बढ़े हुए प्रताप वाले उस राजा ने होम की हुई अग्नि, गुरु वशिष्ठ और उनके पीछे अरुन्धती तथा बछड़े सहित गाय की प्रदक्षिणा करके ( राजधानी की ओर ) प्रस्थान किया ॥७१॥

**Sanskrit Commentary:—**

नृपो हुतं तर्पितम् । हुतमश्नातीति हुताशोऽग्निः । 'कर्मण्यण्' । तम् । मुनेरनन्तरम् । प्रदक्षिणानन्तरमित्यर्थः । अरुन्धतीं च सवत्सां धेनुं ( नन्दिनीं ) च प्रदक्षिणीकृत्य प्रगतो दक्षिणं प्रदक्षिणम् 'तिष्ठद्गुप्रभृतीनि च' इत्यव्ययीभावः । ततश्च्विः । अप्रदक्षिणं प्रदक्षिणं संपद्यमानं कृत्वा प्रदक्षिणीकृत्य ।

सद्भिर्मङ्गलैः प्रदक्षिणादिभिमङ्गलाचारैः। ( उदग्रतरः प्रकृष्टतरः प्रभावो यस्य सः ) उदग्रतरप्रभावः सन् प्रतस्थे।

**Substance in Sanskrit:—**

प्रस्थानवेलायां विहितैरनेकविधमङ्गलाचारैर्वृद्धतरप्रभावो महाराजो दिलीप पूर्वं होमाग्नेस्ततो वशिष्ठस्य तदनु च तत्पत्न्या अरुन्धत्यास्ततश्च सवत्साया नन्दिन्या यथाक्रमं प्रदक्षिणां विधाय स्वराजधानीमयोध्यां प्रति प्रातिष्ठत।

**श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः।**
**ययावनुद्घातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन ॥७२॥**

**Prose Order:—**

धर्मपत्नीसहितः सहिष्णुः सः श्रोत्राभिरामध्वनिना अनुद्घात-सुखेन रथेन स्वेन पूर्णेन मनोरथेन इव मार्गम् ययौ।

**English Translation:—**

Then the enduring king, accompanied by his lawful consort, went on his way in a chariot, the sound where of was pleasing to the ear and which was comfortable as it was free from jolts, as if (carried) by his own desire which had now been fulfilled. (72)

**Hindi Translation:—**

तब वह सहनशील राजा अपनी धर्मपत्नी के साथ कानों को मधुर लगने वाली ध्वनि वाले और ठोकर रहित होने से सुखदायक रथ में चढ़ कर मार्ग में इस प्रकार जाने लगा मानों अपने सफल हुए मनोरथ पर चढ़ कर जा रहा हो ॥७२॥

**Sanskrit Commentary:—**

धर्मपत्नीसहितः (सुदक्षिणायुक्तः)। सहिष्णुर्व्रतादिदुःखसहनशीलः। स नृपः। श्रोत्राभिरामध्वनिना कर्णाह्लादकरस्वनेन। अनुद्धातः पाषाणादिप्रतिघातरहितः। अतएव सुखयतीति सुखः। तेन रथेन स्वेन पूर्णेन मनोरथेनेव मार्गमध्वानम्। ['अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः' इत्यमरः]। ययौ। मनोरथपक्षे ध्वनिः श्रुतिः। अनुद्धातः प्रतिबन्धनिवृत्तिः।

**Substance in Sanskrit:—**

ततो महत्क्लेशानपि सोढुं क्षमः (सहनशीलः) स राजा स्वधर्मपत्न्या सुदक्षिणया सह श्रोत्रानन्ददायकं ध्वनिं कुर्वन्तं पाषाणादिभिरप्रतिहतगतित्वाच्च परमसुखावहं रथमारुह्य पथि गच्छतिस्म। तदिह 'नासौ राजा रथमारुह्य गतोऽपि तु सफलीभूतं स्वीयमनोरथमेवारुह्यागच्छत्' इति कविरुत्प्रेक्षते।

**तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शिताङ्गम्।**
**नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनाम् ॥७३॥**

**Prose Order:—**

प्रजाः अदर्शनेन आहितौत्सुक्यम् प्रजार्थव्रतकर्शिताङ्गम् तम् (राजानम्) तृप्तिम् अनाप्नुवद्भिः नेत्रैः नवोदयम् औषधीनाम् नाथम् इव पपुः।

**English Translation:—**

With eyes not obtaining *satisfaction*, his subjects drank him up (gazed at him *intently*) who had,

by his absence, caused eagerness (in their hearts to see him) and whose body had emaciated through the (observance) of the vow for a progeny, even as they do newly risen moon, the lord of herbs. (73)

**Hindi Translation:—**

( बहुत दिनों से ) दिखलाई न देने के कारण ( प्रजा के हृदय में देखने की ) उत्कण्ठा उत्पन्न करने वाले और सन्तान की प्राप्ति के लिये व्रत करने से दुर्बल देह वाले उस राजा को प्रजा ने तृप्ति न पाने वाले ( अतएव अत्यन्त तृषित ) नेत्रों से नये उदित हुए चन्द्रमा के समान पी लिया ॥७३॥

**Sanskrit Commentary:—**

अदर्शनेन प्रवासनिमित्तेन । आहितौत्सुक्यं जनितदर्शनोत्कण्ठम् । प्रजार्थेन सन्तानार्थेन व्रतेन नियमेन कर्शितं कृशीकृतमङ्गं यस्य तम् ( प्रजार्थव्रतकर्शिताङ्गम् ) ('प्रजा स्यात्सन्ततौ जने' इत्यमरः ) नवोदयं नवाभ्युदयम् । प्रजास्तृप्तिमनाप्नुवद्भिरतिगृध्नुभिर्नेत्रैः । ओषधीनां नाथं सोममिव । तं राजानम् । पपुः । अत्यास्थया ददृशुरित्यर्थः । चन्द्रपक्षे—अदर्शनं कलाक्षयनिमित्तं प्रजार्थं लोकहितार्थं व्रतं देवताभ्यः कलादाननियमः । 'तं च सोमं पपुर्देवाः पर्यायेणानुपूर्वशः' इति व्यासः । उदय आविर्भावः । अन्यत्समानम् ।

**Substance in Sanskrit:—**

बहुकालं यावत् राजधान्या दूरे स्थितत्वाद् दृष्टिगोचरमनागतं

संप्रति च प्रत्यागतं तमवलोकयितुं समुपजातोत्कण्ठाः प्रजाः सन्तानलाभाय व्रताचरणात् कृशीभूताङ्गं तं राजानं कथमपि तृप्तिमलभमानैरतितृषितैर्नेत्रैस्तथाऽपश्यन् यथा ता नवोदयं प्रपिपच्चन्द्रं विलोकयन्तिस्म ।

**पुरन्दरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः ।**
**भुजे भुजंगेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज ॥७४॥**

**Prose Order:—**

पुरन्दरश्रीः पौरैरभिनन्द्यमानः स (नृपः) उत्पताकम् पुरम् प्रविश्य भुजङ्गेन्द्रसमानसारे भुजे भूयः भूमेः धुरम् आससञ्ज ।

**English Translation:—**

The king, possessing the lustre like that of Indra and greeted by his subjects, now entered his capital with its banners uplifted, and once more took up the yoke of the earth upon his arms that possessed the the strength like that of the lord of serpents. (74)

**Hindi Trnnslatioa:—**

तब इन्द्र के समान कान्ति वाले उस राजा ने नगर में प्रवेश किया, जहाँ पताकायें फहरा रही थीं और प्रजा के लोग उसका स्वागत कर रहे थे। इस प्रकार उसने शेषनाग के समान बलशाली अपनी भुजाओं पर पृथ्वी का भार फिर धारण किया ॥७४॥

Sanskrit Commentary.—

( पुरन्दरश्रीः ) पुरः पुरीरसुराणां दारयतीति पुरन्दरः शक्रः। 'पूः सर्वयोर्दारिसहोः इति खच्प्रत्ययः। 'वाचंयमपुरन्दरौ च' इति मुमागमो निपातितः। तस्य श्रीरिव श्रीर्यस्य स नृपः। पौरैः (नगरवासिभिर्जनैः)। अभिनंद्यमानः। उत्पताकमुच्छ्रितध्वजम्। 'पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम्' इत्यमरः। पुरं प्रविश्य। (भुजगेन्द्रसारे) भुजगेन्द्रेण समानसारे तुल्यबले। 'सारो बले स्थिरांशे च न्याय्ये क्लीब वरे त्रिषु ' इत्यमरः। भुजे भूयो भूमेर्धुरमाससज्ज स्थापितवान्।

Substance in Sanskrit:—

तत इन्द्रतुल्यकान्तिः स राजा नगरं प्राविशत् यत्तस्य स्वागतार्थं पूर्वमेव पताकादिभिरलङ्कृतमासीत्। नगरवासिनो जनाश्च परमाह्लादेन प्रेम्णा च तस्याभिनन्दनमकुर्वन्। राजा च पुना राज्यभारं पर्यग्रहीत।

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम्।
नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः ॥७५॥

Prose Order:—

अथ द्यौः अत्रेः नयनसमुत्थम् ज्योतिः इव, सुरसरित् वह्निनिष्ठ्यूतम् ऐशम् तेजः इव नरपतिकुलभूत्यै राज्ञी गुरुभिः लोकपालानुभावैः अभिनिविष्टम् गर्भम् आधत्त।

**English Translation:—**

Then, just as the heavens bore the luminary (moon) sprung from the eyes of Atri, and as the Ganges (lit. celestial river) bore the luminous seed of Siva emitted by fire, so did the queen bear, for the prosperty of the king's family, the embryo endowed with the mighty splendour of the guardians of regions. (75)

**Hindi Translation:—**

इसके अनन्तर जिस प्रकार आकाश ने अत्रि मुनि के नेत्रों से उत्पन्न ज्योति ( चन्द्रमा ) को धारण किया था और जिस प्रकार देवनदी गङ्गा ने अग्नि के द्वारा फेंके हुए शिवजी के तेज को धारण किया था उसी प्रकार रानी सुदक्षिणा ने राजा (दिलीप) के वंश की विभूति को बढ़ाने के लिये अष्ट लोकपालों के भारी तेजों से युक्त गर्भ को धारण किया ॥७५॥

**Sanskrit Commentary:—**

अथ द्यौः सुरवर्त्म। 'द्यौः स्वर्गसुरवर्त्मनोः' इति विश्वः। अत्रेर्महर्षेर्नयनयोः समुत्पन्नमुत्पन्नं नयनसमुत्थम्। 'आतश्चोपसर्गे' इति कप्रत्ययः। ज्योतिरिव चन्द्रमिवेत्यर्थः। 'अत्रेशः स्याद्-त्रिनेत्रप्रसूतः' इति हलायुधः। चन्द्रस्यात्रिनेत्रोद्भूतत्वमुक्तं हरिवंशे—'नेत्राभ्यां वारि सुस्राव दशधा द्योतयद्दिशः। तद्गर्भं विधिना हृष्टा दिशो देव्यो दधुस्तदा। समेत्य धारयामासुर्न च ताः समशक्नुवन्। स ताभ्यः सहसैवाथ दिग्भ्यो गर्भः प्रभान्वितः।

पपात भासयंल्लोकाञ्छीतांशुः सर्वभावनः' इति। सुरसरिद्गङ्गा। वह्निना निष्ठ्यूतं विक्षिप्तम्। 'च्छ्वोः शूडनुनासिके च' इत्यनेन निपूर्वात्ष्ठीवतेर्वकारस्य ऊठ्। 'नुत्तनुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरिताः समाः' इत्यमरः। ऐशं तेजः स्कन्दमिव। अत्र रामायणम्—'ते गत्वा पर्वतं राम कैलासं धातुमण्डितम्। अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः। देवकार्यमिदं देव समाधत्स्व हुताशन। शैलपुत्र्यां महातेजो गङ्गायां तेज उत्सृज। देवतानां प्रतिज्ञाय गङ्गामभ्येत्य पावकः। गर्भं धारय वै देवि देवतानामिदं प्रियम्। इत्येतद्वचनं श्रुत्वा दिव्यं रूपमधारयत्। स तस्या महिमां दृष्ट्वा समन्तादवकीर्य च। समन्ततस्तु तां देवीमभ्यसिञ्चत पावकः। सर्वस्रोतांसि पूर्णानि गङ्गाया रघुनन्दन।' इति। राज्ञी सुदक्षिणा। नरपतेर्दिलीपस्य कुलभूत्यै संततिलक्षणायै गुरुभिर्महद्भिः। लोकपालानामनुभावैस्तेजोभिः अभिनिविष्टमनुप्रविष्टम्। गर्भमाधत्त। दधावित्यर्थः। अत्र मनुः—'अष्टानां लोकपालानां वपुर्धारयते नृपः।' इति। अत्र 'आधत्त' इत्यनेन स्त्रीकर्तृकधारणमात्रमुच्यते। तथा मंत्रे च दृश्यते—'यथेयं पृथ्वी मह्युत्ताना गर्भमादधे। एवं त्वं गर्भमाधेहि दशमे मासि सूतवे' इत्याश्वलायनानां सीमन्तमन्त्रे स्त्रीव्यापारधारण आधानशब्दप्रयोगदर्शनादिति। मालिनीवृत्तमेतत्। तदुक्तम्—'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात्।

**इति महोपाध्यायकोलाचलमल्लिनाथसूरीश्वरविरचितया सञ्जीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये नन्दिनीवरप्रदानो नाम द्वितीयः सर्गः।**

Substance in Sanskrit:—

तदनन्तरं राज्ञी सुदक्षिणा राज्ञो दिलीपस्य वंशैश्वर्यं प्रवर्धयितुं लोकपालानामंशैर्युक्तं गर्भं तथैवाधारयत् यथा महर्षेरत्रेर्नेत्राभ्या समुत्पन्नं ज्योतिश्चन्द्रं स्वर्गोऽधारयत् यथा च देवनदी गङ्गा वह्निना प्रक्षिप्तं स्कन्दोत्पादकं महादेवस्य तेजो दधौ।

❀ इति शम् ❀



# METRE.

The second canto of Raghuvamsa, with the exception of its concluding verse, is composed in the उपजाति metre which is defined thus:—

'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ।'

i.e. it is formed from the combination of two metres—the इन्द्रवज्रा and the उपेन्द्रवज्रा. In some of its quarters (पाद s) it contains the characteristics of इन्द्रवज्रा while in the others those of उपेन्द्रवज्रा. The concluding verse is composed in the मालिनी metre. All these metres are वर्णवृत्त s i.e. they are regulated by the number of syllables they contain.

इन्द्रवज्रा—is defined as:—'स्यादिन्द्रवज्रा यदि तौ जगौ गः ।' i.e. it consists of 11 syllables in each quater (पाद) arranged according to the गणs as follows:—two तगणs, one जगण and two long syllables.

| तगण | तगण | जगण | गु गु |
|---|---|---|---|
| SSI | SSI | ISI | S S |

उपेन्द्रवज्रा—is defined as:—'उपेन्द्रवज्रा जतजास्ततो गौ ।'

i.e. it also consists of 11 syllables in each पाद arranged as follows:—जगण, तगण, जगण and two long syllables.

| जगण | तगण | जगण | गु गु |
|---|---|---|---|
| ISI | SSI | ISI | S S |

The difference between these two lies only in the 1st syllable which is long in the इन्द्रवज्रा and short in the उपेन्द्रवज्रा.

मालिनी—is defined as:—'ननमयययुतेयं मालिनी भोगिलोकैः'

i.e. it contains 15 syllables in each पाद with यति (stop) at the 7th and the 15th syllable. The arrangement of the गण s is as follows:—two नगण s, one मगण and 2 यगण s.

| न | न | म | य | य |
|---|---|---|---|---|
| III | III | SSS | ISS | ISS |

# NOTES.

## 1. अथ—Then or after this.

This is an indeclinable word (अव्यय) which denotes a sequence as the statement 'कुशशयने निशां निनाय' (Dilipa passed the night on a Kusa-bed in Vasistha's hermitage) at the end of the first canto has preceded the one that begins here. Moreover, it is also connotative of auspiciousness and for this reason it has been very aptly used here as the poet opens a new canto. According to the rules of Sanskrit Poetics auspicious words ought to be used at the beginning, middle and the end of a poem (काव्य), and अथ is regarded as an auspicious word as it has been considered to have come out, along with the sacred word ओङ्कार, from the mouth of Brahma.

"ओङ्कारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्त्वा विनिर्यातौ तेन मांगलिकावुभौ।"

प्रजानाम्—Of the subjects; प्र+जन् (to be born)+ड +टाप्। 'उपसर्गे च संज्ञायाम्' इति डप्रत्ययः। षष्ठी बहुवचन।

अधिपः—Protector; अधि पातीति अधिपः; अधि+पा (to protect)+क; 'आतश्चोपसर्गे' इति कः।

प्रभाते—At dawn; प्र+भा (to shine)+क्त, 'नपुंसके भावे क्तः' इति क्तः; सप्तमी एकवचन।

जाया···माल्याम् जाया—(wife); जन्+यक्+टाप्, 'जनेर्यक्' इति यक्, 'जनसनखनां सञ्झलोः' इति आत्वम्। प्रतिग्राहित—(caused to accept) प्रति+ग्रह्+णिच्+क्त। गन्धश्च माल्यञ्च

इति गन्धमाल्ये (द्वन्द्व); जायया प्रतिग्राहिते गन्धमाल्ये यया सा ताम् (बहुव्रीहि), who was made to accept perfumes and garlands.

मल्लिनाथ remarks here—'जायापदसामर्थ्यात् सुदक्षिणायाः पुत्रजननयोग्यत्वमनुसंधेयम्' i.e. the word जाया snggests that सुदक्षिणा was capable of begetting a son.

वनाय—वनं गन्तुम्—for the forest; the चतुर्थी is accounted for by the rule 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः'

पीत...वत्साम्—पीतः प्रतिबद्धो वत्सो यस्याः सा ताम् (बहुव्रीहि)। (her) *whose calf had* sucked and then been tied again. पीत is derived by मल्लिनाथ as पीतं पानमस्यास्तीति पीतः पीतवानित्यर्थः i. e. which had its fill of drink; पा (to drink)+क्त+अच्। The affix क्त is added here in the sense of an abstract noun, neuter gender 'नपुंसके भावे क्तः' and then अच् is added to it in the sense of possession by 'अर्श आदिभ्योऽच्'। प्रतिबद्ध—tied; प्रति+बध्+क्त।

यशोधनः—whose wealth is glory; यश एव धनं यस्य सः (बहुव्रीहि)। मल्लिनाथ remarks here 'यशोधन इत्यनेन पुत्रवत्ताकीर्तिलोभाद्राजानर्हे गोरक्षणे प्रवृत्त इति गम्यते' i.e. the word यशोधन suggests that the king took to this act of serving the cow, *though unworthy of him*, in order to achieve the fame of having a son.

मुमोच—Let loose; मुच् (to release)+लिट्, Past Perfect; Third Person, Singular.

2. खुर...पांसुम्—खुराणां न्यास इति खुरन्यासः (षष्ठीतत्पु०), तेन

पवित्रः पांसवो यस्य तम् (बहुव्रीहि); the dust of which was purified by the placing of her foot न्यास—Placing; नि+अस् (to throw)+घञ्। पवित्र—Pure; पूञ् (to purify)+इत्र। पांसु—Dust; it also means 'demerits.' अपांसुलानाम्—Of chaste women पांसवः (दोषाः) आसां सन्तीति पांसुलाः स्वैरिण्यः (unchaste women); न पांसुला इत्यपांसुलास्तासाम् (नञ् तत्पुरुष)। पांसुला—पांसु+लच्+टाप् 'सिध्मादिभ्यश्च' इति लच्।

धुरि—At the top. सप्तमी एकवचन of धुर्, a yoke. An yoke is the front part of a carriage, hence धुर् secondarily means 'front', 'top'.

कीर्तनीया—Worthy to be reckoned. कृत् (to mention)+अनीयर्+टाप्। मनुष्य...धर्मपत्नी—धर्मस्य (धर्मार्थं) पत्नीति धर्मपत्नी (षष्ठी तत्पु०) The षष्ठी is here in the sense of तादर्थ्य (for the sake of); hence the समास is just like अश्वघास-[अश्वस्य (अश्वार्थः) घास इति]। मनुष्याणामीश्वर इति मनुष्येश्वरः (ष० तत्पु०)। The lawful consort of the lord of men. मनुष्य - मनु+षुक्+यत् 'मनोर्जातावञ्यतौ षुक् च'। ईश्वर — ईश+वरच् 'स्थेशभासपिसकसो वरच्'। पत्नी—पति+ङीप् 'पत्युर्नो यज्ञसंयोगे' इति नकारादेशः।

श्रुतेः—श्रु+क्तिन्, षष्ठी एकवचन। स्मृतिः स्मृ+क्तिन्।

अन्वगच्छत्—followed; अनु+गम्+लङ् Past Indefinite, Third Person, Singular.

श्रुतेरिवार्थं स्मृतिः—श्रुति means 'revealed', and refers to वेदसंहिता, ब्राह्मण, आरण्यक, उपनिषत् and सूत्रs while by स्मृति is understood 'Remembered law', i e. the law-books of

मनु, याज्ञवल्क्य and others, which comprise the rules for the guidance of man in almost all the spheres of his life. The Smritis are regarded to have been based on the authority of the Srutis and so they lay down nothing which is contrary to the Vedic Code of life. If, however, there arises, in any case, a conflict between the Sruti and the Smriti, the former has the preference. Cf.:—

'श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्यं स्मार्तं वैदिकवत् सता' ॥ इति जाबालिः ॥

Thus the simile (उपमा) is very appropriate here. सुदक्षिणा following the path of the cow is compared to स्मृति following the sense of श्रुति ।

3. निवर्त्य—Having asked to return; नि+वृत् (to happen)+णिच्+ल्यप् । दयिताम्—Beloved; दय् (देङ् to protect) +क्त+टाप्, द्वि०ए० व० । दयालुः—Kind; दय्+आलुच् । 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' इति आलुच् ।

सौरभेयीम्—The daughter of सुरभि; सुरभि+ढक्+ङीप् । द्वि०ए०व०. सुरभिः—Shining, handsome. This is a very appropriate epithet of the king, as the poet seems to suggest, by the close resemblance between सुरभि and सौरभेयीम्, that the king felt almost maternal solicitude for the cow entrusted to his care and so he was capable of protecting her well.

पयोधरी...समुद्राम्—It qualifies both सौरभेयीम् and उर्वीम् । In the case of सौरभेयीम् it will be analysed as पयसा (दुग्धेन) अधरीभूताः (तिरस्कृताः) चत्वारः समुद्रा यस्याः सा ताम् (बहुव्रीहि; पयस्+अधर+च्वि+भू+क्त, 'अभूततद्भावे च्विः') ।

By whose milk the four oceans were excelled, i.e. who possessed more milk in her udders than even the water in the four oceans.

In the case of उर्वीम् it will be explained as धरन्तीति धराः [धृ 'to bear'+अच्, 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति अच्]। पयसां धरा इति पयोधराः (ष० तत्पु०), न पयोधरा इति अपयोधराः (नञ् तत्पु०); अपयोधराः पयोधराः सम्पद्यमानाः कृता इति पयोधरीभूताः (बहुव्रीहि; पयस्+धर+च्वि+भू+क्त); i.e. who had the four oceans turned into four udders.

जुगोप—Protected; गुप् (to protect)+लिट् Past Perfect, Third Person, Singular.

गोरूपधराम्—Which had assumed the form of a cow. धरतीति धरा (धृ+अच्+टाप्); गोरूपस्य धरा इति गोरूपधरा ताम् (ष० तत्पु०)। The Earth is, often, represented in Hindu mythology, as assuming the form of a cow. Cf. कुमारसम्भव 1-2, 'पृथूपदिष्टां दुदुहुर्धरित्रीम्'

The समास in words like पयोधर and गोरूपधरा should be analysed as षष्ठी तत्पु० and not as पयो धरतीति पयोधरः or गोरूपं धरतीति गोरूपधरा as in that case it will be governed by the सूत्र 'कर्मण्यण्' and hence the forms will be पयोधारः and गोरूपधारा just like कुम्भं करोतीति कुम्भकारः। उर्वीम्—उरु+ङीप्; द्वि० ए० व०; 'Earth', 'उपमालंकारः'।

4. वनाय—वनमाचरितुम्, For the forest; the चतुर्थी is used here according to 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः'।

अनुचरेण—By the follower; अनु+चर्+अच्, तृ०ए०व० मल्लिनाथ remarks here 'न तु जीवनाय' i.e. the king followed the cow for the sake of his vow and not for earning his livelihood thereby.

न्यषेधि—Was forbidden; नि+सिध् (to move)+लुङ् Aorist Passive, 3rd pers. Sing.

अनुयायिवर्गः—Troops of attendants. अनु+या+णिनि; अनुयातुं शीलं येषान्तेऽनुयायिनः, 'ताच्छील्ये णिनिः'। अनुयायिनां वर्ग इति अनुयायिवर्गः (ष० तत्पु०)।

अन्यतः—अन्य+तसिल् (from others). शरीररक्षा—शरीरस्य रक्षा इति (ष० तत्पु०). स्ववीर्यगुप्ता—Protected by personal valour. स्वस्य वीर्यमिति स्ववीर्यम् (ष० तत्पु०); स्ववीर्येण गुप्ता इति स्ववीर्यगुप्ता (तृ० तत्पु०)। गुप्ता—गुप् (to protect)+क्त+टाप्।

मनोः—Of Manu The मनु referred to here was the seventh (i.e. वैवस्वत) amongst the 14 Manus mentioned in Hindu mythology and he was the founder of the solar race of kings. प्रसूतिः—प्र+सू+क्तिन्। Descendants.

In this verse the figure of speech (अलंकार) is अर्थान्तरन्यास which is defined as:—

'सामान्यं वा विशेषो वा तदन्येन समर्थ्यते। यत्र सोऽर्थान्तरन्यासः'। The particular statement 'न चान्यतस्तस्य शरीररक्षा' is supported by the general statement स्ववीर्यगुप्ता हि मनोः प्रसूतिः।

5 आस्वादवद्भिः—Tasteful, आस्वाद+मतुप् तृ० ब० व०।

(आस्वाद—आ+स्वद्+घञ्) । कण्डूयनैः – By scratchings; कण्डूय्+ल्युट्. दशनिवारणैः - By warding off gadflies. दंशानां निवारणानि इति दशनिवारणानि तैः (ष० तत्पु०), निवारण—नि+वृ+णिच्+ल्युट् । अव्याहतैः—Unimpeded; न व्याहतैः इति अव्याहतैः (नञ् तत्पु०), व्याहत - वि+आ+हन्+क्त ।

स्वैरगतैः—By free movements. स्व ईरः प्रेरणम् अस्मिन् इति स्वैरम् । 'स्वादीरेरिणोः' इति वार्तिकेन वृद्धिः । स्वैराणि च तानि गतानि तैः (कर्मधारय). सम्राट्—Emperor; सम्यक् राजते इति सम्राट् - सम्+राज्+क्विप्. In the अमरकोश it is defined as 'येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्राट्' । समाराधनतत्परः—Devoted to worship. समाराधने तत्पर इति (स० तत्पु०), समाराधन—सम्+आ+राध् (to serve, चुरादि)+णिच्+ल्युट् । तत्परः—तत् परं (प्रधानं) यस्य सः (बहुव्रीहि) ।

अभूत्—Became; भू+लुङ्; Aorist, 3rd Pers. Sing.
6. स्थितः—स्था+क्त; Past Active Participle स्थिताम्—स्था+क्त+टाप्, द्वि० ए० व० । उच्चलितः—उत्+चल्+क्त । प्रयाताम्—प्र+या+क्त+टाप्, द्वि०ए०व० । निषेदुषीम्—Seated; नि+सद् (to sit) +क्वसु+ङीप्, 'भाषायां सदवसश्रुवः' इति क्वसुः, 'उगितश्च' इति ङीप् । Perfect Participle, द्वि०ए०व० ।

आसनबन्धधीरः—Patiently sitting; आसनस्य बन्ध इति आसनबंधः (उपवेशनम्, tie of seat); षष्ठी तत्पु० । आसनबन्धे धीर इति आसनबंधधीरः (स० तत्पु०) । आसन—आस् (to sit)+ल्युट् धीरः—Steady, firm. जलाभिलाषी—Desirous of water. जलमभिलषतीति जलाभिलाषी, जल+अभि+लष् (to wish) +णिनि । आददानाम्—Taking; आ+दा+शानच्+टाप्,

द्वि०ए०व० । भूपतिः—King; भुवः पतिः इति भूपतिः (ष० तत्पु०). अन्वगच्छत्—Followed, अनु+गम्+लङ्; Past Indefinite, Third Person, Singular.

छायेव—Like a shadow. The shadow of a man follows him closely in his various movements, so did king Dilipa follow the cow in her various actions. Thus it is a very appropriate simile (उपमा). An objection is, however, raised here that the word छाया is feminine, while भूपति who is compared to छाया is masculine and so it involves the defect of लिङ्गभेद between the उपमान and the उपमेय; but this can be waived by the rule 'यत्र लिङ्गवचनभेदेऽपि न साधारणधर्मस्यान्यथाभावस्तत्र न दोषः' (सा०द०); as there is no alteration of the common property between the उपमान and the उपमेय here. Cf. also दण्डिन् 'न लिङ्गवचने भिन्ने न हीनाधिकतापि वा । उपमादूषणायालं यत्रोद्वेगो न धीमताम् ।' इति ।

7. न्यस्तचिह्नाम्—Whose (extraneous) marks were cast aside. न्यस्तानि चिह्नानि यस्याः सा ताम् (बहुव्रीहि)। न्यस्त – नि+अस् (to throw)+क्त । चिह्न – Mark such as राजछत्र, चामर etc. राजलक्ष्मीम्—Royal Majesty; राज्ञो लक्ष्मीरिति राजलक्ष्मीस्ताम् (ष०तत्पु०) । तेजोविशेषानुमिताम्—Inferred from (his) peculiar lustre. तेजसो विशेष इति तेजोविशेषः (ष० तत्पु०), तेन अनुमिता ताम् (तृ० तत्पु०) । दधानः—Bearing; धा (to bear)+ शानच्; Present Participle, आत्मनेपद । आसीत्—अस् (to be) +लङ्, 'अस्तिसिचोऽपृक्ते' इति ईडागमः । Past Indefinite, 3rd. Person Sing. आसीदनाविष्कृतदानराजिः—With the line of his ichor yet

unmanifested. आविष्कृता—आविस्+कृ+क्त+टाप्। न आविष्कृता इति अनाविष्कृता (नञ् तत्पु०), दानस्य राजिरिति दानराजिः (ष० तत्पु०); अनाविष्कृता दानराजिर्यस्य सः (बहुव्रीहि)।

अन्तर्मदावस्थः—An elephant with the state of his rut present within. There are four kinds of elephants mentioned by वल्लभ – भद्र, मन्द, मृग and संकीर्ण and of them भद्र is said to be अन्तर्मद। मदस्य अवस्था इति मदावस्था (ष० तत्पु०), अन्तर्गता मदावस्था यस्य सः (बहुव्रीहि)।

द्विपेन्द्रः—Lord of elephants; द्वाभ्यां पिबतीति द्विपः—द्वि+पा+क; द्विप इन्द्र इव इति द्विपेन्द्रः ('उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति उपमिततत्पुरुषः)। Here there is उपमालंकार।

8. लता...ग्रथितैः – Tied with the tendrils of creepers. प्रतान—Tendrils; प्र+तन (to expand)+घञ्। उद्ग्रथित—Tied; उत्+ग्रथ्+क्त; लतानां प्रताना इति लताप्रतानाः (ष० तत्पु०); तैरुद्ग्रथिता इति लताप्रतानोद्ग्रथितास्तैः (तृ० तत्पु०)।

केशैः – By the hair. The तृतीया is used here by the rule 'इत्थंभूतलक्षणे' in the sense of केशैरुपलक्षितः i.e. distinguished by the peculiar mode of his hair.

अधिज्यधन्वा—Having strung his bow. ज्यामधिगतमिति अधिज्यम् ('अत्यादयःक्रान्ताद्यर्थे' इति वार्तिकेन द्वितीया तत्पु०), or it may be analysed as अधिगता ज्या येन तत् अधिज्यम् ('प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' इति वार्तिकेन) बहुव्रीहि) अधिज्यं धनुर्यस्य सोऽधिज्यधन्वा (बहुव्रीहि) 'धनुषश्च' इत्यनङ् अधि+ज्या+धनुष्+अनङ्।

विचचार—Roamed about. वि+चर्+लिट् Past

Perfect, 3rd Person Singular. रक्षापदेशात्—Under the pretext of protection. रक्षाया अपदेश इति रक्षापदेशस्तस्मात् (ष० तत्पु०) The पञ्चमी is in the sense of हेतु.

मुनिहोमधेनोः—Of the sacrificial cow of the sage. होमधेनुः—होमस्य (होमार्था) धेनुरिति (ष० तत्पु० in the sense of तादर्थ्य like अश्वघास), मुनेर्होमधेनुरिति मुनि-होमधेनुस्तस्याः (ष० तत्पु०)।

वन्यान्—Of the forest:—वने भवाः वन्यास्तान्; वन+यत्।

विनेष्यन्—Taming; वि+नि+लृट् (स्य)+शतृ.

दुष्टसत्त्वान्—Wild beasts, दुष्टाश्च ते सत्त्वा इति तान् (कर्मधारय)

In this verse there is the उत्प्रेक्षा अलंकार; the poet fancies that the king's tending the cow was a mere pretext (अपदेश) but his real purpose in roaming about in the forest was to tame and descipline the wild beasts of the forest.

9. विसृष्ट...चरस्य—Of him who had dismissed his attendants. पार्श्वयोरनुचरा इति पार्श्वानुचराः (स० तत्पु०); विसृष्टाः पार्श्वानुचरा येन स तस्य (बहुव्रीहि), विसृष्ट—वि+सृज्+क्त.

पार्श्वद्रुमाः—The trees on either side. पार्श्वयोर्द्रुमा इति (स०तत्पु०); पाशभृता—Varuna (noose-holding). बिभर्तीति भृत्—भृ+क्विप्, पाशस्य भृत् इति पाशभृत् तेन (ष० तत्पु०). The तृतीया is used in connection with समस्य by the rule 'तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्'

उदीरयामासुः—Uttered उत्+ईर् (to throw, चुरादि)+णिच्+लिट्, Past Perfect, 3rd Pers. Plu

उन्मदानाम्—Intoxicated; overjoyed; उत्कटो मदो येषान्तेषाम् (बहुव्रीहि)।

आलोकशब्दम्—The cry of victory; आलोकस्य शब्दस्तम् (ष० तत्पु०). आलोक means 'victory'; 'आलोको जयशब्दः स्यात्' इति विश्वः।

वयसाम्—Of the birds. वयस् is neuter. विरावैः—By the twitters. वि+रु+घञ्, तृ० ब० व०, 'विभाषाङि रुप्लुवोः' इति वा घञ्। Heie is also उत्प्रेक्षालंकार।

10 मरुत्प्रयुक्ताः—Shaken by the wind. मरुता प्रयुक्ता इति मरुत्प्रयुक्ताः (तृ० तत्पु०)। प्रयुक्ताः—Prompted; प्र+युज्+क्त+टाप् प्रथमा बहु व०।

मरुत्सखाभम् Shining like the friend of wind (i e. fire); मरुतः सखा इति मरुत्सखः (ष० तत्पु०) 'राजाहः सखिभ्यष्टच् इति टच्प्रत्ययः), स इवाभातीति मरुत्सखाभः (उपमान-पूर्वपद कर्मधारय), आभा—आ+भा+क 'आतश्चोपसर्गे' इति।

Or it may be analysed as मरुत्सखस्य आभा इव आभा यस्य सः (बहुव्रीहि)।

अर्च्यम्—Worthy of honour; ऋच्+ण्यत्; 'ऋहलोर्ण्यत्' इति ण्यत्। आरात्—Near; अव्यय; it also means 'far'; 'आराद् दूरसमीपयोः' इत्यमरः। अभिवर्तमानम्—Present; अभि-+वृत्+शानच्; द्वि ए० व०; Present Participle, आत्मनेपद।

अवाकिरन्—Scattered; अव+कॄ (to scatter)+लङ् Past Indefinite, 3rd Pers. Plural.

बाललताः—Tender creepers; बालाश्चता लता इति बाललताः (कर्मधारय)।

आचारलाजैः—With fried grains of paddy; आचारस्य

(आचारार्थाः) लाजा इति आचारलाजास्तैः (ष० तत्पु० in the sense of तादर्थ्य) The word लाजाः is always used as masculine plural. It was customany in old days that fried grains of paddy were scattered as a mark of honour over the king when he used to pass through the city.

पौरकन्याः—पौराश्च ता कन्या इति पौरकन्याः (कर्मधारय); maidens of the city; पुरे भवाः पौराः—पुर+अण्।

11 धनुर्भृतः—Of the archer, बिभर्तीति भृत्—भृ+क्विप्; धनुषो भृत् इति धनुर्भृत् (ष० तत्पु०)

दयार्द्रभावम्—Filled with feelings tender with compassion; दयया आर्द्र इति (तृ० तत्पु०); दयार्द्रो भावो यस्य स तम् (बहुव्रीहि)। आख्यातम्—Proclaimed; known; आ+चक्षिङ् (to speak)+क्त। विशङ्कैः—Fearless; विगता शङ्का येभ्यस्तैः (बहुव्रीहि)। विलोकयन्त्यः—Looking at, वि+लोकृ (to see) +णिच्+शतृ+ङीप्। आपुः- Gained; आप्+लिट्, Past Perf. 3rd Pers. Plural.

प्रकाम...फलम्—The fruit of the wide expanse (of their eyes); प्रकामश्चासौ विस्तार इति प्रकामविस्तारः (कर्मधारय), तस्य फलम् (ष० तत्पु०); विस्तार—वि+स्तॄ+घञ्।

The fact that the deer looked at the king intently with fearless hearts, inspite of his wielding a bow, shows that he had a kind and lovely aspect.

12 कीचकैः—By means of sounding bamboos. चीक्+वुन (अक); चीकति; चीकयते वा; the transposition of letters is effected by the उणादि सूत्र 'चीकयतेराद्यन्तविपर्ययश्च'।

मारुतपूर्णरन्ध्रैः—With their holes filled with wind; पूर्ण—पॄ (to fill) +क्त; मारुतेन पूर्णानि इति मारुतपूर्णानि (तृ०तत्पु०); मारुतपूर्णानि रन्ध्राणि येषान्तैः (बहुव्रीहि). कूजद्भिः—Making sound; कूज् (to coo)+शतृ; तृ०ब०व० ।

आपादितवंशकृत्यम्—Wherein the purpose of a flute was served (by the bamboos); आपादित—आ+पद् (to get)+णिच्+क्त; वंशस्य कृत्यमिति वंशकृत्यम् (ष०तत्पु०); आपादितं वंशकृत्यं यस्मिन् कर्मणि यथा स्यात् तथा (बहुव्रीहि) ।

शुश्राव—Heard; श्रु+लिट्; Past Perfect 3rd. Person, Singular. उद्गीयमानम्—Being sung; उत्+गै (to sing)+यत्+शानच्; Present Passive Participle qualifying यशः । वनदेवताभिः By the dryads or wood-nymphs.
13 पृक्तः—Saturated, mixed; पृच्+क्त । तुषारैः—With sprays. गिरिनिर्झराणाम्—Of the mountain-streams; गिरिषु निर्झरा इति गिरिनिर्झरास्तेषाम् (सप्तमी तत्पु०).

अनोकहा··गन्धी—Possessing the fragrance of flowers slightly shaken on the trees. अनोकह—Tree; अनस् (carriage)+अक (movement)+हन्+ड; (अनसः शकटस्य अकं वेगं हन्तीति अनोकहः- Which impedes the movement of a carriage); ईषत् कम्पितानि इति आकम्पितानि (कर्मधारय); तथोक्तानि पुष्पाणि इति आकम्पितपुष्पाणि (कर्मधारय); अनोकहानामाकम्पितपुष्पाणि इति अनोकहाकम्पितपुष्पाणि (ष०तत्पु०); तेषां गन्ध इति (ष०तत्पु०); सोऽस्यास्तीति अनोकहा··गन्धी; गन्धी—गन्ध+इन् । आतपक्लान्तम्—Afflicted with the sun; आतपेन क्लान्तस्तम् (तृ०तत्पु०); आतप—आ+तप्+क; क्लान्त—क्लम् (to be tired) +क्त । अनातपत्रम्—Without umbrella; आतपात्

त्रायते इति आतपत्रम्; आतप+त्रै+क; न विद्यते आतपत्रं यस्य सोऽनातपत्रस्तम् (नञ् बहुव्रीहि)। आचारपूतम्—Pure by conduct; आचारेण पूतस्तम् (तृ०तत्पु०); आचार आ+चर्+घञ्; पूत—पूञ्+क्त। सिषेवे—Attended; सेव्+लिट्। The figure of speech is काव्यलिङ्ग which is defined as 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गम्' (i.e. Kavyalinga is that where the relation between the cause and effect is suggested, and not directly expressed). Here it is suggested that the wind attended him, because he was without umbrella.

14. शशाम—Was quenched; शम्+लिट्. वृष्ट्या By the rain; the तृतीया is used here in connection with विना according to 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम्'।

दवाग्निः—Forest fire; दवस्य अग्निरिति (ष० तत्पु०); दव means 'forest' फलपुष्पवृद्धिः—The exuberance of fruits and flowers; फलानि च पुष्पाणि च इति फलपुष्पाणि (द्वन्द्व); तेषां वृद्धिः (ष० तत्पु०); वृद्धि—वृध् (to grow) +क्तिन्। ऊनम् Weaker. सत्त्वेषु—Among the beasts; 'यतश्च निर्धारणम्' इति सप्तमी। बबाधे—Oppressed; बाध्+लिट्, आत्मनेपद। गोप्तरि—Protector; गुप्+तृच्, स०ए०व०।

गाहमाने On entering; गाह् (to enter)+शानच्, स० ए०व०, 'भावेन च भावलक्षणम्' इति सप्तमी। There is विभावना अलंकार in 'शशाम वृष्ट्यापि विना दवाग्निः' as the effect takes place here even without its cause. 'क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना' इति।

15. सञ्चारपूतानि—Purified by ramblings. सञ्चार—सम्+चर्+घञ्; सञ्चारेण पूतानि इति (तृ०तत्पु०)।

दिगन्तराणि—The regions between the quarters; दिशाम् अन्तराणि इति (ष०तत्पु०); कृत्वा—कृ+क्त्वा। दिनान्ते—At the end of the day; दिनस्य अन्त इति तस्मिन् (ष०तत्पु०).

निलयाय—It means 'for home' in the case of cow and for 'setting' in the case of sunlight. The चतुर्थी stands here according to the rule 'गत्यर्थकर्मणि द्वितीया चतुर्थ्यौ चेष्टायामनध्वनि'। गन्तुम्—To go; गम्+तुमुन्।

प्रचक्रमे—Started; प्र+क्रम्+लिट्, आत्मनेपद, 3rd Person Singular. पल्लवरागताम्रा - Ruddy like the colour of a new leaf. पल्लवस्य राग इति पल्लवरागः (ष०तत्पु०); स इव ताम्रा इति पल्लवरागताम्रा ('उपमानानि सामान्यवचनैः' इति उपमानपूर्वपदतत्पुरुष)। पतङ्गस्य—Of the sun.

Here there is the तुल्ययोगिता अलंकार which is defined, as 'नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता'। i.e तुल्ययोगिता is that where two things, (both objects of description) are connected with one common quality and a comparison between the two is implied. Here the light of the setting sun and the sage's cow are connected with one common quality, i.e 'निलयाय गन्तुं प्रचक्रमे'।

**16.** देवता··क्रियार्थाम्—(Her) who was the means of supplying the necessary articles for the rites of gods, manes and guests. देवताश्च पितरश्च अतिथयश्च इति देवता पित्रतिथयः (द्वन्द्व); तेषां क्रिया इति देवता··क्रियाः (ष०तत्पु०), ता एव अर्थो यस्याः सा ताम् (बहुव्रीहि)। अन्वक् Behind, अव्यय।

ययौ—Went; या+लिट्। मध्यमलोकपाल:—The protector of the middle world (i.e. earth); मध्यमश्चासौ

लोक इति मध्यमलोकः (कर्मधारय), तस्य पाल इति (ष०तत्पु०)।

बभौ – Shone ; भा+लिट्। सतां मतेन—It is connected with both तेन and विधिना. In the case of तेन it means 'esteemed by the good' and in the case of विधिना it means 'approved by the good; सताम् अस्+शतृ, ष०ब०व०। साक्षात्—Actually; अव्यय।

विधिना—By injunction. The word विधि primarily means a 'scriptual injunction'; its secondary sense is 'the performance of a religious rite according to such an injunction.'

उपपन्ना—Accompanied ; उप+पद्+क्त+टाप्।

Here there is उपमा अलंकार. The comparison is as follows:—Just as the faith accompanied by the performance of religious rites as approved by the good looks *graceful, so did the cow look graceful in company of the* king.

17. पल्वलोत्तीर्णवराहयूथानि—Wherein the herds of wild boars were coming out of pools. पल्वल—Pool; उत्तीर्ण—come out; उत्+तॄ+क्त। पल्वलेभ्य उत्तीर्णानि इति पल्वलोत्तीर्णानि (पञ्चमी तत्पु०); वराहाणां यूथानि इति वराहयूथानि (ष०तत्पु०); पल्वलोत्तीर्णानि वराहयूथानि येषु तानि (बहुव्रीहि) आवास''बर्हिणानि—Wherein the peacocks were flying towards their wonted roosts. आवास आ+वास्+घञ् (residence); उद्गतानि मुखानि येषान्ते उन्मुखाः 'बहुव्रीहि', (looking up); बर्हाणि (feathers) सन्ति एषान्ते बर्हिणः, बर्ह+इन् (peacocks); आवासस्य वृक्षा इति आवासवृक्षाः (ष० तत्पु०)। तेषाम् उन्मुखा इति आवासवृक्षोन्मुखाः (ष०तत्पु०); आवास-

वृन्तोन्मुखा बर्हिणो येषु तानि (बहुव्रीहि)। मृगा···शाद्वलानि—In which the deer were squatting on the grassy plots. अध्यासित Squatted; अधि+आस्+णिच्+क्त। शाद्वल—Grassy plots; शाद्+ड्वलच् 'नडशादाड्ड्वलच्' इति। मृगैः अध्यासिता इति मृगाध्यासिताः (तृ०तत्पु०); मृगाध्यासिताः शाद्वला येषु तानि (बहुव्रीहि), श्यामायमानानि—Which were getting dark; अश्यामानि श्यामानि भवन्तीति श्यामायमानानि; श्याम+क्यष्, 'लोहितादिडाज्भ्यः क्यष्' इति क्यष्। पश्यन्—Looking; दृश्+शतृ।

The forests were getting dark by the shade of the approaching evening. मल्लिनाथ, however, takes the epithets पल्वलोत्तीर्ण. etc as accounting for the reason why *the forests* were getting dark. The boars, peacocks and the deer are dark in colour, hence they can also be taken to have increased the darkness. Thus Mallinatha's explanation is not entirely inaddmissible.

18. आपीन···प्रयत्नात्—By the effort of bearing the burden of her udders. आपीन—Udders; आ+प्याय् (*to* swell)+क्त; 'प्यायः पी' इति 'पी' इत्यादेशः। भार—भृञ्+घञ्; उद्वहन—Bearing; उत्+वह् (to *carry*)+ल्युट्; आपीनस्य भार इति आपीनभारः (ष०तत्पु०); तस्य उद्वहनमिति आपीनभारोद्वहनम् (ष०तत्पु०); तस्मिन् प्रयत्नस्तस्मात् (स०तत्पु०); हेतौ पञ्चमी।

गृष्टिः—'सकृत् प्रसूता गौः' i.e. a cow that has calved but once. नरेन्द्रः—नराणामिन्द्र इति (ष० तत्पु०), or नर इन्द्र इव इति नरेन्द्रः (उपमित तत्पु०)। अलञ्चक्रतुः—Decorated; अलम्+कृञ्+लिट्; Past Perfect, 3rd Person, Dual.

अञ्चिताभ्याम्— Adorable; here it means 'lovely'. अञ्च् (to worship)+क्त, Past Passive Participle; तृ०

द्वि०व० । गताभ्याम्—गम्+क्त 'नपुंसके भावे क्तः' तृ०द्वि०व० ।

तपोवनावृत्तिपथम् – The way back to the penance grove. आवृत्तिः—आ+वृत्+क्तिन् । आवृत्तेः पन्था इति आवृत्तिपथः (ष०तत्पु०); तपोवनात् आवृत्तिपथ इति तपोवनावृत्तिपथस्तम् (ष०तत्पु०); here there is समासान्त अप्रत्यय according to 'ऋक्पूरब्धूः पथामानक्षे' ।

19. वशिष्ठधेनोः—वशिष्ठस्य धेनुस्तस्याः (ष०तत्पु०) । अनुयायिनम् अनु+या+णिनि; द्वि०ए०व० । आवर्तमानम्—आ+वृत्+शानच् । वनिता—A woman who loves her husband dearly; 'वनिता जनितात्यन्तानुरागायां च योषिति' इत्यमरः ।

वनान्तात्—From the forest-skirts; वनस्यान्तो वनान्तस्तस्मात् (ष०तत्पु०) । पपौ—Drank; पा (to drink)+लिट्. निमेषालसपक्ष्मपंक्तिः—(the queen) the rows of whose eyelashes were slow in winkling. निमेषेषु अलसा इति निमेषालसा (स०तत्पु०); पक्ष्मणां पङ्क्तिरिति पक्ष्मपंक्तिः (ष०तत्पु०); निमेषालसा पक्ष्मपंक्तिर्यस्याः सा (बहुव्रीहि) ।

उपोषिताभ्याम्—(the eyes) that had fasted (as if). उप+वस्+क्त; तृ० द्वि०व० । The eyes of the Queen having not seen the king for long were feeling extremely anxious and so they were not willing to be closed now by the eyelashes. and thus they were gazing intently at the king.

20. पुरस्कृता –Placed in front; पुरस्+कृ+क्त+टाप् । वर्त्मनि—On the way. पार्थिवेन—By the king; पृथिवी+अण् । प्रत्युद्गता—Welcomed in advance; प्रति+उत्+गम्+क्त+टाप् । पार्थिवधर्मपत्न्या—By the lawful wife of the king; पार्थिवस्य धर्मपत्नी इति तया (ष०तत्पु०); धर्मपत्नी—'तादर्थ्ये ष०

तत्पु०'। तदन्तरे—Between them; तयोरन्तरे इति (ष०तत्पु०) विरराज—Shone; वि+राज् (to shine)+लिट्। दिन''गतेव coming in between the day and night; दिनञ्च क्षपा च इति दिनक्षपे (द्वन्द्व); तयोर्मध्यमिति दिनक्षपामध्यम् (ष०तत्पु०), तस्मिन् गता इति (सप्तमी तत्पु०)। सन्ध्या—Twilight; सन्+ध्यै (to medidate)+अङ्+टाप्। उपमालङ्कारः। It is a fine simile, the point of comparison being:—

1. The king with his bright lustre resembled the day.

2 The queen with his tenderness and beauty looked like the moon-lit night

3. The cow owing to her tawny colour appeared like the ruddy twilight.

Thus the cow looked between them as beautiful as the twilight between day and night

**21** प्रदक्षिणीकृत्य—Having gone round; प्रगतो दक्षिणमिति प्रदक्षिणम् ('प्रादयो गताद्यर्थे प्रथमया' इति गतिसमासः); अप्रदक्षिणं प्रदक्षिणं सम्पद्यमानं कृत्वा इति प्रदक्षिणीकृत्य; प्रदक्षिण+च्वि+कृ+ल्यप्, 'अभूततद्भावे च्विः।'

पयस्विनीम्—cow, पयस्+विन्+ङीप्। साक्षतपात्रहस्ता—With the vessel of whole grains of rice in her hands. न क्षतं येषान्ते अक्षताः। तैः सह विद्यमानमिति साक्षतम् (बहुव्रीहि), साक्षतं पात्रम् इति साक्षतपात्रम् (कर्मधारय); साक्षतपात्रं हस्ते यस्याः सा (बहुव्रीहि); the word हस्त inspite of its being in the locative case is not placed here before (पूर्वनिपात) according to the rule 'सप्तमी विशेषणे बहुव्रीहौ' as the application of this sutra is optional (अनित्य).

Or it may be explained as 'अक्षतानां पात्रमिति अक्षतपात्रम् (तादर्थ्ये ष० तत्पु०), तेन सह विद्यमानौ इति साक्षतपात्रौ (बहुव्रीहि); साक्षतपात्रौ हस्तौ यस्याः सा (बहुव्रीहि) ।

प्रणम्य—Bowing ; प्र+नम्+ल्यप् ।

आनर्च—Worshipped ; अर्च्+लिट्; 'तस्मान्नुट् द्विहलः' इति नुडागमः । शृङ्गान्तरम्—Forehead (lit the space between the horns); शृङ्गयोः अन्तरम् ( मध्यभागः ) इति ( ष० तत्पु० ).

अर्थसिद्धेः—Accomplishment of the desired object. अर्थस्य सिद्धिरिति ( ष० तत्पु० ); सिद्धि सिध्+क्तिन् । Here there is उत्प्रेक्षा अलंकार. The forehead of the cow is fancied by the poet as the door of the fulfilment of her desire.

22 वत्सोत्सुका—Anxious for the calf. वत्से उत्सुका इति ( स० तत्पु० ) । स्तिमिता—Being steady; स्तिम +क्त+टाप् । सपर्याम्—Worship; सपर्+यक्+टाप् । प्रत्यग्रहीत्—Accepted; प्रति+ग्रह+लुङ्; Aorist, 3rd Pers, sing. ननन्दतुः—Were pleased; नन्द्+लिट् । भक्त्या—With devotion; भज्+क्तिन्; तृ० ए० व० ।

उपपन्नेषु—Endowed with ; उप+पद्+क्त; सप्तमी ए० व० । तद्विधानाम्—Of those of her type; तस्या विधा इव विधा येषान्तेषाम् ( बहुव्रीहि ); प्रसादचिह्नानि—The signs of favour, प्रसाद—Favour प्र+सद्+घञ् । प्रसादस्य चिह्नानि इति ( ष० तत्पु० ) पुरःफलानि—पुरोगतानि फलानि येषान्तानि ( बहुव्रीहि ); which have fruit near at hand.

23 सदारस्य—His who was accompanied by his wife. दारैः सह वर्तमान इति सदारस्तस्य ( बहुव्रीहि by 'तेन सहेति तुल्ययोगे' इति )।

निपीड्य—Pressing or shampooing: नि+पीड् (चुरादि)-+ल्यप्। समाप्य—Having finished; सम्+आप्+ल्यप्। सांध्यम्—Of the evening; संध्यायां भवः सांध्यस्तम्। संध्या+अण्। दोहावसाने—At the end of milking; दोहस्य अवसानमिति तस्मिन् ( ष०तत्पु० ); दोह—दुह्+घञ्। अवसान—अव+षो (to end)+ल्युट्; 'आदेश उपदेशेऽशिति' इति आत्वम्।

दोग्ध्रीम्—Cow; दुह्+तृन्+ङीप्। भेजे—Attended; भज्+लिट्, आत्मनेपद। भुजोच्छिन्नरिपुः—Who had smitten his enemies by (the valour of) his arms उच्छिन्न—उत्-+छिद्+क्त; भुजाभ्यामुच्छिन्ना रिपवो येन सः ( बहुव्रीहि )। निषण्णाम्—sitting; नि+सद्+क्त+टाप्।

24. अन्तिक··प्रदीपाम्—(her) near whom were placed oblations and lamps. बलयश्च प्रदीपाश्च इति बलिप्रदीपाः ( द्वन्द्व ); अन्तिके न्यस्ता बलिप्रदीपा यस्याः सा ताम् ( बहुव्रीहि ); न्यस्त—नि+अस्+क्त; अन्वास्य—sitting near, अनु+आस्+ल्यप्। गोप्ता—Protector; गुप्+तृच्। गृहिणीसहायः—who had his wife as his companion; गृहिणी सहायो यस्य सः ( बहुव्रीहि ); सुप्ताम्—स्वप्+क्त+टाप्। The द्वितीया is used here in connection with अनु according to 'कर्मप्रवचनीययुक्ते द्वितीया'।

क्रमेण—The तृतीया stands here in accordance with 'प्रकृत्यादिभ्य उपसंख्यानम्'। संविवेश—Slept; सम्+विश्+लिट्। सुप्तोत्थिताम्—Risen from sleep; पूर्वं सुप्ता पश्चादुत्थिता इति

सुप्तोत्थिता ताम्। स्नातानुलिप्तवत् समासः।

उदतिष्ठत्—Rose; उत्+स्था+लिट्। क्रमेण...संविवेश—There is no पुनरुक्ति here, as मल्लिनाथ explains, due to the use of both क्रमेण and अनु; for क्रमेण refers to the succession of the cow's actions only and अनु refers to those of the king and the cow both.

**25**. इत्थम्—In this way; अव्यय; इदम्+थमु। व्रतम्—Vow; वृञ्+क्त, 'नपुंसके भावे क्तः'। धारयतः—Observing; धृ+णिच्+शतृ, ष०ए०व०. The use of परस्मैपद is not properly correct here as the king was observing the vow for his own benefit; but it may be justified according to the सूत्र 'इङ्धार्योः शत्र-कृच्छ्रिणि' in the sense that the vow was practised with ease प्रजार्थम्—(the vow) whose purpose was to get a progeny. प्रजा एव अर्थो यस्य (यस्मिन् वा) तत् (बहुव्रीहि)। महिष्या—With the queen; मह+टिषच्+ङीष्। महिषी is a queen who is coronated with the king 'कृताभिषेका महिषी' इत्यमरः।

महनीयकीर्तेः—(Of him) whose fame is exalted; महनीया कीर्तिर्यस्य तस्य (बहुव्रीहि); महनीय - मह्+अनीयर्। कीर्ति—कृत्+क्तिन्। व्यतीयुः—Passed away; वि+अति+इण्+लिट्। त्रिगुणानि—Threefold; त्रयो गुणा येषु तानि (बहुव्रीहि)।

दीनोद्धरणोचितस्य—(Of him) who was accustomed to relieve the poor; दीनानामुद्धरणमिति दीनोद्धरणम् (ष०तत्पु०); दीनोद्धरणे उचित इति दीनोद्धरणोचितस्तस्य (सप्तमी तत्पु०); उद्धरण—उत्+हृ+ल्युट्।

It has to be marked that four epithets of the king are

used here from verse 23 to 25 (1) भुजोच्छिन्नरिपुः ; (2) गोप्ता, (3) महनीयकीर्तेः and (4) दीनोद्धरणोचितस्य । The poet seems to have used them with great care as their real significance will shortly be shewn when the king will appear before the lion in all these capacities ;—e g as (गोप्ता) he will try to save नन्दिनी from the lion with the prowess of his arms (भुजोच्छिन्नरिपुः) ; then having failed in his attempts to do so he will regard his glory as being more worthy to be preserved rather than his own body (महनीयकीर्तिः) and so he will try to save the distressed cow (as दीनोद्धरणोचितः) by offering his own body as ransom.

**26** अन्येद्युः—The next day; अन्य+एद्युसुच् ; an अव्यय formed by निपात (i.e. irregularly) according to the सूत्र 'सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरित्यादिः' । The वार्तिककार, however, explains it as 'पूर्वादिभ्योऽष्टभ्योऽन्येद्युसुच्' i.e. एद्युसुच् is to be added to अन्य । आत्मानुचरस्य—Of her attendant; आत्मनोऽनुचर इति तस्य (ष० तत्पु०);

भावम्—Devotion ; भू+घञ्, 'भावः सत्वस्वभावाभिप्रायचेष्टात्मजन्मसु' इत्यमरः । जिज्ञासमाना—Desirous to know; ज्ञा+सन्+शानच्+टाप् । गङ्गा...शष्पम्—गङ्गायाः प्रपात इति गङ्गाप्रपातः (ष०तत्पु०); तस्य अन्तः इति गङ्गा प्रपातान्तः (ष०तत्पु०); तस्मिन् विरूढानि शष्पाणि यत्र तत् (बहुव्रीहि); प्रपातः—प्र+पत्+घञ्; विरूढ—वि+रुह्+क्त । गौरीगुरोः—Gauri's father (i.e. the Himalaya). गौर्या गुरुस्तस्य (ष०तत्पु०). 'गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे' इति विश्वः । आविवेश—Entered; आ+विश्+लिट् । गह्वरम्—Cave; गाह्+ष्वरच् (उणादि) ।

**27**. दुष्प्रधर्षा—Difficult to be assaulted; दुःखेन

प्रधृष्यते इति दुष्प्रधर्षा—दुस्+प्र+धृष्+खल्+टाप्। हिंस्रैः—By the wild beasts; हिंस्+र ; तृ०ब०व०; 'नमिकम्पिस्म्यजसकमहिंस-दीपो रः' इति रप्रत्ययः।

अद्रि⋯क्षणेन—By him who had directed his eyes towards the mountain-beauty. अद्रेः शोभा इति अद्रिशोभा (ष० तत्पु०), तस्यां प्रहितमीक्षणं येन स तेन (बहुव्रीहि); प्रहितम्—प्र+धा+क्त; ईक्षणम्—ईक्ष्+ल्युट्। अलक्षिताभ्युत्पतनः—He whose attack was not noticed; न लक्षितमिति अलक्षितम् (नञ् तत्पु०); unnoticed; अलक्षितमभ्युत्पतनं यस्य सः (बहुव्रीहि); अलक्षित—नञ्+लक्ष्+क्त; अभ्युत्पतनम्—अभि+उत्+पत्+ल्युट्। Sudden spring or assault. प्रसह्य—Forcibly; अव्यय।

सिंह—Derived from हिंस् with क through transposition of letters, 'हिंसेर्वर्णविपर्ययः सिंहो वर्णविपर्ययात्'। Or it may be formed as सिच्+नुम्+ह+क according to the उणादिसूत्र 'सिचेः संज्ञायां हनुमौ कश्च'। किल—अव्यय। Mallinatha takes it to be in the sense of अलीक i.e. false or pretended चकर्ष—Dragged or seized; कृष्+लिट्।

**28** तदीयम्—Belonging to her; तस्या इदं तदीयम्—तद्+छ। आक्रन्दितम्—Cry; आ+क्रन्द्+क्त, 'नपुंसके भावे क्तः'। आर्तसाधोः—Of him who was kind to the distressed. आर्तेषु साधुरिति तस्य (सप्तमी तत्पु०); आर्तः—ऋति (to pity)+घञ्। साधु—साध्+उण्।

गुहा⋯दीर्घम्—Rendered louder by the echo produced in the cave; गुहायां निबद्ध इति गुहानिबद्धः (स० तत्पु०); गुहानिबद्धश्चासौ प्रतिशब्द इति गुहानिबद्धप्रतिशब्दः (कर्मधारय), तेन

दीर्घम् (तृ० तत्पु०); निबद्ध—नि+बन्ध्+क्त; प्रतिशब्दः प्रतिनिधिः शब्द इति प्रतिशब्दः, ('प्रादयो गताद्यर्थे प्रथमया' इति प्रादिसमासः)।

रश्मिषु—In reins; अश्+मि; श is changed to र by 'अश्नोतेरश्च'। The सप्तमी stands here in the sense of करण (instrumental). आदाय—Holding; आ+दा+ल्यप्। नगेन्द्रसक्ताम्—Rivetted on the mountain (beauty); न गच्छतीति नगः (नञ् तत्पु०), नगानाम् इन्द्र इति नगेन्द्रः (ष० तत्पु०), नगेन्द्रे सक्ता ताम् (सप्तमी तत्पु०)। सक्ताम् सञ्ज्+क्त+टाप् निवर्तयामास – caused to return; नि+वृत्+णिच्+लिट्। दृष्टिम्—sight; दृश्+क्तिन्। The figure of speech is उत्प्रेक्षा. The poet fancies here that the eyes of the king recalled by the cry of the cow were held as if in reins and then dragged towards the direction of the cow.

29. पाटलायाम्—Ruddy; qualifying गवि। तस्थिवांसम्—Seated; स्था+क्वसु, Perfect Participle, (a Vedic Form) केसरिणम्—A lion who possesses manes. केसराः सन्ति अस्य इति केसरी; केसर+इन्। 'केसरं हिङ्गुले क्लीबं किञ्जल्के न स्त्रियां पुमान्। सिंहसटायां पुन्नागे बकुले नागकेसरे॥' इति मेदिनी। ददर्श—Saw; दृश्+लिट्। अधित्यकायाम् On the mountain-upland; अधि+त्यकन्+टाप्। 'उपाधिभ्यां त्यकन्नासन्नारूढयोः' इति त्यकन्। धातुमय्याम्—Abounding in minerals; धातु+मयट्+ङीप्, सप्तमी एकवचन। लोध्रद्रुमम्—A kind of tree; लोध्र एव द्रुम इति तम्। सानुमतः—Of the mountain; सानूनि (peaks) सन्ति अस्य इति तस्य; सानु+मतुप्,

ष० ए० व० । प्रफुल्लम्—Fully blooming; प्र+फुल्+अच्। Mallinatha notes another reading here as 'प्रफुल्तम्'। उपमालंकार: ।

**30.** मृगेन्द्रगामी—Who walks like a lion. मृगाणाम् इन्द्र इति मृगेन्द्र: (ष० तत्पु०); मृगेन्द्र इव गन्तुं शीलमस्येति मृगेन्द्रगामी—मृगेन्द्र+गम्+णिनि । वधाय—to kill; हन्+अप्, 'हनश्च वध:' इति अप् वधादेशश्च। 'तुमर्थाच्च भाववचनात्' इति चतुर्थी।

वध्यस्य—Of him who deserved to be killed; हन्+यत्। 'हनो वा यत् वधश्च वक्तव्य:' इति वार्तिककार:। 'शरणं रक्षणे गृहे' इति यादव:। शरण्य:—Refuge of the distressed; protector; शरणे साधुरिति; शरण+यत्। 'तत्र साधु:' इति यत्। जाताभिषङ्ग:—Who had got an insult or defeat; जात: अभिषङ्गो यस्य स: (बहुव्रीहि); जात–जन्+क । अभिषङ्ग—Insult, defeat; अभि+सञ्ज्+क । नृपति:–नृणां पति: इति (प० तत्पु०)। निषङ्गात्—From the quiver; नि+सञ्ज्+वञ्; पञ्चमी ए० व०।

ऐच्छत्—Wished; इष्+लङ्। प्रसभोद्धृतारि:—He who had extirpated his enemies by force; प्रसभेन उद्धृता: अरयो येन स: (बहुव्रीहि)। प्रसभ—Force. उद्धृता–उत्+हृ+क्त। The अनुप्रास is very pleasant here.

**31.** वामेतर:—Right; वामात् इतर इति (प० तत्पु०)। प्रहर्तु:—Of the striker; प्र+हृ+तृच्, प० एक व०। नख'''पत्रे—(In the end) the heron feathers attached to which were decorated with the lustre of the nails.

नखानां प्रभा इति नखप्रभा (ष० तत्पु०); कङ्कस्य पत्राणि इति कङ्कपत्राणि (ष० तत्पु०); कङ्क is a kind of bird. नखप्रभाभिर्भूषितानि कङ्कपत्राणि यस्मिन् तस्मिन् (बहुव्रीहि) सक्ताङ्गुलिः—(The hand) whose fingers were stuck (to the end). सक्ता अङ्गुलयो यस्य स. (बहुव्रीहि)। सक्त—सञ्ज्+क्त। सायकपुङ्खे—In the end of the arrow; सायकस्य पुङ्खस्तस्मिन् (ष० तत्पु०)।

चित्रार्पितारम्भः—Whose action was portrayed in a picture as if; चित्रे अर्पित इति चित्रार्पितः (स० तत्पु०); चित्रार्पित आरम्भो यस्य सः (बहुव्रीहि)। अर्पित—ऋ+णिच्+क्त, (पुगागमश्च)। आरम्भः—आ+रभ+घञ्। अवतस्थे—Remained; अव+स्था+लिट्; आत्मनेपद by the सूत्र 'समवप्रविभ्यः स्थः'। उत्प्रेक्षालंकार।

**32.** बाहु...मन्युः Whose anger was increased by the restraint of his arm. बाह्वोः प्रतिष्टम्भ इति बाहुप्रतिष्टम्भः (ष० तत्पु०), तेन विवृद्धो मन्युर्यस्य सः (बहुव्रीहि)। प्रतिष्टम्भः—प्रति+स्तभ्+घञ्। विवृद्ध—वि+वृध्+क्त।

अभ्यर्णम्—Standing near; an adjective qualifying आगस्कृतम्। अभि+ऋणम्; आगस्कृतम्—The offender; आगस्+कृ+क्त; द्वि० ए० व०। आगः कृतवानिति आगस्कृतम्—(उपपदतत्पुरुष); आगस् means 'offence.' अस्पृशद्भिः—Not touching (or striking); न स्पृशद्भिरिति अस्पृशद्भिः (नञ् तत्पु०) नञ्+स्पृश्+शतृ, तृ० ब० व०। स्वतेजोभिः—By his *own energy*; स्वस्य तेजांसि तैः (ष० तत्पु०)। अदह्यत—Was burnt; दह्+यत्+लङ्, Past Indefinite, Passive, 3rd. Pers. Sing. भोगी—A serpent;

भोग+इन्; भोगा: (hoods) सन्ति अस्येति भोगी।

मन्त्र...वीर्य:—Whose power is paralysed by spells and herbs; मन्त्रश्च ओषधिश्च इति मन्त्रौषधी (द्वन्द्व); मंत्रौषधिभ्यां रुद्धमिति मंत्रौषधिरुद्धम् तृ० तत्पु०); मंत्रौषधिरुद्धं वीर्यं यस्य स: (बहुव्रीहि)। Here there is उपमालंकार।

33. आर्यगृह्यम्—Who was honoured by the good; आर्याणां गृह्यस्तम् (ष० तत्पु०)। आर्य—ऋ+ण्यत्; 'ऋहलोर्ण्यत्'। इति ण्यत्। गृह्यम्—गृह्+क्यप्। निगृहीतधेनु:—Who had seized the cow. निगृहीता धेनुर्येन स: (बहुव्रीहि); निगृहीत—नि+गृह्+क्त।

मनुष्यवाचा—In human voice; मनुष्यस्य वाक् तया (ष० तत्पु०)।

मनुवंशकेतुम्—The banner of Manu's race. मनोर्वंश इति मनुवंश: (ष० तत्पु०), तस्य केतुस्तम् (ष० तत्पु०)।

विस्माययन्—Causing astonishment; वि+स्मिङ् (to insult)+णिच्+शतृ।

Mallinatha notes another reading here as विस्माययन्. He also points out that the परस्मैपद form is grammatically not correct; it should have been विस्मापयमान: (with-शानच्), for according to the सूत्र 'भीस्म्योर्हेतुभये' there should be आत्मनेपद।

विस्मितम्—astonished; वि+स्मिङ्+क्त।

आत्मवृत्तौ—At his own state; आत्मनो वृत्तिस्तस्याम् (ष० तत्पु०)। वृत्ति:—वृत्+क्तिन्।

सिंहोरुसत्त्वम्—Who possessed the strength like

that of a lion. उरुः सत्त्वो यस्य स उरुसत्वः (बहुव्रीहि); सिंह इव उरुसत्व इति सिंहोरुसत्वस्तम् (उपमानपूर्वपदतत्पुरुष)।

निजगाद—Spoke; नि+गद्+लिट्; 3rd. pers sing.

**34.** महीपाल—O king! महीं पालयतीति महीपालस्तत्संबुद्धौ हे महीपाल! (उपपदतत्पुरुष); or पालयतीति पालः, मह्याः पाल इति महीपालस्तत्संबुद्धौ (ष० तत्पु०)। श्रमेण—With exertion; the तृतीया stands here according to the dictum 'गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका' i.e. 'an action which is understood can also imply a case'; here श्रम is the instrument (करण) of the साधनक्रिया which is understood (गम्यमान) and so it takes तृतीया। 'श्रमेण अलम्' is equivalent to 'श्रमेण साध्य नास्ति, अतः साध्याभावाच्छ्रमो न कर्तव्यः'। प्रयुक्तम्—Used; प्र+युज्+क्त।

पादपोन्मूलनशक्ति—Which has the power to uproot trees; पादैः पिबंतीति पादपाः (पाद+पा+क); पादपानामुन्मूलनमिति पादपोन्मूलनम् (ष० तत्पु०); तस्मिन् शक्तिर्यस्य तत् (बहुव्रीहि); उन्मूलन—उत्+मूल्+ल्युट्। शक्ति-शक्ॢ +क्तिन्। रहः—Force शिलोच्चये—On the mountain, शिलानामुच्चयस्तस्मिन (ष० तत्पु०)। उच्चयः—Heap, उत्+चि+अच्, 'एरच्' इति अच्। In this verse there is प्रतिवस्तूपमालंकार which is defined as.—'प्रतिवस्तूपमा तु सा। सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः'। i.e. प्रतिवस्तूपमा is that where 'a single common property stands in two different sentences. Here the common property (i.e, the futility of power) between the उपमान and the उपमेय is stated in the two sentences 'वृथा स्यात्' and 'न मूर्च्छति'।

**35.** कैलासगौरम्—White like the Kailasa. कैलास इव गौरस्तम् (उपमानपूर्वपदतत्पु०); Kailasa is the name of a mountain in the Himalayas and is regarded to be the abode of शिव in Hindu mythology. आरुरुक्षोः—Desirous to mount; आ+रुह्+सन्+उ; ष० ए०व० ।

पादा···पृष्ठम्—Whose back is hallowed by the favour of placing his foot; पादयोरर्पणमिति पादार्पणम् (ष० तत्पु०); तदेव अनुग्रह इति पादार्पणानुग्रहः (कर्मधारय); तेन पूतं पृष्ठं यस्य स तम् (बहुव्रीहि)। अवेहि—Know; अव+इण्+लोट्; Imperative mood, 2nd Person Singular. किङ्करम् Attendant; किम्+कृ+अच्। अष्टमूर्तेः *Of the eight-formed god*; अष्टौ मूर्तयो यस्य स तस्य (बहुव्रीहि). The eight forms of शिव are given in यादव quoted by मल्लिनाथ:—'पृथिवी सलिलं तेजो वायुराकाशमेव च। सूर्याचन्द्रमसौ सोमयाजी चेत्यष्टमूर्तयः' ॥

निकुम्भमित्रम्—निकुम्भस्य मित्रमिति (ष० तत्पु०)। निकुम्भ was an attendant of शिव। वल्लभ says in his commentary that निकुम्भ was the lion of पार्वती।

**36.** पश्यसि—Mallinatha takes it as a काकु which is defined thus in the अमरकोश—'काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः' i.e 'a change of voice caused by any emotion, e.g. grief or fear. Here it implies an emphasis or question.

पुत्रीकृतः—Adopted as son; अपुत्रः—पुत्रः कृत इति पुत्रीकृतः; पुत्र+च्वि+कृ+क्त। वृषभध्वजेन—By the bull-bannered god; वृषभो ध्वजे यस्य तेन (बहुव्रीहि)। हेम··· निःसृतानाम्—Coming out from the breast-like golden

jars; हेम्नः कुम्भ इति हेमकुम्भः (ष० तत्पु०); स एव स्तन इति हेमकुम्भस्तनः (कर्मधारय); तस्मात् निःसृतानि तेषाम् (ष० तत्पु०)। In the case of स्कन्द it should be analysed as हेमकुम्भ इव स्तनस्तस्मात् निःसृतानाम् (उपमान-पूर्वपदतत्पुरुष); i.e. coming out of the breasts resembling golden jars. निःसृतानाम्—निस्+क्त, ष० ब० व० ।

पयसाम्—'Of waters' and also 'of milk', रसज्ञः—Acquainted with the taste, जानातीति ज्ञः; ज्ञा+क; रसस्य ज्ञ इति रसज्ञः (ष० तत्पु०), 'इगुपधज्ञाप्रीकिरः कः' इति कः ।

**37.** कण्डूयमानेन—Scratching; कण्डूय्+शानच्; तृ० ए० व०। कटम्—Temple. वन्यद्विपेन—By the wild elephant; वन्यश्चासौ द्विप इति तेन (कर्मधारय)। वन्यः—वने भव इति; वन+यत्, द्विपः—द्वाभ्यां पिबतीति द्विपः—द्वि+पा+क। उन्मथिता—Was stripped off; उत्+मथ्+क्त+टाप्। अद्रेस्तनया—पार्वती, the daughter of the mountain.

शुशोच—Mourned; शुच्+लिट्। सेनान्यम्—कार्तिकेय, the commander of the divine forces; सेनां नयतीति सेनानी तम् (उपपदतत्पुरुष); सेना+नी+क्विप्, द्वि० ए० व०। आलीढम्—Wounded; आ+लिह् (to lick)+क्त, द्वि० ए० व०। असुरास्त्रैः—By the missiles of the demons; असुराणामस्त्राणि इति तैः (ष० तत्पु०)।

**38.** तदाप्रभृति एव—From that very day; तदा (तत्कालः) प्रभृतिरादिर्यस्मिन् कर्मणि तत्तथा। वनद्विपानाम्—Of the wild elephants; वने भवा द्विपा इति वनद्विपास्तेषाम् (मध्यमपदलोपी समास)। त्रासार्थम्—For scaring away; अद्रिकुक्षौ—In the mountain cave, अद्रेः कुक्षिस्तस्मिन्

(ष० तत्पु०)। व्यापारितः—*Employed*; वि+आ+पृ+णिच्+क्त। शूलभृता—By the trident-bearer god, बिभर्तीति भृत्—भृ+क्विप्; शूलस्य भृत् इति शूलभृत् तेन (ष० तत्पु०)। विधाय—having made; वि+धा+ल्यप्। सिंहत्वम्—सिंह+त्वत्। State of a lion. अङ्कागतसत्ववृत्ति—Wherein the sustenance is (provided by) the animals that might come within reach; अङ्कमागता इति अङ्कागताः (द्वि० तत्पु०); अङ्कागताः सत्वा इति अङ्कागतसत्वाः (कर्मधारय); अङ्कागतसत्वा वृत्तिर्यस्मिन् तत् (बहुव्रीहि) आगतः—आ+गम्+क्त। वृत्तिः—वृत्+क्तिन्।

**39** क्षुधितस्य—Of him who is hungry; क्षुध्+क्त 'वसतिक्षुधोरिट्' इति निष्ठायां नित्यमिट्। तृप्त्यै—For satisfaction, तृप्+क्तिन्; the चतुर्थी stands here in connection with अलम् according to 'नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च'। प्रदिष्टकाला—Who was given the appointed time; प्रदिष्टः कालो यस्याः सा (बहुव्रीहि) प्रदिष्टः—प्र+दिश्+क्त। परमेश्वरेण—*By the Supreme* Lord; परमश्चासौ ईश्वर इति तेन (कर्मधारय)। उपस्थिता—उप+स्था+क्त+टाप्। Coming up; शोणितपारणा—The meal of blood after fast; शोणितस्य पारणा इति (ष० तत्पु०)। सुरद्विषः—of Rahu, the enemy of the gods; द्विषतीति द्विट्—द्विष्+क्विप्; सुराणां द्विट् इति सुरद्विट तस्य (ष० तत्पु०)। चान्द्रमसी—Pertaining to the moon; चन्द्रमस+अण्+ङीप्। According to Hindu mythologoy *the demon Rahu is said to swallow the moon in* her eclipse The moon is full of nectar (सुधा). Thus the उपमा is very appropriate.

**40.** निवर्तस्व—Go back; नि+वृत्+लोट्, आत्मनेपद, मध्यमपुरुष एकवचन। विहाय—Having given up; वि+हा+ल्यप्। दर्शितशिष्यभक्तिः—Who has shown his devotion of a pupil; शिष्यस्य भक्तिरिति शिष्यभक्तिः (ष० तत्पु०), दर्शिता शिष्यभक्तिर्येन स (बहुव्रीहि), दर्शिता—दृश्+णिच्+क्त; शिष्यः—शास्+यत्। भक्तिः—भज्+क्तिन्। रक्ष्यम्—रक्ष्+यत्। अशक्यरक्षम्—Whose protection is impossible; न शक्या इति अशक्या (नञ् तत्पु०); अशक्या रक्षा यस्य तत् (बहुव्रीहि)। शक्य—शक्+यत्। रक्षा—रक्ष्+अङ्+टाप्। शस्त्रभृताम्—बिभ्रतीति भृतः। भृ+क्विप्। शस्त्राणां भृतस्तेषाम् (ष० तत्पु०) or शस्त्राणि बिभ्रतीति शस्त्रभृतस्तेषाम्। क्षिणोति—Damages; क्षिणु (हिंसायाम्)+लट्, वर्तमान।

**41.** प्रगल्भम्—Bold, eloquent. पुरुषाधिराजः—The supreme lord of men; पुरुषाणामधिराज इति (षष्ठी तत्पु०), अधिराजः—अधि+राजन्+टच्, 'राजाहःसखिभ्यष्टच्'। मृगाधिराजस्य—Of the lord of beasts; मृगाणामधिराजस्तस्य (ष० तत्पु०)। निशम्य—Hearing; नि+शम्+ल्यप्। प्रत्याहतास्त्रः—Whose missiles were rendered futile; प्रत्याहतानि अस्त्राणि यस्य सः (बहुव्रीहि)। प्रत्याहत—प्रति+आ+हन्+क्त। गिरिशप्रभावात्—By the power of Siva; गिरौ शेते इति गिरिशः (गिरि+शीङ्+ड, 'गिरौ डश्छन्दसि'); गिरिशस्य प्रभाव इति (ष० तत्पु०); प्रभावः—प्र+भू+घञ्।

अवज्ञाम्—Contempt; अव+ज्ञा+अङ्+टाप्। शिथिलीचकार—Lessened; शिथिल+च्वि+कृ+लिट्।

**42.** प्रत्यब्रवीत्—Replied; प्रति+ब्रूञ्+लङ्। इषुप्रयोगे—In the use of arrows; इषूणां प्रयोग इति (ष० तत्पु०);

प्रयोग—प्र+युज्+घञ्। तत्पूर्वभङ्गे—स एव पूर्वो भङ्गो यस्य तस्मिन् (बहुव्रीहि); वितथप्रयत्नः—Whose effort was fruitless; paralysed; वितथः प्रयत्नो यस्य सः (बहुव्रीहि)। जडीकृतः—अजडो जडः संपद्यमानः कृत इति जडीकृतः—जड+च्वि+कृ+क्त। त्र्यम्बकवीक्षणेन—By the glance of Siva, त्रीणि अम्बकानि (नेत्राणि—eyes) यस्य स त्र्यम्बकः (बहुव्रीहि), तस्य वीक्षणम् तेन (ष० तत्पु०); वीक्षण—वि+ईक्ष्+ल्युट्। मुमुक्षन्—Wishing to hurl; मुच्+सन्+शतृ। प्रथमा एकवचन।

वज्रपाणिः—Indra (lit. who has a thunderbolt in his hand); वज्रं पाणौ यस्य सः (बहुव्रीहि)। त्र्यम्बकवीक्षणेन—The reference here is to the story given in the Mahabharata, Drona Parva. Once the gods being oppressed by the demons who were secure within their three cities, approached Lord Siva for help. On their request Siva began to burn the cities of the demons. Indra went there to witness the scene of destruction and Goddess Durga had also gone there with a child of wonderful effulgence in her lap. Indra, on seeing that child became jealous of him and raised his thunderbolt to destroy him. But his arm was paralysed all of a sudden by the glance of the child. Brahma then asked Indra to propitiate the child which was no other than God Siva himself. Thus Indra's arm was freed from paralysis.

43. संरुद्धचेष्टस्य—Of him whose effort was frustrated. संरुद्धा चेष्टा यस्य तस्य (बहुव्रीहि); संरुद्ध—सम्+रुध्+क्त। कामम्—Verily; अव्यय। हास्यम्—Worthy of ridicule; हस्+ण्यत्। विवक्षुः—Desirous to say; वच्+सन्+उ।

अन्तर्गतम्—Inside the heart; अन्तः गतमिति अन्तर्गतम्। प्राणभृताम्—Of animated beings; प्राणान् बिभ्रतीति प्राणभृतस्तेषाम् (उपपदतत्पुरुष), प्राण+भृञ्+क्विप्। ष० ब० व०। वेद—Know; विद्+लट्, Present Third Person, Singular. अभिधास्ये I will say; अभि+धा+लृट् आत्मनेपद; 1st Person, Singular.

**44.** मान्यः—Worthy of respect; मन्+ण्यत्। मे—मम; the षष्ठी stands here by 'कृत्यानां कर्तरि वा'।

स्थावरजङ्गमानाम् Of the animate and the inanimate; स्थावराश्च जङ्गमाश्च इति स्थावरजङ्गमास्तेषाम् (द्वन्द्व); स्थावर—स्था+वरच्। 'स्थेशभासपिसकसो वरच्'। जङ्गम—गम्+यङ्+अच्; 'भृशार्थे यङ्'। सर्ग··हेतुः—Who is the cause of the creation, preservation and destruction सर्गश्च स्थितिश्च प्रत्यवहारश्च इति सर्गस्थितिप्रत्यवहाराः (द्वन्द्व), तेषां हेतुः (प० तत्पु०)। सर्ग—Creation; सृज्+घञ्। स्थितिः - स्था+क्तिन्। प्रत्यवहार—Destruction; प्रति+अव+हृ+घञ्। आहिताग्नेः—Of him who had maintained the sacred fire. आहितः अग्निः येन स तस्य (बहुव्रीहि)। 'वाहिताग्न्यादिषु' इति आहितशब्दस्य विकल्पेन पूर्वनिपातः। The other form will be अग्न्याहितः। आहित—आ+धा+क्त। नश्यत्—नश्+शतृ; अनुपेक्षणीयम्—Not to be neglected; न उपेक्षणीयमिति अनुपेक्षणीयम्—नञ्+उप+ईक्ष्+अनीयर्।

**45** मदीयेन—Belonging to me; अस्मद्+छ; शरीरवृत्तिम्—Subsistence; शरीरस्य वृत्तिस्ताम् (ष० तत्पु०)। शरीर—शॄ+ईरन्। निर्वर्तयितुम्—To accomplish: निर्+वृत्+णिच्+तुमुन्। प्रसीद—Be pleased; प्र+सद्+लोट्,

2nd Person, Singular. दिना...वत्सा—She whose calf will be anxious (for her); दिनस्य अवसानमिति दिनावसानम् (प० तत्पु०); बालश्चासौ वत्स इति बालवत्सः (कर्मधारय); दिनावसाने उत्सुकः बालवत्सः यस्याः सा (बहुव्रीहि)। अवसान अव+षो+ल्युट्, 'आदेश उपदेशेऽशिति' इति आत्वम्।

दिनावसाने—This is purposely used to excite the lion's pity. विसृज्यताम्—Should be released; वि+सृज्+यत्+लोट्; Imperative, Passive. 3rd Person, Singular

महर्षेः—Of the great sage; महांश्चासौ ऋषिस्तस्य (कर्मधारय)।

**46.** अन्धकारम् Darkness; अन्धं करोति इति अन्धकारः—अन्ध+कृ+अण् (उपपदतत्पुरुष, 'कर्मण्यण्' इति अण्)। गिरिगह्वराणाम्—Of the mountain caves. गिरेर्गह्वराणि तेषाम् (ष० तत्पु०)। दंष्ट्रामयूखैः With the rays of his teeth; दंष्ट्राणां मयूखास्तैः (ष० तत्पु०)। कुर्वन्—कृ+शतृ। भूतेश्वरपार्श्ववर्ती—Attendant of the lord of beings; भूतानामीश्वर इति भूतेश्वरः (प० तत्पु०); पार्श्वे वर्तितुं शीलमस्येति पार्श्ववर्ती (उपपदतत्पुरुष).; पार्श्व+वृत्+णिनि। भूतेश्वरस्य पार्श्ववर्ती इति (प० तत्पु०)। विहस्य—Laughing; वि+हस्+ल्यप्। अर्थपतिम्—To the lord of riches i.e. the king; अर्थानां पतिस्तम् (प० तत्पु०); it is a significant epithet here बभाषे—Spoke; भाष्+लिट्, आत्मनेपद।

**47.** एकातपत्रम्—Which has one umbrella, i.e. unrivalled. एकम् आतपत्रम् यस्मिन् तत् (बहुव्रीहि)। आतपात् त्रायते इति आतपत्रम्—आतप+त्रै+क। प्रभुत्वम् Sovereign; प्रभोर्भावः प्रभुत्वम्; प्रभु+त्वत्। अल्पस्य—The षष्ठी stands

here by 'षष्ठी हेतुप्रयोगे'। हातुम्—To abandon; हा+तुमुन्। इच्छन्—Desiring; इष्+शतृ। विचारमूढः—Foolish in judgement; विचारे मूढ इति (स० तत्पु०); विचार—वि+चर्+घञ्। मूढ—मुह्+क्त।

**48.** भूतानुकम्पा—Compassion for living beings; भूतेषु अनुकम्पा इति (स० तत्पु०)। स्वस्तिमती—Safe, happy; स्वस्ति+मतुप्+ ङीप्। त्वदन्ते—After your death; तव अन्त इति त्वदन्तस्तस्मिन् (ष० तत्पु०)। जीवन्—While living; जीव्+शतृ। शश्वत्—Always; अव्यय। उपप्लवेभ्यः—From calamities; उप+प्लु+अप्। प्रजानाथ—Lord of subjects; प्रजानां नाथ इति तत्संबुद्धौ हे प्रजानाथ (ष०तत्पु०)। पासि—(You) protect; the present tense is use here in the sense of future; thus it is equivalent to पास्यसि (will protect); पा (to protect)+लट्।

**49.** एकधेनोः—Of him who has one cow. एकैव धेनुर्यस्य तस्य (बहुव्रीहि)। अपराधचण्डात् From him who will be enraged at offence, अपराधे चण्ड इति तस्मात् (स० तत्पु०)। अपराध—अप+राध्+घञ्। चण्ड means 'very angry', 'चण्डस्त्वत्यन्तकोपनः' इत्यमरः। गुरोः—From the preceptor; पञ्चमी stands here according to 'भीत्रार्थानां भयहेतुः'। कृशानुप्रतिमात्—From him who is like fire; कृशानुः (fire) प्रतिमा (equal) यस्य सः (बहुव्रीहि), प्रतिमीयते अनया इति प्रतिमा—प्रति+माङ्+अङ्+टाप्। बिभेषि—You fear, भी+लट्, Present tense, 2nd Person Singular..

शक्यः—Possible; शक्+यत्। मन्युः—Anger. विनेतुम्—To be pacified; वि+नी+तुमुन्। स्पर्शयता—By giving;

स्पर्श+णिच्+शतृ, तृ० ए० व०। घटोध्नीः—cows; घटा इव ऊधांसि यासां ताः (बहुव्रीहि); घट+ऊधस्+ङीप्+नङ्, 'ऊधसो नङ्' इति नङ्; द्वि० ब० व०।

**50.** कल्याणपरम्पराणाम्—Series of blessings कल्याणानां परम्परास्तासाम् (ष० तत्पु०)। भोक्तारम् Enjoyer; भुज्+तृन्, द्वि० ए० व०। ऊर्जस्वलम्—Powerful; ऊर्जस्+वलच्। आत्मदेहम्—His body, आत्मनो देहस्तम् (ष०तत्पु०)।

मही··भिन्नम्—Separated only by its contact with the surface of the earth. मह्यास्तलमिति महीतलम् (ष० तत्पु०); महीतलस्य स्पर्शनमिति महीतलस्पर्शनम् (ष० तत्पु०) महीतलस्पर्शनं प्रमाणमस्यासौ महीतलस्पर्शनमात्रम् (बहुव्रीहि), तेन भिन्नम् (तृ० तत्पु०)। स्पर्शनम्—स्पृश्+ल्युट्। भिन्नम्—भिदिर्+क्त।

ऋद्धम्—Prosperous, ऋध् (to grow)+क्त। ऐन्द्रम्—Of Indra; इन्द्र+अण्। आहुः—Say; i.e. the wise say. ब्रूञ्+लट्, Present Tense, 3rd Person, Plural 'ब्रुवः पञ्चानामादित आहो ब्रुवः' इति आहादेशो झेरुसश्च।

**51.** एतावत्—This much; एतद्+वतुप्। 'यत्तदेतेभ्यः परिमाणे वतुप्'। उक्त्वा—Saying वच्+क्त्वा। विरते—On having ceased; वि+रम्+क्त; स०ए०व०। प्रतिस्वनेन—By the echo; प्रतिनिधिः स्वन इति तेन; 'प्रादयो गताद्यर्थे प्रथमया' इति प्रादिसमासः। प्रति+स्वन्+अप्। गुहागतेन—Resounded within the cave; गुहां गतेन इति (द्वि० तत्पु० by 'द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः')। क्षितिपालम्—To the king; क्षितिं पालयतीति क्षितिपालस्तम्। (उपपदतत्पु०)

प्रीत्या—Affectionately; 'प्रकृत्यादिभ्यस्तृतीया' इति तृतीया। अभाषत—Uttered; भाष्+लङ्। आत्मनेपद, 3rd

Person, Singular. Here there is उत्प्रेक्षालंकार।

**52.** देवानुचरस्य—Of the attendant of god (Siva); देवस्यानुचरस्तस्य (ष० तत्पु०); मनुष्यदेवः—मनुष्याणां देवः इति (ष० तत्पु०), or मनुष्यो देव इव इति (उपमिततत्पुरुष)। उवाच—Spoke; वच्+लिट्।

तदध्यासितकातराक्ष्या—(By her) whose eyes were tremulous on account of the assault of the lion तेन अध्यासितमिति तदध्यासितम् (तृ० तत्पु०); तेन कातरे अक्षिणी यस्याः सा तया (बहुव्रीहि)। Or it may be analysed as— तेन अध्यासिता इति तदध्यासिता (तृ० तत्पु०); कातरे च अक्षिणी यस्याः सा कातराक्षी (बहुव्रीहि) तदध्यासिता चासौ कातराक्षी च तया (द्वन्द्व ; 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' इति षच्। 'षिद्गौरादिभ्यश्च' इति ङीष्। अध्यासित—Assault; अधि+आस्+क्त। निरीक्ष्यमाणः—Being looked at; निर्+ईक्ष्+यक्+शानच्; Present Passive Participle; सुतराम्—Very much; अव्यय।

**53.** क्षतात्—From wound or injury; क्षणु+क्त; पञ्चमी stands here by 'भीत्रार्थानां भयहेतुः'; त्रायते—Protects; त्रै+लट्। उदग्रः—Renowned, Prominent; उद्गतमग्रम् यस्य सः (बहुव्रीहि)। क्षत्रस्य—Of the word क्षत्र; क्षत्+त्रै+क। क्षत् means a harm; क्षणु+क्विप्; क्षतः (पञ्चमी ए० व०) त्रायते इति क्षत्रः। इति—By this etymology. रूढः—रुह्+क्त। Is famous तद्विपरीतवृत्तेः—Of him whose acts are contrary to this तस्य विपरीता इति तद्विपरीता (ष० तत्पु०); सा चासौ वृत्तिर्यस्य तस्य (बहुव्रीहि)। विपरीत—वि+परि+इण्+क्त।

उपक्रोशमलीमसैः—Soiled with ignominy; उपक्रोशेन

मलीमसा इति तैः (तृ० तत्पु)०; उपक्रोश—उप+क्रुश्+घञ् (Censure or infamy); मलीमसा:—मलमेषामस्तीति मलीमसा:—( मल+ईमस् ); Dirty.

Compare the idea contained in this verse with that in the following—

'स क्षत्रियस्त्राणसहः सतां यस्तत् कार्मुकं कर्मसु यस्य शक्तिः ।
वहन् द्वयीमप्यफलेऽर्थजाते करोत्यसंस्कारहतामिवोक्तिम्' ॥
(किरात, ३, ४८)

54. अनुनयः—Conciliation; अनु+नी+अच् । विश्राणनात्—By giving; वि+श्रण्+णिच्+ ल्युट् । ष० ए० व० । अन्यपयस्विनीनाम्—Of other cows; अन्याश्च ताः पयस्विन्य इति अन्यपयस्विन्यस्तासाम् (कर्मधारय) । पयस्विनी—पयस्+विन्+ङीप् । अनूनाम्—Not less; equal; न ऊना इति अनूना ताम् (नञ् तत्पु०); नञ्+ऊन+टाप् । सुरभेः— From Surabhi, the पञ्चमी stands here according to 'पञ्चमी विभक्ते' । रुद्रौजसा — By the power of रुद्र; रुद्रस्य ओजस्तेन (ष० तत्पु०) । प्रहृतम्—Attack; प्र+हृ+क्त, 'नपुंसके भावे क्तः' ।

55. स्वदेहार्पणनिष्क्रयेण—By giving my own body as ransom स्वस्य देह इति स्वदेहः (ष० तत्पु०); तस्य अर्पणमिति स्वदेहार्पणम् (ष० तत्पु०); तदेव निष्क्रयस्तेन (कर्मधारय); अर्पण—ऋ+णिच्+ल्युट्; निष्क्रय – निस्+क्री+अच्; 'एरच्' इत्यच्; ransom. न्याय्या—Worthy; deserving; न्याय-यत्+टाप् । 'धर्मपथ्यर्थन्यायादनपेते' इति यत् । मोचयितुम् – To be released; मुच्+णिच्+तुमुन् । भवतः—भवत्+तसिल्, पञ्चम्यास्तसिल् । विहता—Desecrated; वि+हन्+क्त+टाप् । अलुप्तः—Not destroyed; न लुप्त इति अलुप्तः (नञ्

तत्पु०) ; नञ्+लुप्+क्त । क्रियार्थ :—Object of the rites; क्रिया एव अर्थ इति क्रियार्थः । क्रिया कृञ्+यक्+श+टाप्; 'कृञः श च' इति शः ।

**56.** परवान्—Dependent; परस्यायमिति परवान्—पर+वतुप् । अवैति—Know; अव+इण्+लिट् स्थातुम्—To stand, स्था+तुमुन् । नियोक्तुः—Of the employer; नि+युज्+तृच्; प० ए० व० । विनाश्य—Having allowed to be destroyed; वि+नश्+णिच्+ल्यप् । अक्षतेन—न क्षत इति अक्षतस्तेन (नञ् तत्पु०); unhurt.

**57.** किमपि—मल्लिनाथ takes it to mean 'पक्षान्तरे वा' i.e if on the other hand. It may also be explained as 'for some reason or other.' अहिंस्यः—Not deserving to be killed; न हिंस्य इति अहिंस्यः (नञ् तत्पु०); नञ्+हिंस्+यत् ।

मतः—Regarded; मन्+क्त । यशःशरीरे—In the body of fame; यश एव शरीरं तस्मिन् (कर्मधारय) । एकान्तविध्वंसिषु—Necessarily perishable; एकः अन्तः यस्य तत् एकान्तम्—(बहुव्रीहि); एकान्तं विध्वसिन इति एकान्तविध्वंसिनस्तेषु । विध्वंसिन्—वि+ध्वंस्+णिनि ।

मद्विधानाम्—Of people like me; अहमेव विधा येषान्तेषाम् (बहुव्रीहि) । पिण्डेषु In the bodies; अनास्था—Disregard; indifference; आस्थाया अभाव इति अनास्था (नञ् तत्पु०); आस्था—आ+स्था+अङ्+टाप् । भौतिकेषु—Made of elements; भूतानां विकारास्तेषु; भूत+ठक्; There are five gross elements—पृथिवी, अप्, तेजस्, वायु and आकाश । Here there is काव्यलिङ्ग अलंकार as the cause of preserving the body of fame is

expressed in the last sentence Compare this verse with the following verse of भगवद्गीता II, 34.

'संभावितस्य चाकीर्तिर्मरणादतिरिच्यते'।

Cf. also किरात 2 19.

'अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः।
अचिरांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम्॥'

**58.** सम्बन्धः—Relation (of friendship); सम्+बन्ध+घञ्। आभाषणम्—Conversation; आ+भाष्+ल्युट्। वृत्तः—Happened; वृत्+क्त। नौ—आवयोः; Of us two. ष०, द्वि० व०। संगतयोः—Met together; सम्+गम्+क्त, ष०, द्वि० व०। वनान्ते—In the forest; वनस्यान्ते इति (ष० तत्पु०); भूतनाथानुग—O attendant of the lord of beings; भूतानां नाथ इति भूतनाथः (ष० तत्पु०); अनुगच्छतीति अनुगः; अनु+गम्+क। भूतनाथस्य अनुग इति भूतनाथानुगस्तत्संबुद्धौ हे भूतनाथानुग (ष० तत्पु०)। अर्हसि—योग्योऽसि; अर्ह्+लट्। संबंधिनः · संबन्ध+इन्, प० ए० व०। प्रणयम् Request; प्र+नी+अच्; विहन्तुम् to deny; वि+हन्+तुमुन्. Cf:—
'यतः सतां सन्नतगात्रि संगतं मनीषिभिः साप्तपदीनमुच्यते।'
कुमार सं० V, 39.

**59.** गाम्—Words; उक्तवते—वच्+क्तवतु, च० ए०व०। सद्यः· · ·बाहुः—He whose arm was at once released from restraint; सद्यः प्रतिष्टम्भात् विमुक्तो बाहुर्यस्य सः (बहुव्रीहि); सद्यः—At once, अव्यय, प्रतिष्टम्भ—Restraint; प्रति+स्तभ्+घञ्। विमुक्तः—Released; वि+मुच्+क्त। न्यस्तशस्त्रः—Who had cast aside his weapons. न्यस्तानि शस्त्राणि येन सः (बहुव्रीहि); न्यस्त—नि+अस्+क्त। हरये—To the

lion; 'कर्मणा यमभिप्रैति सोऽपि संप्रदानम्' इति चतुर्थी। उपानयत्—Offered; उप+आ+नी+लङ्। आमिषस्य—Of flesh;

**60** पालयितुः—Of the protector; पाल्+तृच्, ष० ए० व०। उत्पश्यतः—Of him who was expecting; उत्+दृश्+शतृ; ष० ए० व०। सिंहनिपातम्—The attack of the lion; सिंहस्य निपातस्तम् (ष० तत्पु०); निपात—नि+पत्+घञ्। उग्रम्—Terrible; अवाङ्मुखस्य—Of him whose face was turned down; अवाङ् मुखं यस्य तस्य (बहुव्रीहि); अव (निम्नम्) अञ्चतीति अवाक्-अव+अञ्च्+क्विप्, पुष्पवृष्टिः—Shower of flowers; पुष्पाणां वृष्टिरिति (ष० तत्पु०)। वृष्टिः—वृषु+क्तिन्। पपात—Fell down; पत्+लिट्। विद्याधरहस्तमुक्तः—Let down from the hands of the विद्याधरs. विद्याधराणां हस्ता इति विद्याधरहस्ताः (ष० तत्पु०); तैर्मुक्ता इति (तृ० तत्पु०)। The Vidyadharas are a species of demigods who are said to reside on the Himalaya and wander about in the air showering celestial flowers whenever they see some mortal performing any meritorious act.

**61.** उत्तिष्ठ—Rise; उत्+स्था+लोट्। अमृतायमानम्—Nectar-like; अमृतमिवाचरतीति अमृतायमानम्, 'उपमानादाचारे' इति क्यच्, ततः शानच्; अमृत+क्यच्+शानच्। उत्थितम्—Born; produced; उत्+स्था। अग्रत—In front; अग्र+तसिल् in the sense of सप्तमी।

प्रस्रविणीम्—Her who possessed good milk. प्रकृष्टः स्रव इति प्रस्रवः (प्रादिसमास); प्रस्रवोऽस्या अस्तीति

प्रस्रविणी ताम् । प्र+स्रु+अच्+इन्+ङीप् । Here there is उत्प्रेक्षालंकार ।

**62.** उद्भाव्य—Having created; उत्+भू+णिच्+ल्यप् । परीक्षितः—Tested; परि+ईक्ष्+क्त । ऋषिप्रभावात्—By the power of the sage; ऋषेः प्रभावस्तस्मात् (ष० तत्पु०); अन्तकः—The god of death; अन्तयतीति अन्तकः—अन्त+वुन् । प्रहर्तुम्—To attack; प्र+हृ+तुमुन् । अन्यहिंस्राः—Other wild beasts; अन्ये च ते हिंस्रा इति (कर्मधारय) हिंस्राः—हिंस्+र ; प्रथमा ब० व० ।

**63.** प्रीता—Pleased; प्रीञ्+क्त+टाप् । वृणीष्व—Choose; वृञ्+लोट । 2nd Pers. Sing प्रसूतिम्—Source; प्र + सू + क्तिन् । कामदुघाम्—Desire-giving; कामान् दोग्धीति कामदुघा ताम् (उपपद तत्पु०); काम+दुह्+कप्+टाप्; 'दुहःकब्घश्च' इति कप् हकारस्य घकारादेशश्च । प्रसन्नाम्—Pleased; प्र+सद्+क्त+टाप् ।

**64** समानीय—Folding together; सम्+आ+नी+ल्यप् । मानितार्थी—Who had honoured his suppliants; मानिता अर्थिनो येन सः (बहुव्रीहि); मानित - मन्+णिच्+क्त । अर्थी—अर्थ+इन् 'अर्थोऽस्यास्तीति अर्थी' । स्व...शब्दः - He who had earned the title of 'hero' with the power of his own arms; स्वस्य हस्तौ इति स्वहस्तौ (ष० तत्पु०); वीर इति शब्दः ( कर्मधारय ); स्वहस्ताभ्यामर्जितो वीरशब्दो येन सः (बहुव्रीहि); कर्तारम्—Procreator; कृ+तृच् । अनन्तकीर्तिम्—Possessing endless glory; अनन्ता कीर्तिर्यस्य स तम् (बहुव्रीहि); अनन्त—नञ्+अन्त; न विद्यतेऽन्तो यस्याः सा अनन्ता । ययाचे—Asked for; याच्+लिट्, आत्मनेपद ।

**65.** सन्तानकामाय – For him who was desirous of progeny; सन्तानं कामयते इति सन्तानकामस्तस्मै (उपपद तत्पुरुष); सन्तान—सम्+तनु+घञ् । काम—कम्+अण्; 'कर्मण्यण्' इति अण् ।

कामम्—Boon; कम्+घञ् । राज्ञे—To the king; the चतुर्थी stands here according to 'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता' as it is governed by प्रतिश्रुत्य (प्रति+श्रु+ल्यप्) । दुग्ध्वा—दुह्+क्त्वा । पत्रपुटे – In a leafy cup; पत्रनिर्मिते पुटे इति (मध्यमपदलोपी समास) । उपभुङ्क्ष्व—Enjoy i.e. drink; उप+भुज्+लोट्, 'भुजोऽनवने' इति आत्मनेपद । आदिदेश—आ+दिश्+लिट् ।

**66.** होमार्थविधेः – Of the performance of sacrificial rites. होम एव अर्थ इति होमार्थः (कर्मधारय); होमार्थस्य विधिरिति होमार्थविधिस्तस्य (ष० तत्पु०); शेषम्—शिष्+घञ् । अनुज्ञाम्—Permission; अनु+ज्ञा+घ+टाप् । अधिगम्य—Having obtained: अधि+गम्+ल्यप् ।

औधस्यम्—Milk; ऊधसि भवमौधस्यम्—ऊधस्+यत्, 'शरीरावयवाच्च' इति यत् । उपभोक्तुम्—To enjoy; उप+भुज्+तुमुन् । षष्ठांशम्—Sixth part; षष्ठोऽंश इति तम् (कर्मधारय); षष्ठ – षष्+थुक्+डट् ।

रक्षितायाः—Protected; रक्ष्+क्त+टाप्, ष० ए० व० । उर्व्या इव रक्षितायाः – It is a simile. A king is rightfully authorised to receive one sixth of the produce of the earth from his subjects, as said by मनु:—

'पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः ।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा ॥

आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम् ।
गन्धौषधिरसानाञ्च पुष्पमूलफलस्य च ॥
7—130-131.

Thus the king liked to take the cow's milk also accordingly. The permission of the preceptor was necessary for the latter had asked the king to live upon nothing but the products of the forest.

**67.** इत्थम्—Thus. इदम्+थमु । क्षितीशेन—By the king; क्षितेरीशस्तेन (ष० तत्पु०)। क्षयन्ति अस्यामिति क्षितिः—क्षि+क्तिन् । विज्ञापिता—Informed; वि+ज्ञा+णिच्+क्त+टाप् । प्रीततरा—Still more pleased; अतिशयेन प्रीता इति प्रीततरा—प्रीत+तरप्+टाप् । तदन्विता Accompanied by him; तेन अन्विता इति (तृ० तत्पु० ; अन्विता—अनु+इण्+क्त+टाप् ।

हैमवतात्—From that of the Himalaya; हिमवतोऽयमिति हैमवतस्तस्मात्—हिमवत्+अण्, पञ्चमी । प्रत्याययौ—Returned; प्रति+आ+या+लिट्; अश्रमेण—Without fatigue; 'प्रकृत्यादिभ्य उपसंख्यानम्' इति तृतीया ।

**68.** प्रसन्नेन्दुमुखः—Whose face resembled the bright moon; प्रसन्नश्चासौ इन्दुरिति प्रसन्नेन्दुः (कर्मधारय) । प्रसन्नेन्दुरिव मुखं यस्य सः (बहुव्रीहि); प्रसन्न—प्र+सद्+क्त । निवेद्य—Having informed; नि+विद्+णिच्+ल्यप् । प्रहर्षचिह्नानुमितम्—Inferred from the marks of his great joy. प्रकृष्टो हर्ष इति प्रहर्षः (प्रादिसमास); प्रहर्षस्य चिह्नानि इति प्रहर्षचिह्नानि (ष० तत्पु०); तैरनुमितमिति (तृ० तत्पु०); प्रहर्ष—प्र+हृष्+घञ् । अनुमितम्—अनु+मा+क्त ।

The king was extremely delighted to have obtained the boon of his desire from the cow and so his face was beaming like the bright moon. Vasistha learnt at once from the marks of his joy that Nandini had granted him the boon he sought.

शशंस – Told; शंस्+लिट्। पुनरुक्तया इव—Repeated as if. It is उत्प्रेक्षा—The poet fancies here that it seemed to be superfluous to communicate in words the news of Nandini's favour to the preceptor as he had already inferred it from the joy-lit face of the king

**69.** नन्दिनीस्तन्यम्—Nandini's milk; नन्दिन्याः स्तन्यमिति (ष० तत्पु०); स्तने भवं स्तन्यम्—स्तन+यत्। अनिन्दितात्मा—He who had unblemished character; न निन्दित इति अनिन्दितः (नञ् तत्पु०); अनिन्दितः आत्मा यस्य सः (बहुव्रीहि)। निन्दित – निन्द्+क्त। सद्वत्सलः—Kind to the good; सत्सु वत्सल इति (स० तत्पु०); वत्सल—वत्स+लच्, 'वत्सांसाभ्यां कामबले' इति लच्।

वत्सहुतावशेषम् - वत्सश्च हुतञ्च इति वत्सहुते (द्वन्द्व); तयोरवशेषस्तम् (ष० तत्पु०); हुतम्—हु+क्त; 'नपुंसके भावे क्तः'। शेष—शिष्+घञ्। पपौ—Drank; पा+लिट्। कृताभ्यनुज्ञः—Being permitted; कृता अभ्यनुज्ञा यस्मै सः (बहुव्रीहि)। अतितृष्णः—Very thirsty; अतिशयिता तृष्णा यस्य सः (बहुव्रीहि)। Here there is उत्प्रेक्षा। Fame in sanskrit poetry is generally described as white. Here the cow's milk is fancied as being fame incarnate.

**70.** यथोक्तव्रतपारणान्ते—At the end of the meal after the fast; उक्तमनतिक्रम्य इति यथोक्तम् (अव्ययीभाव); यथोक्तं व्रतमिति यथोक्तव्रतम् (कर्मधारय), तस्य पारणा इति यथोक्तव्रतपारणा (ष० तत्पु०), तस्या अन्ते (ष० तत्पु०)।

प्रास्थानिकम्—Pertaining to departure; प्रस्थाने भवं प्रास्थानिकम्। प्रस्थान+ठञ्। प्रस्थान—प्र+स्था+ल्युट् 'कालाट्ठञ्' इति ठञ्। Although the word प्रस्थान does not primarily mean 'the time of departure', yet it may secondarily mean so. Thus according to the वार्तिक 'यथाकथञ्चिद्गुणवृत्त्याऽपि काले वर्तमानात् प्रत्यय इष्यते' it takes the ठञ् प्रत्यय। स्वस्त्ययनम्—Benediction; ईयते अनेनेति अयनम् इण्+ल्युट्। स्वस्ति अयनमिति स्वस्त्ययनम्।

प्रयुज्य—Having invoked; प्र+युज्+ल्यप्। दम्पती—Couple of husband and wife; जाया च पतिश्च इति दम्पती (द्वन्द्व); जाया शब्दस्य च दम्भावो निपात्यते। प्रस्थापयामास—Dismissed; प्र+स्था+णिच्+लिट्। वशी - Self-restraint; वश+इनि। 'अत इनिठनौ' इति इनिः।

**71.** प्रदक्षिणीकृत्य—See verse 21 हुताशम्—Fire; हुतमश्नातीति हुताशस्तम् (उपपद तत्पुरुष); हुत+अश्+अण्। सवत्साम् With the calf; वत्सेन सह विद्यमाना ताम् बहुव्रीहि)। प्रतस्थे—Started; प्र+स्था+लिट्, 'समवप्रविभ्यः स्थः' इति आत्मनेपदम्। सन्''प्रभावः With his royal majesty made more splendid by the excellent auspicious ceremonies (performed at the time of departure). सन्ति मङ्गलानि इति सन्मङ्गलानि (कर्मधारय);

अतिशयेन उदग्र इति उदग्रतरः ; सन्मङ्गलैरुदग्रतरः प्रभावो यस्य सः (बहुव्रीहि) ।

**72.** श्रोत्राभिरामध्वनिना—(The chariot) whereof the sound was pleasing to the ear. श्रोत्रयोरभिरामो ध्वनिर्यस्य स तेन (बहुव्रीहि); अभिराम - अभि+रम्+घञ् । धर्मपत्नीसहितः—With his lawful wife; धर्मपत्न्या सहित इति धर्मपत्नीसहितः (तृ० तत्पु०) । सहिष्णुः—Forbearing, enduring; सह्+इष्णुच्; 'अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मद' इत्यादिना इष्णुच् । अनुद्घातसुखेन—Comfortable on account of its being free from jolts. अविद्यमान उद्घातो यस्मिन् स अनुद्घातः (बहुव्रीहि); सुखयतीति सुखः; अनुद्घात अतएव सुख इति अनुद्घातसुखः (कर्मधारय); अनुद्घातः - नञ्+उत्+हन्+घञ् । पूर्णेन—पॄ+क्त, तृतीया । उत्प्रेक्षालंकारः ।

The poet fancies here that the king was not carried by a wooden car but by his own desire, as it were, which had now been crowned with success.

**73.** आहितौत्सुक्यम्—(Him) who had caused anxiety (in them); आहितमौत्सुक्यं येन स तम् (बहुव्रीहि); आहित—आ+धा+क्त । औत्सुक्यम्—उत्सुक+ष्यञ्, 'गुणवचनब्राह्मणादिभ्यः कर्मणि ष्यञ्' इति ष्यञ्; अदर्शनेन—न दर्शनमिति अदर्शनम् नञ् तत्पु०); दर्शन—दृश्+ल्युट् ।

प्रजार्थव्रतकर्शिताङ्गम्—Whose body had emaciated by the vow observed for a progeny. प्रजायै इति प्रजार्थम्; प्रजार्थं व्रतमिति प्रजार्थव्रतम् (कर्मधारय); प्रजार्थव्रतेन कर्शितमङ्गं यस्य स तम् (बहुव्रीहि); कर्शित—कृश्+क्त ।

अनाप्नुवद्भिः—न आप्नुवद्भिरिति अनाप्नुवद्भिः (नञ् तत्पु०); नञ्+आप्+शतृ, तृ० ब० व०। It qualifies नेत्रैः। नवोदयम्—Newly risen; नव उदयो यस्य तम् (बहुव्रीहि); उदय—उत्+इण्+अच्।

ओषधीनां नाथम्—The lord of herbs i.e the moon; The moon is said to observe a vow and feed the gods with her nectar, so she also gets thin. Cf:—

'कलाः षोडश सोमस्य शुक्ले वर्धयते रविम्।
अमृतेनामृतं कृष्णे पीयते दैवतैः क्रमात्॥'

**74.** पुरन्दरश्रीः—Possessing royal glory like that of Indra; पुरो दारयतीति पुरन्दरः—पुर+दृ+खच्; 'पूः सर्वयोर्दारिसहोः' इति खच्; 'वाचंयमपुरन्दरौ' इति मुमागमः। पुरन्दरस्य श्रीरिव श्रीर्यस्य सः (बहुव्रीहि)।

उत्पताकम्—With the banners lifted up; उद्गताः पताका यस्मिन् तत् (बहुव्रीहि)। प्रविश्य—प्र+विश्+ल्यप्। पौरैः—By the citizens; पुरे भवाः पौरास्तैः—पुर+अण्, तृ० ब० व०। अभिनन्द्यमानः—Being greeted; अभि+नन्द्+यत्+शानच्। Present Passive participle; भुजगेन्द्र...सारे—(On the arm) which possessed the strength like that of the lord of serpents.

भुजेन गच्छतीति भुजङ्गः—भुज+गम्+खच्। भुजङ्गानामिन्द्र इति भुजङ्गेन्द्रः (ष० तत्पु०); भुजङ्गेन्द्रेण समानः सारो यस्मिन् स तस्मिन् (बहुव्रीहि); सार—Strength; सृ+घञ्। आससञ्ज—Took up; आ+सञ्ज्+लिट्। It shows that the king had powerful arms and that he was capable of sustaining the earth.

**75.** नयनसमुत्थम्—Born of the eyes. नयनयोः समुत्थम् इति (स० तत्पु०); समुत्थम्—सम्+उत्+स्था+क। अत्रेः—Of Atri; अत्रि is one of the seven sons of Brahma There is a legend in the हरिवंशपुराण wherein it is said that once while this sage was absorbed in meditation there dropped from his eyes water illuminating the ten quarters. 'नेत्राभ्यां वारि सुस्राव दशधा द्योतयद्दिशः'। The quarters received the water in them in the form of a foetus but being unable to retain it they emitted it out. Thus it became the radiant moon which delights the whole world.

सुरसरित् The celestial river, Ganges; सुराणां सरित् इति (ष० तत्पु०)। बह्निना निष्ठ्यूतम्—Thrown away by the fire; बह्निना निष्ठ्यूतमिति (तृ० तत्पु०); निष्ठ्यूतम्—निस्+ष्ठिव्+क। ऐशम्—Of Siva; ईशस्य इदमैशम्—ईश्+अण्। It refers to the legend that once Siva dropped his seed into the Ganges. The Ganges then deposited it into a thicket where the god Skanda took his birth. See Mallinatha's Commentary:—

नरपतिकुलभूत्यै—For the prosperity of the king's family. नराणां पतिरिति नरपतिः (ष० तत्पु०), तस्य कुलमिति नरपतिकुलम् (ष० तत्पु०); तस्य भूतिस्तस्यै (ष० तत्पु०); आधत्त—Bore; आ+धा+लङ्, आत्मनेपद। गुरुभिः—Heavy. अभिनिविष्टम्—Composed of; अभि+नि+विश्+क।

लोकपालानुभावैः—By the splendour of the

guardians of the quarters. लोकपालानामनुभावास्तैः (ष० तत्पु०) ; अनुभाव—अनु+भू+घञ्। Splendour.

The king is said in Hindu scriptures to possess the essence of the eight guadians of directions. These guadians are:—

'इन्द्रो वह्निः पितृपतिर्नैऋतो वरुणो मरुत्।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात॥'